THE

CHOWKHAMBÂ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 472.

श्रीमद्भट्टोजिदीक्षितविरचितः,

श्रीमन्नागोजिभट्टविरचितश्च-

तिथिनिर्णयः ।

वेदाचार्य-धर्मशास्त्राचार्यवर्य-

पण्डितप्रवरश्रीविश्वनाथशास्त्रिभिः

सम्पादितः परिष्कृतश्च ।

THE

TITHINIRNAYA

OF

M. M. S'RĪ BHAṬṬOJI DĪKṢITA

&

M. M. S'RĪ NĀGOJI BHAṬṬA

PUBLISHED BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE,

Benares City

Registered according to Act XXV. of 1867. (All Rights Reserved.)

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोदितम् ॥ २ ॥

स्तबकः ४७२.

Printed by Jaya Krishna Das Gupta
at the Vidya Vilas Press, Benares.
1940.

THE

CHOWKHAMBÂ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 472.

THE

TITHINIRNAYA

OF

M. M. S'RĪ BHAṬṬOJI DIKṢITA

&

M. M. S'RĪ NĀGOJI BHAṬṬA

Edited with Introduction etc.,

BY

VEDA-DHARMAS'ĀSTRĀCHĀRYA

PANDIT S'RĪ VIS'VANĀTHA S'ĀSTRI

Head of the Dharmaśastra Department

Hindu University, Benares.

BENARES.

JAYA KRISHNA DAS HARIDAS GUPTA,

CHOWKHAMBÂ SANSKRIT SERIES OFFICE

1940.

PRINTED AT THE
VIDYA VILAS PRESS, BENARES CITY.

प्राप्तिस्थानम्—
चौखम्बा [illegible] [illegible],
बनारस सिटी।

1940.
All Rights Reserved by the Publishers.

* श्रीः *

-* चौखम्बा-संस्कृत-ग्रन्थमाला *-

(ग्रन्थ-संख्या ८५)

ग्रन्थाङ्कः ४७२.

श्रीमद्भट्टोजिदीक्षितविरचितः
श्रीमन्नागोजिभट्टविरचितश्च

तिथिनिर्णयः

अखिलभारतीयसनातनधर्ममहासभा-विद्वत्परिषत्प्रधानमन्त्रिभिः श्रीकाशिक-
हिन्दूविश्वविद्यालय-वेदधर्मशास्त्रप्रधानाध्यापकैः, भारत-
प्रथितश्रौतस्मार्तकर्मानुष्ठानधुरन्धरैः
वेदाचार्य-धर्मशास्त्राचार्यवर्य-
पण्डितप्रवरश्रीविश्वनाथशास्त्रिभिः
सम्पादितः परिष्कृतश्च ।

प्रकाशकः—
जयकृष्णदास-हरिदास गुप्तः
चौखम्बा संस्कृत सीरीज़ आफिस,
बनारस सिटी ।

विक्रम संवत् १९९७

[अस्य पुनर्मुद्रणादिकाः सर्वेऽधिकाराः प्रकाशकाधीनाः]

श्री विश्वनाथः प्रसीदतु ।



भूलोकालोक-रत्नं निखिलमतिमतां मूर्तमानप्रतिष्ठा
पुण्योत्कर्षैकभूमिर्दृढनिकषशिला वाग्मिनां वाग्मितायाः;
आर्यावर्ताभिमानस्मरहरनगरीविश्वविद्यालयात्मा,
मान्यात्मा मालवीयो जयति कुलपतिर्भारतानन्दकन्दः ॥

तस्मै विदे मदनमोहनमालवीय-
मान्याय धर्मगुरवे प्रयतः प्रणम्य,
बद्धादरः कृतिमिमां महितां मनोज्ञां-
धर्म्यां समर्प्य जनतापरमोपकर्त्रीम् ॥

मीमांसा-पारदृश्वा निगमवरवनी सिंहविक्रान्तवीर्यो
धर्माम्भोधि-प्रमथनद्विपुलबललसन्मन्दरोदारदर्पः ।
सद्वाक्योल्लासलीलालुलितपदधुनीदन्तिदृप्यत्प्रतापः,
शास्त्री श्रीविश्वनाथो जगति विजयते विद्वदाश्चर्यचर्यः ॥

अक्षयतृतीया १९९७ वि०

विनिवेदनं किञ्चित् ।

सुविदितमेवेदं सर्वेषां विद्वत्तल्लजानां यदिह चतुर्विधपुरुषार्थेषु धर्माख्यः प्रथमः पुरुषार्थः । सम्प्राप्ते च तस्मिन्नातिदुर्लभा इतरे कामार्थमोक्षाः ।

तत्राभ्युदयनिःश्रेयसे साधनत्वेन धारयतीति धर्मः । यद्यप्यस्ति धर्मस्वरूपनिश्चये वादिनां विप्रतिपत्तिस्तथापि शास्त्रकारैस्तस्याः निराकृतत्वात् । **तथाहि—**

तार्किकास्तावत्-आत्मगुणौ धर्माधर्मावित्याहुः ।

विहितक्रिययासाध्यो धर्मः पुंसो गुणो मतः ।
प्रतिषिद्धक्रियासाध्यः पुंगुणोऽधर्म उच्यते ॥ इति

मीमांसकास्तु—"चोदना लक्षणोऽर्थो धर्मः" इत्यसूत्रयन् । (पू० मी० १-१-२)

तत्र भाट्टा मन्यते—द्रव्यक्रिया गुणादीनां धर्मत्वं स्थापयिष्यति ।

तेषामैन्द्रियकत्वेऽपि न तादूप्येण धर्मता ॥
श्रेयः साधनता त्वेषां नित्यं वेदात्प्रतीयते ।
तादूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥

तं० वा० १-१-२-इति

प्राभाकरास्तु—कार्यनियोगापूर्वशब्दैरुच्यमानं भावरूपसाध्यं स्वर्गादिफलसाधनमात्मगुणं धर्ममाहुः ॥

अपि च—यमार्याः क्रियमाणं तु शंसन्त्यागमवेदिनः ।
स धर्मो यं विगर्हन्ते तमधर्मं प्रचक्षते ॥
इदृशस्य हि धर्मस्य स्वरूपं व्याकुलो भवेत् ।
जानातीत्यस्ति तत्राऽपि प्रावीण्यं धर्मशालिनाम् ॥ इति **विश्वामित्रः**
विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ॥ **इति मनुः**

नन्वेवं धर्मस्वरूपमनिरूपितमेव स्यात् । तथाहि—विश्वामित्रमनुवाक्याभ्यां तावत् सामान्याकारः प्रतीयते, न तु द्रव्यगुणादिरूपो विशेषाकारः । एतदेवाभिप्रेत्य

महाभारते राजधर्मे स्मर्यते—

न कल्माषो न कपिलो न कृष्णो न च लोहितः ।
अणीयान् क्षुरधारायाः को धर्मं वक्तुमर्हति ॥ इति

नैष दोषः—उक्तवाक्ययोरधर्मव्यावृत्तस्याकारविशेषस्य स्फुटं प्रतीयमानत्वात् वादिविप्रतिपत्तेश्च समाधातुं शक्यत्वात् । स्वर्गादीष्टसाधनस्य शास्त्रैकसमधिगम्यस्यातिशयस्य धर्मत्वेन सर्वसम्प्रतिपत्तेः ।

द्रव्यादिनिष्ठः, आत्मनिष्ठश्च । तत्रात्मनिष्ठस्यातिशयस्य
लनिष्पत्तिपर्यन्तं चिरकालमुपस्थानाच्च, तद्विवक्षया
र्मः । इति **तार्किकप्राभाकरावाहतुः** । उक्तस्या-
प्रेत्य तत्साधनभूतो द्रव्याद्यतिशयोधर्मः, इत्याहु-
दविरुद्धम् । "व्यवहारे भट्टनयः" इत्यभ्युपगमात् ।
यमानः शौचाचमनसन्ध्यावन्दनादि स्थूलो धर्मः ।
धुं योग्यः इतरेषामधर्मत्वभ्रान्तिविषयो द्रौपदी विवा-
विधस्यापि धर्मस्य माहात्म्यं श्रुतिस्मृतिभ्यां स्फुटं

धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति ।
धर्मेण पापमपनुदन्ति, धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति ॥ इति श्रुतिः

धर्मं शनैः सञ्चिनुयात् वल्मीकमिव पुत्तिकाः ।
परलोकसहायार्थं सर्वभूतान्यपीडयन् ॥
नामुत्र हि सहायार्थं पिता माता च तिष्ठतः ।
न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलः ॥
एकः प्रजायते जन्तुरेक एव लीयते ।
एकोऽनुभुङ्क्ते सुकृतमेकएव च दुष्कृतम् ॥
मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति ॥

तस्माद्धर्मं सहायार्थं नित्यं सञ्चिनुयाच्छनैः ।
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥
धर्मप्रधानं पुरुषं तपसा हतकिल्बिषम् ।
परलोकं नयत्याशु भास्वन्तं खशरीरिणम् ॥ इति मनुस्मृतिः

धर्म एव हतो हन्ति धर्मो रक्षित रक्षितः इत्यादि वचोभिश्च–धर्मस्योपादेयत्वं श्रुतिस्मृतिभ्यां बहुप्रकाशितमेव नातितिरोहितमिव स्वाध्यायशीलानां विदुषाम् ।

तत्र **दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत**, सूर्याचन्द्रमसोर्ग्रहणे स्नायात्, **एकादशीमुपवसेत्—अनध्याये नाधीयीत**, नवरात्रव्रतं कुर्यात्, श्रावण्यामुपाकर्म, वसन्तोत्सवः कर्तव्यः, होलाका कर्तव्या इत्यादि धर्मसम्बन्धि विध्यनुष्ठाने, तिथिनिर्णयस्यावश्यकत्वात्तथैवानुष्ठाने धर्मोत्पत्तेश्च लोकोपकारपरायणाभ्यां सर्वतन्त्रस्वतन्त्राभ्यां महामहोपाध्यायपदसम्मानिताभ्यां वैयाकरणकेसरिभ्यां श्रीमद्भट्टोजिदीक्षित-श्रीमन्नागेशभट्टाभ्यां च तिथिनिर्णयाभिधं ग्रन्थरत्नं विरच्य पूर्वमेव संस्थापितम् । परञ्चेदमेवाद्यावधि अप्रकाशितमेवासीत् । तदिह समेषां धर्मानुष्ठाननिष्ठानां सज्जनानामुपकारं विचिन्त्य संस्कृतग्रन्थपुञ्जप्रकाशनेन लब्धराकाशशाङ्कसुन्दरयशोभिः **गुप्तश्रीजयकृष्णदासहरिदास महोदयैः** सम्मुद्रितमेतन्निबन्धद्वयम् । तदेवं रीत्या तैः संस्कृतभाषाप्रयत्नतत्वप्रणयिनां धार्म्मिकविदुषां बहूपकृतमिति ते सकलविबुधानां साधुवादार्हाः ।

संशोधनार्थं पुस्तकप्रदातृभ्यः, **श्रीमद्ऋग्वेदाचार्यगुरुवर श्रीविद्याधर शर्मभ्यः**, तथा साहित्योदधिकणधार राजकीय संस्कृतमहाविद्यालय (गवर्नमेंट संस्कृतकालेज) पुस्तकालयोपाध्यक्ष–**श्रीमन्नारायणशास्त्री खिस्ते महोदयेभ्यः, प्रिन्सिपल डाक्टर मङ्गलदेवशास्त्रिभ्यश्च** सबहुमानं धन्यवादं समर्प्य—

अन्ते वयमपि जगदेकरक्षकं श्रीकाशीविश्वनाथं भूयोभूयं शिरसा प्रणम्य सर्वत्र पुस्तकस्यास्य आर्य (हिन्दु) जनतासु सुप्रचारं कामयामह इति ।

धर्मशास्त्र-विभागः
काशीहिन्दुविश्वविद्यालयः
१९९७ वि०

श्रीविश्वनाथशास्त्री

॥ श्रीः ॥

॥ समर्पणम् ॥

अथ श्रीमता पण्डितप्रवरेण काशीहिन्दूविश्वविद्यालयवेदधर्मशास्त्र प्रधानाध्यापकेन **वेदधर्मशास्त्राचार्येण श्रीविश्वनाथशर्मणा** सावधानेन चेतसा सम्पादितम्,

काशीचौखम्बासंस्कृतपुस्तकालयाध्यक्षश्रेष्ठिवर्य**श्रीजयकृष्णदास हरिदास गुप्त** महोदयप्रकाशितम्,

सर्वतन्त्रस्वतन्त्राभ्यां श्रीमद्भट्टोजिदीक्षित—**श्रीमन्नागेशभट्टाभ्यां** निबद्धं तिथिनिर्णयाभिधं निबन्धद्वयम्,

बहोः कालाद् दिदृक्षितमद्य दृष्ट्वामन्दानन्दमहोदधौ निमज्जन् महोदधिस्नानेनात्मानं पावयामि।

सन्त्येव निर्णयसिन्धुस्मृतिकौस्तुभ-पुरुषार्थचिन्तामणि-धर्मसिन्धु प्रभृतयो निबन्धास्तैस्तैः प्रथितयशोभिर्निबन्धकारैर्निबद्धास्तथापि ते मतान्तरखण्डनमण्डनादिना गुरुशरीरतामापन्नाः स्थूलमतिभिर्दुर्वहा इति मतान्तरखण्डनमण्डनादिरहितं लघुशरीरं तिथिनिर्णयाभिधं निबन्धद्वयं व्रतादिनिर्णयविधौ स्थूलमतीनामपि यथोपकरिष्यति न तथान्य इति मे दृढो विश्वास इति।

सूर्यनारायणशर्म शुक्लस्य, अध्यापकस्य
गवर्नमेण्टसंस्कृतमहाविद्यालय—
काश्याम्।

॥ श्रीः ॥

श्रीमद्भट्टोजिदीक्षितविरचितस्य तिथिनिर्णयस्य

विषयसूची ।



विषयः	पृष्ठाङ्कः	विषयः	पृष्ठाङ्कः
चैत्रशुक्लप्रतिपदि वत्सरारम्भः	१	रम्भाव्रतम्	९
अस्यामेव नवरात्रारम्भः	,,	दशहरानिर्णयः	१०
अत्र प्रपादानम्	,,	तत्र दशयोगाः	,,
चैत्रशुक्लतृतीयायां दोलोत्सवः	२	निर्जला एकादशी	,,
सौभाग्यशयनव्रतम्	,,	सावित्री व्रतम्	,,
इर्यं मन्वादिः	,,	तत्र वटपूजा	,,
अत्र श्राद्धम् ।	,,	आषाढमासनिर्णयः	,,
अकरणे प्रायश्चित्तम्	,,	मत्स्यजयन्ती	,,
मत्स्यजयन्तीनिर्णयः	,,	विष्णुशयनोत्सवः	,,
कल्पादि निर्णयः	३	चातुर्मास्यव्रतारम्भः	१२
भवान्याउत्पत्तिः	,,	तत्र वर्ज्यावर्ज्यनिरूपणम्	१३
अशोककलिकाप्राशनम्	,,	कोकिलाव्रतम्	१४
रामनवमीनिर्णयः	,,	कूर्मजयन्ती	,,
तत्र पूजादिविधानम्	४	दधिव्रतम्	,,
चैत्रशुक्लैकादश्यां दोलोत्सवः	,,	पवित्रारोपणम्	,,
चैत्रशुक्लद्वादश्यां दमनोत्सवः	,,	शिवपवित्रनिर्माणप्रकारः	१५
अनङ्गव्रतम्	,,	उपाकर्म निर्णयः	,,
चैत्री पौर्णमासी	,,	श्रवणाकर्म	१६
वारुणी निर्णयः	५	कज्जलीनिर्णयः	,,
अथ वैशाखनिर्णयः	,,	जन्माष्टमीनिर्णयः	१६–१७
वैशाखस्नानम्	,,	हरितालिकाव्रतम्	१८
अक्षयतृतीया	६	वरदचतुर्थी	,,
युगादिनिर्णयः	,,	ऋषिपञ्चमी	१९
धर्मघटदानविधिः	७	वाराहजयन्ती	,,
परशुरामजयन्ती	८	दूर्वाष्टमीनिर्णयः	१९
गङ्गोत्पत्तिनिर्णयः	,,	तत्र विधिः	,,
नृसिंहजयन्ती निर्णयः	९	ज्येष्ठापूजा	२०

विषयः	पृष्ठाङ्कः
शक्रध्वजोत्थापनम्	२०
विष्णुशृङ्खलयोगः	२१
वामनावतारनिर्णयः	,,
अनन्त व्रतम्	,,
अगस्त्योदयः	,,
भाद्रपदपौर्णमास्यां श्राद्धम्	२२
महालयः	,,
तत्र श्राद्धे पञ्च पक्षाः	,,
सकृन्महालये विचारः	२३
सन्यासिनां श्राद्धम्	,,
अथात्र देवताः	२४
विधवाकर्तृकश्राद्धविचारः	,,
भरण्यां श्राद्धमतिप्रशस्तम्	२६
चन्द्रषष्ठी	,,
महालक्ष्मीव्रतम्	,,
अन्वष्टकाश्राद्धम्	,,
त्रयोदशीश्रा म्	२७
चतुर्दशीश्राद्धविचारः	२८
गजच्छाया	,,
दौहित्रकर्तृकश्राद्धविचारः	२९
नवरात्रारम्भः	,,
देवीपूजाविचारः	२९
तत्र माधवमतसमालोचनम्	३०
उपाङ्गललितात्रतम्	३१
सप्तमीपूजा	,,
अष्टमीपूजा	,,
महानवमीनिर्णयः	३२
विजयादशमीनिर्णयः	३३
तत्र कृत्यम्	३४
द्विदलव्रतम्	,,
आश्विनपौर्णमासी	,,
ललितायात्राविधानम्	३५

विषयः	पृष्ठाङ्कः
कोजागरव्रतम्	३५
कार्तिकस्नानारम्भः	,,
पञ्चनदस्नानम्	,,
कार्तिकमासः	,,
करकचतुर्थी	३६
वत्सद्वादशी	,,
दीपावली	,,
नरकचतुर्दशी	,,
कार्तिकामावास्याकृत्यम्	३७
कार्तिकशुक्लप्रतिपत्	,,
यमद्वितीया	३८
कूष्माण्डनवमी	,,
भीष्मपञ्चकव्रतम्	,,
देवोत्थापनम्	३९
चातुर्मास्य व्रतसमाप्तिः	,,
वैकुण्ठचतुर्दशी	,,
काशीविश्वेश्वरस्थापनदिनम्	४०
कार्तिकपौर्णमासी	,,
त्रिपुरोत्सवः	,,
मार्गशीर्षमासः	४१
कालाष्टमी	,,
नागपञ्चमी	,,
चम्पाषष्ठी	,,
स्कन्दषष्ठी	,,
चतुर्दशीस्नानम्	,,
दत्तात्रेयोत्पत्तिविचारः	४२
प्रत्यवरोहणम्	,,
पौषमासः	,,
अर्कोदयः	,,
बौद्धजयन्ती	४३
माघमासः	,,
कल्किजयन्ती	४३

विषयः	पृष्ठाङ्कः	विषयः	पृष्ठाङ्कः
तिलचतुर्थी	४३	शिवरात्रिः	४६
कुन्दचतुर्थी	,,	शिवरात्रिपारणम्	,,
श्रीपञ्चमी	४४	मासशिवरात्रिः	४७
रथसप्तमी	,,	फाल्गुनमासः	,,
पद्मकयोगः	,,	होलिकोत्सवः	,,
भीष्मतर्पणम्	,,	होलिकाविषयेविशेषविचारः	४८–४९
भीष्मद्वादशी	४५	वसन्तोत्सवः	,,
माघीपौर्णिमा	,,	चूतकुसुमप्राशनम्	५०
जानक्युत्पत्तिः	,,	ग्रन्थसमाप्तिः	,,

मङ्गलाचरणम्

श्रीमन्नागोजिभट्ट विरचितस्य तिथिनिर्णयस्य

विषयसूची—

विषयः	पृष्ठाङ्कः	विषयः	पृष्ठाङ्कः
तिथिविचारः	५१	हविष्याणि	६२
दैवपित्र्यकर्मविचारः	,,	व्रताहे वर्ज्यानि	,,
उपवासादिविषये विशेषविचारः	,,	दशम्यां वर्ज्यानि	६३
प्रतिपन्निर्णयः	५३	पारणाहे वर्ज्यानि	,,
द्वितीयानिर्णयः	५४	श्राद्धे ब्राह्मण परीक्षा	,,
तृतीयानिर्णयः	,,	श्राद्धे देश विचारः	६४
चतुर्थीनिर्णयः	,,	श्राद्धपूर्वदिन कृत्यम्	,,
पञ्चमीनिर्णयः	५५	क्षारगणः	,,
षष्ठीनिर्णयः	,,	व्रते एकादशीविचारः	६५
सप्तमीनिर्णयः	,,	विद्धैकादशी विचारः	६६
अष्टमीनिर्णयः	,,	गौडमते विचारः	६७–६८
महालक्ष्मीव्रतम्	५६	श्रवणद्वादशी	,,
नवमीनिर्णयः	,,	विष्णुशृङ्खलयोगः	६९
दशम्यादिचतुर्दश्यन्तनिर्णयः	५७	शिवरात्रिव्रतम्	,,
पञ्चदशीनिर्णयः	५८	अथैकभक्तम्	७०
अथ जन्माष्टमी निर्णयः	५८–५९–६०	अथ नक्तम्	७१
एकादशी निर्णयः	६१	अथायाचितम्	७२

विषयः	पृष्ठाङ्कः
अथोपाकर्म	७२
कातीयानामुपाकर्मनिर्णयः	,,
बौधायनानामुपाकर्म निर्णयः	,,
सामगानामुपरकर्म निर्णयः	७३
आथर्वणानामुपाकर्मनिर्णयः	
रक्षाबन्धः	,,
अथोत्सर्जनम्	,,
नानातिथिसाध्यव्रतनिर्णयः	७४
नवरात्रप्रतिपन्निर्णयः	७४–७५
तत्रसात्विकी राजसी तामसी पूजाविचारः	७५
नवरात्रप्रतिपन्निर्णयः	,,
सप्तम्यष्टमी नवमी निर्णयः	७६–७७
विसर्जनम्	,,
नवरात्रे पारणविचारः	७८
अथ दीपावली	,,
अथ तदमा	७९
अथ तत्प्रतिपदा	,,
अथ होला	,,
अथ श्राद्धम्	८०
श्राद्धं द्विविधम्	८०–८१
अथ महालयः	८२
त्रयोदश्यां श्राद्धविचारः	८३
चतुर्दश्यां श्राद्धविचारः	८४
नवान्नश्राद्धम्	८५
आब्दिकश्राद्धविचारः	,,

विषयः	पृष्ठाङ्कः
प्रसङ्गादन्यविचारः	८५
आमान्नश्राद्धादि विचारः	८६
श्राद्धविषये मरणदिवससम्बन्धिविचारः	,,
सङ्घातमरणे विचारः	८८
नवश्राद्धविचारः	८९
षोडशश्राद्ध विचारः	,,
सपिण्डीकरणकालः	९०–९१
तत्र मतभेदप्रदर्शनम्	९२
व्युत्क्रममृतौ विचारः	९३
श्राद्धे तिथिनिर्णयः	९४
तत्र माधवमतसमीक्षा	,,
खण्डतिथिविचारः	९५
श्राद्धे अमा निर्णयः	९५–९६
निरग्निकान् प्रति अमानिर्णयः	९७
तत्र हेमाद्रि मते व्यवस्था	,,
अथ सङ्क्रान्तिः	,,
अथ ग्रहणकालः	९८
प्रस्तास्ते विचारः	९९
अथानध्यायाः	१००
अथ नैमित्तिकाः	१०१
अनध्यायाध्ययने दोषोद्भावनम्	१०२
अथमासनिर्णयः	,,
तत्र विभिन्नकार्ये मासव्यवस्था	१०३
ग्रन्थसमाप्तिः ।	,,
समाप्तिमङ्गलम्	

श्रीगणेशायनमः ।

श्रीभट्टोजिदीक्षित विरचितः—

तिथिनिर्णयः ।

चैत्रशुक्लप्रतिपदि वत्सरारम्भः । तत्रौदयिकी तिथिर्ग्राह्या ।

'चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि । शुक्लपक्षे समग्रं तु तदा सूर्योदये सति' । इति **हेमाद्रौब्राह्मोक्तेः** । दिनद्वयेऽपि तद्व्याप्तावव्याप्तौ वा पूर्वैव । वत्सरादौ वसन्तादौ बलिराज्ये तथैव च । पूर्वविद्धैव कर्त्तव्या प्रतिपत्सर्वदा बुधैरिति **गोविन्दार्णवेवृद्धवसिष्ठोक्तेः** । चैत्रस्य मलमासे तु तत्रैव वत्सरारम्भः इत्येके । शुद्ध एवेत्यपरे । तत्र तैलाभ्यङ्गो नित्यः ॥ वत्सरादौ वसन्तादौ बलिराज्ये तथैव च । तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते **इतिवृद्धवसिष्ठोक्तेः** । **अस्यामेव नवरात्रारम्भः** । तत्र परयुता । अमायुक्ता न कर्त्तव्या प्रतिपच्चण्डिकार्चने । मुहूर्त्तमात्रा कर्त्तव्या द्वितीयायां गुणान्वितेति **देवीपुराणात्** । **अत्र प्रपादानमुक्तम् । अपरार्के भविष्ये—**

अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे । पुण्येऽह्नि विप्रकथिते प्रपादानं समाचरेदित्युपक्रम्य—ततश्चोत्सर्जयेद्विद्वान्मन्त्रेणानेन मानवः । प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता । प्रपादानात्तु पितरस्तृप्यन्तु हि पितामहाः । आनिवार्यं ततो देयं जलं मासचतुष्टयमिति । तथा—प्रपादातुमशक्तेन विशेषाद्धर्ममीप्सुना । प्रत्यहं धर्मघटको वस्त्रसम्वेष्टिताननः । ब्राह्मणस्य गृहे देयं **शीतामलजलः शुचिः** । **तत्र मन्त्रः** । एष धर्मघटो दत्तो ब्रह्म विष्णुशिवात्मकः । अस्य प्रदानात्सकला मम सन्तु

मनोरथाः । अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति । प्रपादान फलं सोपि प्राप्नोतीह न संशयः । इति ।

चैत्रशुक्लतृतीयायां गौरीमीश्वरसंयुतां सम्पूज्य **दोलोत्सवं कुर्यात्** तथा **निर्णयामृते देवीपुराणे च** । तृतीयायां यजेद्देवीं शङ्करेण समन्वितां । कुङ्कुमालक्तकपूर [illegible] न्धकैः । सुगन्ध धूपदीपैश्च दमनेन विशेषतः । [illegible] तुष्टये सदा इति । इयं परा ग्राह्या । मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परा इति **माधवोक्तेः** । अत्रैव **सौभाग्यशयनव्रतमुक्तम्मात्स्ये** । वसन्तमासमासाद्य तृतीयायां जनार्दने । सौभाग्याय सदा स्त्रीभिः कार्यं पुत्रसुखेप्सुभिः । इयं च **मन्वादिः** । शुक्लपक्षस्थितत्वात्पौर्वाह्णिकी ग्राह्या । पूर्वाह्णे तु सदा ग्राह्याः शुक्लामनुयुगादयः । दैवे कर्मणि पैत्र्येच कृष्णे चैवापराह्णिकाः । इति **गालववचनादिति हेमाद्रिः** । **कालादर्शे** तु पित्र्ये आपराह्णिकमेवोक्तम् । **अत्र च श्राद्धमुक्तं मात्स्ये** । कृते श्राद्धं विधानेन मन्वादिषु युगादिषु । हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेत् । अधिकमासेपीदं कर्त्तव्यम् । मन्वादिकं तैथिकं च कुर्यान्मासद्वयेपि चेति **स्मृतिचन्द्रिकोक्तेः** । अत्र पिण्डदानं नास्ति । विषुवायन संक्रान्ति मन्वादिषु युगादिषु । विहाय पिण्डनिर्वापं सर्वं श्राद्धं समाचरेदिति **कालादर्शोक्तेः** । अकरणे प्रायश्चित्तमुक्तमृग्विधाने । **त्वं भुवः प्रतिमन्त्रं च शतवारं जले जपेत्** । मन्वादयो यदा न्यूनाः कुर्यात्तं नैव चापि यः । इति ।

मन्त्रस्तु—त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः । विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा न किरन्यस्त्वावान् ॥ ऋ० १।४

एवं षण्णवतिश्राद्धान्यपि नित्यानि, तेषामयं संग्रहः—

अमामनुयुगक्रातिधृतिपात महालयाः । अन्वष्टक्यं च पूर्वेद्युः षण्णवत्यस्तथाष्टकेति । **चैत्र शुक्लतृतीयायां मत्स्यजयन्ती** । चैत्रशुक्लपञ्चमीत्यन्ये । आषाढशुक्लैकादशीत्यपरे । इयं तद्भुपासकानां नित्या । अन्येषां तु काम्या ।

चैत्रशुक्लपञ्चमी कल्पादिः । अत्र स्नानदानादि महाफलम् । **चैत्रशुक्लाष्टम्यां भवान्या उत्पत्तिः** । तत्र युग्मवाक्यात्परा । अत्र **भवानीयात्रोक्ता काशीखण्डे** । भवानीं यस्तु पश्येत शुक्लाष्टम्यां मधौ नरः । न जातु शोकं लभते सदानन्दमयो भवेत् । **अत्रैवाशोककलिकाप्राशनमुक्तं हेमाद्रौलैङ्गे** । अशोक कलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ । चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः । **प्राशनमन्त्रस्तु** त्वामशोकवराभीष्टं मधुमाससमुद्भवं । पिबामिशोकसन्तप्तो मामशोकं सदा कुरु । इति । **पृथ्वीचन्द्रोदये-विष्णुः** पुनर्वसु बुधोपेता चैत्रेमासि सिताष्टमी । प्रातस्तु विधिवत्स्नात्वावाजपेय फलं लभेत् । इति ।

चैत्रशुक्लनवमी **रामनवमी** सा मध्याह्नयोगिनी ग्राह्या । उक्तं **चागस्त्य संहितायाम्** । चैत्रशुक्ले तु नवमी पुनर्वसुयुता यदि । सैवमध्याह्न योगेन महापुण्यतमा भवेत् । इति । **तथा**—चैत्रमासे नवम्यां तु जातो रामः स्वयं हरिः । पुनर्वसूक्ष संयुक्ता सा तिथिः सर्वकामदा । केवलापि सदोपोष्या नवमीशब्दसंग्रहादिति । दिनद्वये मध्याह्नव्याप्तौ तदभावे वा पुनर्वसुयुतामपि पूर्वां त्यक्त्वा परैव ग्राह्या **तदुक्तन्तत्रैव**—नवमी चाष्टमी विद्धातु त्याज्या **विष्णुपुराण वचनात्** । प्रातस्त्रिमुहूर्त्ता नवमी दशमीचेत्तस्मिन्नेव दिने समाप्यते तदा स्मार्त्तानामुत्तरदिवसे एकादशी निमित्तोपवासे नवमीव्रताङ्गपारणालोपो माभूदिति, ततः स्मार्त्तैरष्टमीविद्धैवग्राह्या । **वैष्णवैस्तु** परैवेति सूचितमिति बोद्धव्यम् । इदं च व्रतं नित्यं काम्यञ्च । उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम् । तस्मिन्दिने तु कर्त्तव्यं ब्रह्मप्रातिमभीप्सुभिः । **यस्तु**—रामनवम्यां वै भुङ्क्ते मोहाद्विमूढधीः । कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः । **इत्यगस्त्यसंहितोक्तेः** । अत्र मध्याह्ने पूजा, रात्रौ जागरणं, परेद्युः प्रातः पायसहोमः । श्रीरामप्रतिमादानादिकं **हेमाद्रौ** बोद्धव्यम् । इयं च मलमासे न कार्या । सुजन्मप्यजसंस्थाङ्गोपवासः कृतो भवेत् । न कुर्यान्मलमासे तु महादान-

व्रतानि चेति **माधवीये संग्रहवचनात्**। **अर्घ्यमन्त्रस्तु**-दशानन वधार्थाय धर्मसंस्थापनाय च। राक्षसानां विनाशाय दैत्यानां निधनाय च। परित्राणाय साधूनां जातो रामः स्वयं हरिः। गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ। **प्रतिमादानमन्त्रस्तु**-इमां स्वर्णमयीं राम प्रतिमां समलङ्कृताम्। चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवाय ते। श्रीराम प्रीतये दास्ये तुष्टो भवतु राघवः। इति दत्वा विधानेन दद्याद्वै दक्षिणां मुवम्। ब्रह्महत्यादि पापेभ्यो मुच्यते नात्र संशयः। इति।

चैत्रशुक्लैकादश्यां दोलोत्सव उक्तो ब्राह्मे-चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः। आन्दोलनीयो देवेशः सलक्ष्मीको महोत्सवैः। इति।

चैत्रशुक्लद्वादश्यां दमनोत्सवः। द्वादश्यां चैत्रमासस्य शुद्धायां दमनोत्सवः। बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरमिति **रामार्चनचन्द्रिकोक्तेः**। ऊर्जे व्रतं मधौ दोला श्रावणे तन्तुपूजनम्। चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः। **इति तत्रैवपाद्मवचनाच्च**। इदं च शुक्लास्तादावपि कार्यम्। उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम्। ईशानस्य बलिं विष्णोः शयनं परिवर्तनम्। कुर्याच्छुक्लस्य च गुरोर्मौढ्येपीति विनिश्चित इति **गोविन्दार्णवेवृद्धगार्ग्यवचनात्**।

चैत्रशुक्लत्रयोदश्यामनङ्गव्रतम्। तत्र पूर्वा ग्राह्या, त्रयोदशी तिथिः पूर्वसिद्धेति दीपिकोक्तेः।

चैत्रशुक्लचतुर्दशी पूर्वा। निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यतः। अतस्तत्र चतुर्दश्यां सत्यां तत्पूजनं भवेत्। **इति ब्रह्मवैवर्त्तात्**। मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी। सा रात्रिव्यापिनी ग्राह्या नान्या शुक्ला कथञ्चन इति। **हेमाद्रौ बौधायनोक्तेश्च**।

चैत्री पौर्णमासी सौभाग्यनिर्णयात्परैव। अत्र विशेषो **निर्णयामृते विष्णुस्मृतौ**--चैत्रो चित्रायुता चेत्स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोतीति। **तथा ब्राह्मे**। मन्देवार्के गुरौ

वापि वारेष्वेतेषु चैत्रिका । तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्भवेत् । वायवीये-सम्वत्सरकृतार्चायाः साफल्यायाऽरिवलान्सुरान् । दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवम् । इयं मन्वादिरपि । सा च पूर्वाह्णिकी ।

चैत्र कृष्णत्रयोदश्यां वारुणीसंज्ञको योगः । तदुक्तं वाचस्पतिनिबन्धे । शनिवारसमायुक्ता विख्याता वारुणी स्मृता । गङ्गायां यदिलभ्येत कोटिसूर्यग्रहाधिका । शुभयोगसमायुक्ता शनौ शतभिषा यदि । महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् । चैत्रासिते वारुणऋक्षयुक्ता त्रयोदशी सूर्यसुतस्य वारे । योगे शुभे सा महती महत्या गङ्गाजलेऽर्कग्रहकोटितुल्या इति । **त्रिस्थलीसेतौ ब्रह्माण्डपुराणेऽपि ।** वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी । गङ्गायां यदि लभ्येत कोटिसूर्यग्रहैस्समा इति । **कल्पतरौ ब्राह्मे**-मधौ कृष्णत्रयोदश्यां शनौ शतभिषायुते । वारुणीति समाख्याता शुभेति महतीस्मृता । इति ।

चैत्रकृष्णचतुर्दश्यां विशेषः पृथ्वीचन्द्रोदये पुलस्त्यः चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ । न प्रेतत्वमवाप्नोति गङ्गायां तु विशेषत इति । इयं पूर्वा ग्राह्या । कृष्णपक्षस्थितत्वादिति ।

इति श्रीमद्भट्टोजिदीक्षित विरचिते तिथिनिर्णये चैत्रमासः समाप्तः ॥

अथ वैशाखनिर्णयः पृथ्वीचन्द्रोदये ब्राह्मे । तीर्थे चानुदिनं स्नानं तिलैश्च पितृतर्पणम् । दानं धर्मघटादीनां मधुसूदनपूजनम् । माधवेमासि कुर्वीत मधुसूदनतुष्टिदम् । **अत्र वैशाखस्नानम् । तत्र पृथ्वीचन्द्रोदये विष्णुस्मृतिपाद्मयोः ।** तुलामकरमेषेषु प्रातःस्नायी सदा भवेत् । हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति, सौरमास उक्तः । अन्यदपि पक्षद्वयमुक्तं तत्रैव । मधुमासस्य शुक्लायामेकादश्यामुपोषितः । पञ्चदश्यां च भो वीर मेषसंक्रमणेतु वा । वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया । मधुसूदनमभ्यर्च्य कुर्यात्सङ्कल्पपूर्वकम् । तत्र

मन्त्रः । वैशाखं सकलं मासं मेषसंक्रमणेरवेः । प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदन । मधुहन्तुः प्रसादेन ब्राह्मणानामनुग्रहात् । निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहम् । माधवे मेषगे भानौ मुरारे मधुसूदन । प्रातःस्नानेन मे नाथ फलदो भव पापहन् । इति । तीर्थनामपरिज्ञाने तु **तत्रैव स्मर्यते** । न ज्ञायते यदा नाम तस्य तीर्थस्य भो द्विजाः । तत्रेत्युच्चारणं कार्यं विष्णुतीर्थमिदन्त्विति । अत्र त्रिकालं तुलस्याः विष्णुपूजा । अश्वत्थमूले जलदानं चेत्यादि तत्रैवोक्तम् । अशक्तस्तु त्र्यहं स्नायात् । **तदुक्तं पाद्मे** । त्रयोदश्यां चतुर्दश्यां वैशाखे च दिनत्रयम् । अपि सम्यग्विधानेन नारी वा पुरुषोऽपि वा । प्रातः स्नातः सनियमः सर्वपापैः प्रमुच्यते । यदा तु वैशाखो मलमासो भवति तदा काम्यानां तत्र समाप्तिनिषेधात् मासद्वयं स्नानं तन्नियमाश्च कर्त्तव्याः । मासोपवास चान्द्रायणादि तु मलमास एव समापयेत् । **तदुक्तं दीपिकायाम्** । नियतत्रिंशदिनत्वाच्छुभेमास्यारभ्य समापयेन्मलिने मासोपवासव्रतमिति । वैशाख्यां विधिवत्स्नात्वा भोजयेद् ब्राह्मणान् दश । कुसरं सर्वपापेभ्यो मुच्यते नात्र संशयः । इति ।

वैशाखशुक्लतृतीया अक्षयतृतीया । सा पूर्वाह्णव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तौ तु परैवेति **निर्णयामृतादौ स्थितम्** । **इयं युगादिरपि** । **भारते** । या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवः । स्नात्वा हुत्वा च दत्वा च जप्त्वानन्तफलं लभेत् । श्राद्धेऽपि पूर्वाह्णव्यापिनी ग्राह्या । पूर्वाह्णे तु सदा ग्राह्या शुक्ला मनुयुगादयः । दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः । इति **नारदोक्तेः** । **दिवोदासीये गोभिलः** । वैशाखस्यतृतीयां यः पूर्वविद्धां करोति वै । हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथा इति । **स्मृत्यर्थसारे गोविन्दार्णवादिष्वप्येवम्** । तेनेयं पूर्वाह्णव्यापिनी एव । दिनद्वये तथात्वेपि परा । इमामुपक्रम्य—गौरीविनायकोपेता पुण्यकोटिप्रदासदेति **नारदोक्तेः** । उपवासे तु पूर्वा ।

सवैधृतिर्व्यतीपातो युगमन्वादयस्तथा । सन्मुखा उपवासे स्युर्दानादावन्तिमाः स्मृताः । इत्यनन्तभट्टोदाहृतवचनात् । यत्तु निर्णयामृते । अमा श्राद्धे आपराह्णिक्येव ग्राह्या 'द्वेशुक्ले' इत्यादिवचनं विष्णुपूजाविषयकमिति तत्पूर्वोत्तरगोभिलादिवचनविरुद्धम् । कालादर्शोक्तिस्तु—कृष्णपक्षयुगादि विषयेति दिक् ।

अत्र विशेषोहेमाद्रौ भविष्ये । वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च । गङ्गातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः । तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् । यवान्दद्याद्द्विजातिभ्यः प्रयतः प्राशयेद्यवान् । इति । अत्र दानविशेषस्तत्रैव भविष्ये । इमामुपक्रम्य-उदकुम्भान् सकनकान् सान्नान् सर्वरसैः सह । यवगोधूमचणकान्सक्तुदध्योदनं तथा । ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते । इति । देवीपुराणेऽपि-तृतीयायां तु वैशाखे रोहिण्यृक्षे प्रपूज्यतु । उदकुम्भप्रदानेन शिवलोके महीयते । मन्त्रस्तु-एष घर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः । अस्य प्रदानात्तृप्यन्तु पितरोऽपि पितामहाः । गन्धोदकतिलैर्मिश्रं सान्नं कुम्भं फलान्वितम् । पितृभ्यः सम्प्रदास्यामि अक्षय्यमुपतिष्ठतु । इदं च श्राद्धं पिण्डरहितमित्युक्तम् । अत्र रात्रिभोजने प्रायश्चित्तमुक्तमृग्विधाने । रात्रौ भुक्ते वत्सरे तु मन्वादिषु युगादिषु । अभिस्ववृष्टिं मन्त्रं च जपेद्दश न पातकमिति । मन्त्रस्तु—अभि स्व वृष्टिं मदे अस्य युध्यतो रध्वीरिव प्रवणे सस्रुरूतयः । इन्द्रो यद्वज्री धृषमाणो अन्धसाऽभिनद्बलस्य परिधीरिव त्रितः ऋ. १-४ अपरार्के यमः । कृतोपवासाः सलिलं ये युगादिदिनेषु तु । दास्यत्यन्नादिसहितं तेषां लोका महोदया इति । वैशाखे मलमासे सति तत्रैव युगादिः कार्यः । दशहरासु नोत्कर्षः चतुर्ष्वपि युगादिषु । इति हेमाद्रौ ऋष्यशृङ्गवचनात् । अब्दोदकुम्भमन्वादि महालय युगादिष्विति कालादर्शकृतमलमासकृत्येषु परिगणितत्वात् । महालयशब्देनेह मघात्रयोदशी विवक्षितेति माधवः । स्मृतिचन्द्रिकायां तु मासद्वयेऽपि

कर्त्तव्यमित्युक्तम् । "यौगादिकं मासिकं तु श्राद्धं चापरपक्षिकम् । मन्वादिकं तैथिकं तु कुर्यान्मासद्वयेपि च" । इति अपरपक्षः कृष्णपक्षः न तु महालयः । तस्य तत्र निषेधात् । **मदनरत्ने मरीचिः** । प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरम् । मन्वादौ च युगादौ च तन्मासे उभयोरपि । प्रतिवत्सरं क्रियमाणं कल्पादिश्राद्धमिति तत्रैव व्याख्यातम् । अत्र समुद्रस्नानं महाप्रशस्तम् । **तदुक्तं पृथ्वीचन्द्रोदये सौरपुराणे** । युगादौ तु नरः स्नात्वा विधिवल्लवणोदकैः । गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं हि यत् । तत्फलं लभते मर्त्यो भूमिदानस्य च ध्रुवम् । इति । अयं निर्णयः सर्वयुगादिषु बोद्धव्यः । **इयमेव परशुराम जयन्ती** । सा च प्रदोषव्यापिनी ग्राह्या **तदुक्तं भार्गवार्चनचन्द्रिकायां स्कान्दभविष्ययोः** । वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ । निशायाः प्रथमे यामे रामाख्यः समये हरिः । स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंस्थिते । रेणुकायास्तु यो गर्भादवतीर्णो हरिः स्वयम् इति । दिनद्वये तद्व्याप्तावंशतः समव्याप्तौ च परा, अन्यथा पूर्वैव । तदुक्तं **तत्रैव भविष्ये** । शुक्लतृतीया वैशाखे शुद्धोपोष्या दिनद्वये । निशायाः पूर्वयामे चेदुत्तरान्यत्र पूर्विका । इति ।

वैशाखशुक्लसप्तम्यां गङ्गोत्पत्तिः । तदुक्तं पृथ्वीचन्द्रोदये । वैशाखे शुक्लसप्तम्यां जह्नुना जाह्नवी पुरा । क्रोधात्पीता पुनस्त्यक्ता कर्णरन्ध्रातु दक्षिणात् । तां तत्र पूजयेद्देवीं गङ्गां गगनमेखलाम् । इति । **इयं च शिष्टाचारान्मध्याह्नव्यापिनी ग्राह्या** । दिनद्वये तद्व्याप्तावव्याप्तावेकदशव्याप्तौवा पूर्वा ग्राह्या, युग्मवाक्यात् ।

वैशाखशुक्लद्वादश्यां योगविशेषो हेमाद्रौ । पञ्चाननस्थौ गुरुभूमिपुत्रौ मेषे रविः स्याद्यदि शुक्लपक्षे । पाशाभिधाना करभेण युक्ता तिथिर्व्यतीपात इतीह योगः । अस्मिंस्तु गोभूमिहिरण्यवस्त्रदानेन सर्वं परिहाय पापम् । सुरत्वमिन्द्रत्वमनामयत्वं मर्त्याधिपं संलभते मनुष्यः । इति । पञ्चाननः सिंहः । पाशाभिधानातिथिर्द्वादशी करभो हस्तः ।

वैशाखशुक्लचतुर्दशी नृसिंहजयन्ती। सा प्रदोषव्यापिनी ग्राह्या। तदुक्तं हेमाद्रौ नृसिंहपुराणे। वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे। मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम्। वर्षेवर्षे तु कर्त्तव्यं ममसन्तुष्टिकारणम्। इति। दिनद्वये तद्व्याप्तावंशतः समव्याप्तौ च परा। विषमव्याप्तौ त्वधिकव्याप्तिमती। दिनद्वयेत्वव्याप्तौ परा। परादिने गौणकालव्याप्तेः सत्वात् पूर्वदिने च तदभावात। अस्यां च सङ्कल्पपूजाव्रतोपक्रमो मध्याह्न एव कर्त्तव्यः। ततो मध्याह्नवेलायां नद्यादौ विमले जले। इत्युपक्रम्य–परिधाय ततो वासो व्रतकर्म समारभेदिति। **तत्रैवोक्तेः**।

अस्या एव योगविशेषेण प्राशस्त्यम्—तत्रैव स्मर्यते-स्वातीनक्षत्रयोगे च शनिवारे महाव्रतम्। सिद्धियोगस्य संयोगे वणिजे करणे तथा। पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः। तथा–एभिर्योगैर्विनापि स्यात् मद्दिनं पापनाशनम्। तथा–सर्वेषामेव वर्णानामधिकारोस्ति मद्व्रते। विज्ञाय मद्दिनं यस्तु लङ्घयेत्पापकृन्नरः। स याति नरकं घोरं यावच्चन्द्रदिवाकरौ। अतएवेदं नित्यं काम्यमित्याहुः।

वैशाखशुक्लपौर्णमास्यां विशेषः स्मर्यते। **भविष्ये**। वैशाखी कार्तिकी माघी तिथयोऽतीव पूजिताः। स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन इति।

इति श्रीमद्भट्टोजिदीक्षित विरचिते तिथिनिर्णये वैशाखमासः समाप्तः॥

ज्येष्ठशुक्लतृतीयायां रम्माव्रतम्। **तदुक्तं माधवीये भविष्ये**। भद्रे कुरुष्व यत्नेन रम्माख्यं व्रतमुत्तमम्। ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परा इति। सा पूर्वविद्धा ग्राह्या। बृहत्तपा तथा रम्भा सावित्री वटपैतृकी। कृष्णाष्टमी च भूता च कर्त्तव्या सम्मुखी तिथिः। इति स्कान्दोक्तेः।

ज्येष्ठशुक्लदशमी दशहरा। तदुक्तं **हेमाद्रौ ब्राह्मे**। ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता। हरते दश पापानि तस्माद्दशहरा स्मृता। इति। **वाराहेऽपि**–दशमी शुक्लपक्षे तु ज्येष्ठे मासि कुजेऽहनि। अवतीर्णा यतः स्वर्गाद्धस्तार्क्षे च सरिद्वरा। हरते दशपापानि तस्माद्दशहरास्मृता। इति। **स्कान्दे तु दशयोगा उक्ताः**। ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः। व्यतीपाते गरानन्दे कन्या चन्द्रे वृषे रवौ। दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते। इह बुधभौमयोर्विकल्पः। इयं च यत्र योगबाहुल्यं सा ग्राह्या। योगाधिक्ये फलाधिक्यात्। ज्येष्ठे मलमासे सत्यपि तत्रैव दशहरा कार्या न तु शुद्धे। "दशहरासुनोत्कर्षे" इत्युक्तेः। **स्कान्दे**–यां काञ्चित्सरितं प्राप्य दद्यादर्घ्यं तिलोदकैः। मुच्यते दशभिः पापैः समहापातकैरपि इति। अत्र विशेषः **काशीखण्डे**। ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम्। दशाश्वमेधिके स्नात्वा सर्वपापैः प्रमुच्यते। एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः। आ शुक्लपक्षदशमीं प्रातिजन्माघमुत्सृजेत्। **तथा**–लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरा तिथौ। दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशयः। इति।

ज्येष्ठशुक्लैकादशी निर्जला। तत्र निर्जलमुपोष्य विप्रेभ्यो जलकुम्भान् दद्यादिति **निर्णयामृते** उक्तम्।

ज्येष्ठपौर्णमास्यां सावित्री व्रतम्। तदुक्तं **स्कान्द भविष्ययोः**–ज्येष्ठे मासि सिते पक्षे त्रयोदश्यां रजनीमुखे। इत्युपक्रम्य–'व्रतं त्रिरात्रमुद्दिश्य दिवारात्रिं स्थिरा भवेत्'। इत्युक्त्वान्तेप्युपसंहृतम्। ज्येष्ठे मासि सिते पक्षे पूर्णिमायां तथा व्रतम्। चीर्णं पुरा महाभक्त्या कथितं ते मयाऽनघ इति। **दाक्षिणात्याश्चैतदेवाचरन्ति। पाश्चात्यास्तु**–अमावास्यायामाचरन्ति। **तच्चोक्तं निर्णयामृते भविष्ये**–अमायां च तथा ज्येष्ठे वटमूले महासती। त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत्। अशक्तौ तु त्रयोदश्यां नक्तं कुर्याज्जितेन्द्रिया।

अयाचितं चतुर्दश्याममायां समुपोषणम् । **हेमाद्र्यादिभिस्तु**–भाद्रपौर्णमास्यामिदमुक्तम् । **तत्तु नेदानीमाचरन्ति** । अत्र पूर्णिमामावास्ये पूर्वविद्धे ग्राह्ये । भूतविद्धा न कर्त्तव्या अमावास्या च पूर्णिमा । वर्जयित्वा मुनिश्रेष्ठ सावित्रीं व्रतमुत्तमम् । इति–**ब्रह्मवैवर्त्तात्** । यदात्वष्टादशघटिकाचतुर्दशी तदा परैव । पूर्वविद्धैव सावित्रीव्रते पञ्चदशी तिथिः । नाब्धोऽष्टादशभूतस्य स्युश्चेतत्र परेऽहनि । **इति माधवोक्तेः** । अत्र पूर्णिमानुरोधेनैव यथा त्रिरात्रसम्पत्तिर्भवति तथा त्रयोदश्यादिग्राह्यम् । तस्याः प्राधान्यात् । एवममायामपि । अस्यामेव पूर्णिमायां विशेषः स्मर्यते । **आदित्यपुराणे** । ज्येष्ठे मासि तिलान्दद्यात्पूर्णिमायां विशेषतः । अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः । **विष्णुरपि** । ज्यैष्ठी ज्येष्ठायुता चेत्स्यात्तस्यां छत्रोपानत्प्रदानेन नरो नराधिपत्यमाप्नोति । **इयं मन्वादिरपि । सा पौर्वाह्णिकी ग्राह्या । इत्युक्तमपरार्के वामनपुराणे** । उदकुम्भोऽम्बुदानं च तालवृन्तं सचन्दनम् । त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि तु इति ।

इति श्रीमद्भट्टोजिदीक्षित विरचिते तिथिनिर्णये ज्येष्ठमासः समाप्तः ।

अथाषाढः । आषाढशुक्लदशमी पौर्णमासी च **मन्वादिः** । सा च पूर्वाह्णव्यापिनीत्युक्तम् । आषाढशुक्लैकादशी **मत्स्यजयन्ती** । आषाढशुक्लद्वादश्यामनुराधायोगरहितायां पारणं कुर्यात् । **तदुक्तं हेमाद्रौ भविष्ये**–आषाकासितपक्षेषु मैत्रश्रवणरेवती । सङ्गमे न हि भोक्तव्यं द्वादश द्वादशीर्हरेत् । आषाढभाद्रपदकार्तिकशुक्लद्वादशीष्वनुराधाश्रवणरेवतीयोगे पारणं न कुर्यादित्यर्थः । अत्र विशेषो–**विष्णुधर्मे** । मैत्राद्यपदे स्वपितीह विष्णुः पौष्णान्त्यपादेप्रतिबोधमेति । श्रुतेश्चमध्ये परिवर्त्तमेति सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यम् ।

आषाढशुक्लैकादश्यां द्वादश्यां वा विष्णुशयनो-

त्सवः कर्त्तव्यः । उक्तं च हेमाद्रौ ब्राह्मे-एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः । भुजङ्गशयने शेते क्षीरार्णवजले सदा । द्वादश्यां शुक्लपक्षे च प्रस्वापावर्त्तनोत्सवाः । इति तत्रैव । वाराहे—द्वादश्यां सन्धि समये नक्षत्राणामसम्भवे । अभाकासितपक्षेषु शयनावर्त्तनादिकम् इति । अत्रद्वादश्यामिति पारणाहे विवक्षितम् 'पारणाहे पूर्वरात्रे घण्टादीन्वादयन्मुहुः' । इति रामार्चनचन्द्रिकोक्तेः । निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् । पादयोगो यदा न स्याद्दक्षेणापि तदा भवेत् । द्वादश्यामृक्षसंयोगो न कारणमिति वाराहोक्तिः । इदं मलमासे न कार्यम् । ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम् । इति कालादर्शे निषेधात् ।

अत्र चातुर्मास्यव्रतारम्भवक्तो भारते । आषाढस्य सिते पक्षे एकादश्यामुपोषितः । चातुर्मास्यव्रतं कुर्याद्यत्किञ्चिन्नियतो नरः । इति । अस्य नित्यत्वं तत्रैवोक्तम् । वार्षिकांश्चतुरोमासान् वाहयेत्केनचिन्नरः । व्रतेन नोचेदाप्नोतिकिल्बिषं वत्सरोद्भवम् । असम्भवेतुलार्केऽपि कर्त्तव्यं-तत्प्रयत्नतः इति । अस्यारम्भः शुक्लास्तादावपि कार्यः । न शैशवं न मौढ्यं च शुक्रगुर्वोर्न वा तिथेः । खण्डत्वं चिन्तयेदादौ चातुर्मास्यविधौ नरः इति वृद्धगार्ग्योक्तेः । इदं च द्वितीयाद्यारम्भ विषयम् । तथाचाशौचमध्ये द्वितीयारम्भो भवत्येव । अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान् । व्रतमेतन्नरः कृत्वा सर्वपापैः प्रमुच्यते । इति भार्गवार्चनचन्द्रिकायां स्कान्दोक्तेः । आरब्धे सूतकं न स्यादनारब्धे तु सूतकमिति विष्णुवचनाच्च ।

यत्तु—असंक्रान्तं तथा मासं दैवे पित्र्ये च कर्मणि । मलमासमशौचं च वर्जयेन्मतिमान्नरः । इति हेमाद्रौ चातुर्मास्यव्रतप्रकरणे भविष्यवचनम् तत्प्रथमारम्भविषयम् । नच प्रतिवर्षे चातुर्मास्यव्रतप्रयोगाणां भिन्नत्वादाशौचादिपाते द्वितीयप्रयोगोऽपि कथंस्यादितिवाच्यम् । प्रतिवर्षे च यः कुर्यादेवं वै संस्मरन् हरिम् । देहान्तेऽतिप्रदीप्तेन विमानेनार्कवर्चसा ।

मोदते विष्णुलोकेऽसौ यावदाभूतसंप्लवमिति वचनादिति । हेमाद्रौ भविष्ये । एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः । प्रभाषेताग्रतो विष्णोः कृताञ्जलिपुटस्तथा । चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि । इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत । इदं व्रतं मया देव गृहीतं पुरतस्तव । निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव । गृहीतेऽस्मिन व्रते देव पञ्चत्वं यदि मे भवेत् । तदा भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्दन । इति ।

भविष्ये । श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा । दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत् । स्कान्दे । माषमुद्गमसूराश्च चणकाश्च कुलत्थकाः । निष्पावा राजधान्याश्च आढक्यो द्विदलंस्मृतम् तथा—चत्वार्येतानि नित्यानि चतुराश्रमवासिनाम् । प्रथमे मासि कर्त्तव्यं नित्यं शाकव्रतं नरैः । द्वितीये मासि कर्त्तव्यं दधिव्रतमनुत्तमम् । पयोव्रतं तृतीये तु चतुर्थेऽपिनिशामय । द्विदलं बहुबीजं च वृन्ताकं चैव वर्जयेत् । नित्यान्येतानि विप्रेन्द्र व्रतान्याहुर्मनीषिणः । तथा—जम्बीरं राजमाषांश्च मूलकं रक्तमूलकम् । कूष्माण्डञ्चेक्षुदण्डं च चातुर्मास्ये त्यजेद्बुधः । विशेषाद्बदरीं धात्रीं कूष्माण्डं तिन्तिणीं त्यजेत् । जीर्णधात्रीफलं ग्राह्यं कथंचित्कायशोधनमिति । स्कान्दे—वार्षिकांश्चतुरोमासान् प्रसुप्ते वै जनार्दने । मद्यखट्वादिशयनं वर्जयेद्भक्तिमान्नरः । अनृतौ वर्जयेद्भार्यां मासं मधु परौदनम् । पटोलं मूलकं चैव वृन्ताकं च न भक्षयेदिति । शाकशब्दस्तु दशसु रुढः । मूलपत्रकरीराम्रफलकाण्डाधिरुढकाः । त्वक् पुष्पं कवचं चेति शाकं दशविधं स्मृतमित्युक्तेः । अधिरुढमंकुरः । आचारप्रदीपे । वृन्ताकं च कलिङ्गं च बिल्वौदुम्बरभीसटाः । उदरे यस्य जीर्यन्ते तस्य दूरतरो हरिः । भिःसटेति ह्रस्वपाठे दग्धान्नम् । भीसटेति दीर्घपाठे भीसटं श्लेष्मातकमिति धन्वन्तरि निघण्टुः । तथा—निष्पावान् राजमाषांश्च मसूरं सन्धितानि च । वृन्ताकं च कलिङ्गं च सुप्ते देवे विवर्जयेत् । सन्धितानि लवणशाकादीनि । अत्रैव तप्तमुद्राधारणमुक्तम् । रामार्चनचन्द्रिकायाम् । पृथ्वीचन्द्रोदये तु शूद्रादिविषयं तदिति निर्णीतम् ।

आषाढपौर्णमास्यां कोकिलाव्रतम् । उक्तं च हेमाद्रौ भविष्ये । आषाढपौर्णमास्यां तु सन्ध्याकालेषुपस्थिते । सङ्कल्पयेन्मास-मेकं श्रावणे प्रत्यहन्त्वहम् । स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती । भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयाम् । अस्य नक्तव्रतत्वात् सायाह्नव्यापिनी ग्राह्या । अत्रैव व्यासपूजोक्ता । तत्र मध्याह्नव्यापिनी ग्राह्या । दिनद्वये तथात्वे तु परैवेति सन्यासपद्धतावितिं । इत्याषाढः ।

इति श्रीमद्भटोजिदीक्षितविरचिते तिथिनिर्णये आषाढमासः समाप्तः ।

अथ श्रावणः । श्रावणशुक्लतृतीया **कूर्मजयन्ती** । इयमेव **मधुस्रवाख्या** गुर्जरेषु प्रसिद्धा । सा परयुतेति **दिवोदासीये** । श्रावणशुक्लचतुर्थी पूर्वयुता "मातृविद्धोगणेश्वर" इति वचनात् । श्रावण-शुक्लपञ्चमी नागपूजायां परा । **चमत्कारचिन्तामणौ** । पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता । तस्यां तु तुषिता नागा इतरा सचतुर्थिकेति । **मदनरत्नादावप्येवम्** । अत्र विशेषो **हेमाद्रौ भविष्ये** । श्रावणे मासि पञ्चम्यां शुक्लपक्षे नराधिप । द्वारस्योभयतो लेख्या गोमयेन विषोल्वणाः । पूजयेद्विधिवद्वीर दधिदूर्वाङ्कुरैः कुशैः । गन्धपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः । ये तस्यां पूजयन्तीह नागा-न्भक्तिपुरस्सराः । न तेषां सर्पतो वीर भयं भवति कुत्रचित् । इति ।

श्रावणशुक्लद्वादश्यां दधिव्रतम् । तक्रादीनां त्वनिषेधः । तत्र दधिव्यवहाराभावात् । **अत्रैव द्वादश्यां विष्णोःपवित्रारोपणमुक्तं हेमाद्रौ विष्णुरहस्ये** । श्रावणस्य सिते पक्षे कर्कस्थे च दिवाकरे । द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतम् । द्वादश्यां श्रवणे वापि पञ्च-म्यामथवा द्विज । आनुकूल्येषु कर्त्तव्यं पञ्चदश्यामथापिवा । इति । तथा-- **शिवे तु तत्रैव**--कालोत्तरे तन्त्रे—आषाढान्ते चतुर्दश्यां नभस्यनभसो-स्तथा । अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि । इति । अधिवासनं तु

दीपिकायाम् । गच्छेदेहान्तरिते काले पूर्वेद्युर्वाधिवासनमिति। **गौणकालो रामार्चन चन्द्रिकायाम्** । पवित्रारोपणं विघ्नात् श्रावणे न भवेद्यदि । कार्तिक्यवधि शुक्लार्के कर्त्तव्यमिति **नारदः** । हेमरौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः । कुशैश्च काशैः कार्पासैः ब्राह्मण्या कारितैः शुभैः । कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत् । तत्रोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः । सप्तत्या सहितं द्वाभ्यां शताभ्यां मध्यमं स्मृतम्। साशीतिना शतेनैव कनिष्ठं तत्समाचरेत् । साधारण पवित्राणि त्रिभिः सूत्रैः समाचरेत् । उत्तमं तु शतग्रन्थि पञ्चाशद्ग्रन्थि मध्यमम् । कनिष्ठं तु पवित्रं स्यात्षट्त्रिंशद्ग्रन्थिशोभनम् । षड्त्रिंशच्चतुर्विंशद्द्वादशेति च केचन । चतुर्विंशद्द्वादशाष्टावित्येके मुनयो विदुः । **शिवपवित्रं तु तत्रैव शिवागमे** । एकाशीत्यथवा सूत्रैर्विंशता वाष्टयुक्तया । पञ्चाशता वा कर्त्तव्यं तुल्यग्रन्थ्यन्तरालकम् । द्वादशाङ्गुलमानानि व्यासादष्टाङ्गुलानि च। लिङ्गविस्तारमानानि चतुरङ्गुलकानिच इति। तच्च नित्यम् । न करोति विधानेन पवित्रारोपणं तु यः । तस्य साम्वत्सरीपूजा निष्फला मुनिसत्तमाः । तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः । वर्षे वर्षे प्रकर्त्तव्यं पवित्रारोपणं हरेः इति तत्रैवोक्तम् ।

श्रावणशुक्लचतुर्दशी पूर्वयुता । चैत्रशुक्लचतुर्दशीवत् ।

अथोपाकर्म । तच्च वह्वृचैः श्रवणे कार्यम् । दिनद्वये श्रवणे तु उत्तरं ग्राह्यम् । **वृद्धमनुकात्यायनौ** । अर्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं यदा । उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत् । श्रावणशुक्लपंचम्यां हस्ते वा कुर्यात् । इदं कर्कटस्थे भानौ निषिद्धम् । स च निषेधो नर्मदोत्तरभागविषयः । **इति माधवीयेपारिजातादौ स्थितम्** । नर्मदोत्तरभागे तु कर्त्तव्यं सिंहयुक्तके । कर्कटे संस्थिते भानौवुपाकुर्याच्च दक्षिणेति **वचनात्** । **केचित्तु**–सामगानां सिंहस्थे रवावुपाकर्मविधानात्तत्रैवोपसंहारः । चतुर्धाकरणवाक्यस्याग्नेये यथेति वदन्ति । एतच्च शुक्लास्तादावपि कर्त्तव्यम्। प्रथमारम्भस्तु तत्र न भवति। अधिमासे न भवत्येव

सामगानां त्वधिमासेऽपि भवति। एतच्चसामगैरपराह्णेकार्यम्। इतरैः पूर्वाह्णे। याजुषाः पर्वणि कुर्युः। पर्वद्वैधे तु आपस्तम्बैरुत्तरम्। इतरैः पूर्वम्। इदंचौपासनाग्नौ कर्तव्यम्। अप्यध्याप्यैरन्वारब्धं इति सूत्रात्। पक्षे तु लौकिकाग्नौ।

अथाश्वलायनेन श्रवणाकर्मोक्तम्। 'श्रावण्यां पौर्णमास्यां श्रवणाकर्मेति। तत्रास्तमययुग्ग्राह्या।' अस्तमिते स्थालीपाकं श्रपयित्वेति सूत्रात्। **अद्भुतसागरे-नारदः**। मानौ सिंहगते चैव यस्य गौः सम्प्रसूयते। मरणं तस्य निर्दिष्टं षड्भिर्मासैर्नसंशयः। तत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभम्। प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत्। ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः। आहुतीनां घृताक्तानामयुतं जुहुयात्ततः। व्याहृतिभिश्चायं होमः। सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणामिति। अथर्ववेदिनां **गृह्यपरिशिष्टे**—माघे बुधे च महिषी श्रावणे वडवा दिवा। सिंहे गावः प्रसूयन्ते स्वामिनो मृत्युदायकाः। अत्र तदुक्ताऽद्भुताख्या शान्तिः कार्या। श्रावणादि मासचतुष्टयकृष्णपक्षद्वितीयासु-**अशून्यशयनव्रतम्**। तत्र चन्द्रोदयव्यापिनी ग्राह्या। दिनद्वये सत्वे परेति **निर्णयामृते**।

नभः कृष्णतृतीया कज्जली संज्ञा सा परेति **दिवोदासीये**। नभोबहुलचतुर्थी **बहुलाख्या** मध्यदेशे प्रसिद्धा सा सायाह्नव्यापिनी। दिनद्वये तु पूर्वा। अत्र गोपूजा यवान्नाशनं च कार्येति **दिवोदासीये**। नभः कृष्णचतुर्थी **सङ्कटचतुर्थी**। सा चन्द्रोदयव्यापिनी ग्राह्या। नभस्ये बहुले पक्षे चतुर्थ्यां तु विधूदये। गणेशं पूजयित्वा तु चन्द्रायार्घं प्रदापयेत्। इति कथायां पूजाविधानात्। दिनद्वये तद्व्याप्तावव्याप्तौ पूर्वा, मातृविद्धो गणेश्वर इत्युक्तेः। भाद्रपदकृष्णाषष्ठी **हलषष्ठी** सापरयुता ग्राह्या।

अथ जन्माष्टमी। सा च श्रावणकृष्णपूर्णिमान्तपक्षे। भाद्रपदकृष्णजन्माष्टमी व्रतं च नित्यम्। जयन्तीव्रतं नित्यं काम्यं च। यस्मिन् वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा। अन्तर्भूता जयस्यां स्याद्दक्षयोगप्रश-

स्तितः इति माधवः । हेमाद्रिस्तु-जयन्तीव्रतं न भिन्नम् । जयन्तीशब्दो हि रात्रि विशेषवचनः । अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्वरी । मुहूर्तोविजयो नाम यस्मिन् जातो जनार्दन इति ब्रह्माण्डवचनात् । तेन तद्युक्तरोहिण्यां निशीथे राजसत्तम । समजायत गोविन्दो बालरूपी चतुर्भुजः । तस्मातं पूजयेत्तत्रेति वह्निपुराणात् । एवं च रोहिणीयोगाभावेप्यर्द्धरात्रव्यापिन्यष्टमी ग्राह्या । परिदिने सत्रपि नक्षत्रयोगोऽकिञ्चित्करः, बुधवारादिवत् । यत्तु स्कान्दे—उदयेचाष्टमी किञ्चिन्नवमी सकला यदि । लभ्यते बुधसंयुक्ता प्राजापत्यर्क्ष संयुता । अपि वर्षशतेनापि लभ्यते वा न लभ्यते इति, तद्दानादि विषयम् । उपवासाश्रवणात् । उदये चन्द्रोदये इति वा व्याख्येयम् । अर्द्धरात्रे तु योगोयं तारापत्युदये सति, इति विष्णुधर्मोक्तेः । अत्र केचित् । उदयव्यापिनी ग्राह्या कुले तिथिरुपोषणे । निम्बार्को भगवानेष वाञ्छितार्थ प्रदायक इति व्रतं, हेमाद्रौ निम्बसप्तमी व्रते भविष्यवचनान्निम्बादित्यसाम्प्रदायिकानामौदयिकत्वेवेयम् । एवं शिवरात्र्यादिकमपीत्याहुः । तद्वहवोनाद्रियन्ते, प्रकरणेन निम्बसप्तमीव्रते नियन्त्रितस्यान्यत्रगमनायोगादिति दिक् ।

श्रीकृष्णदेवकीवसुदेवयशोदानन्दादिप्रतिमानिर्माणं तत्पूजनादिकं व्रतं हेमाद्रौ स्पष्टम् । अर्घ्यमन्त्रः । जातः कंसवधार्थाय भूभारोत्तारणाय च । पाण्डवानां हितार्थाय कौरवाणां वधाय च । राक्षसानां वधार्थाय धर्मसंस्थापनाय च । गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे ।
चन्द्रार्घ्यमन्त्रौ । क्षीरोदार्णव सम्भूत अत्रिगोत्र समुद्भव । गृहाणार्घ्यं मया दत्तं रोहिण्यासहितः शशिन् ॥ ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते । नमस्ते रोहिणीकान्त अर्घ्यं मे प्रतिगृह्यतामिति । इयं मन्वादिः । आपराह्णिकी ।

श्रावणामावास्यायां कुशग्रहणमुक्तं हेमाद्रौ हारीतेन—मासेनभस्यमावास्या तस्यां दर्भोच्चयो मतः । अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः । इति । नभः श्रावणः दर्शान्तपक्षे । मदनरत्नेतु-

मासे नमस्येऽमावास्या तस्यां दर्भोच्चयो मत इति **मरीचिवाक्यमुदाहृतम्**। इदं च पूर्णिमान्ताभिप्रायेणेति हारीतेन सहैकवाक्यतैव। **केचित्तु**—मरीचिवाक्येऽपि दर्शान्तपक्षमाश्रित्य महालयान्तर्गतपक्षे कुशोच्चयमाहुः।

इति श्रीमद्भट्टोजिदीक्षितविरचिते तिथिनिर्णये श्रावणमासः समाप्तः।

अथ भाद्रपदः। भाद्रपदशुक्लतृतीयायां **हरितालिकाव्रतम्**। तत्र परा ग्राह्या। मुहूर्त्तमात्रसत्वेपि दिने गौरीव्रतं परेति **माधवोक्तेः**। हरितालिकात्वपुरस्कारेणापि परविद्धग्रहणवचनानान्दिवोदासीये उदाहृतत्वाच्च। **इयं मन्वादिः**। पूर्वाह्णिकी।

भाद्रपदशुक्लचतुर्थी वरदचतुर्थी, सा मध्याह्नव्यापिनी ग्राह्या। दिनद्वये मध्याह्नव्याप्तावव्याप्तौ **पूर्वैव**, परेद्युरेवमध्याह्नव्याप्तौ विघ्नस्वसोत्तरा। अन्यथा पूर्वविद्धैव मातृयोगप्रशस्तितः। इति **माधवोक्तेः**। इयं च रविभौमयोरतिप्रशस्ता। भाद्रशुक्लचतुर्थी या भौमेनार्केण वा युता। महती साऽत्र विघ्नेशमर्चित्वेष्टं फलमेत्र इति **निर्णयामृते वाराहोक्तेः**। अत्र चन्द्रदर्शनं निषिद्धम्। **तथा चापरार्के मार्कण्डेयः**। सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चन्द्रदर्शनम्। मिथ्याभिदूषितं कुर्यात्तस्मात्पश्येन्न तं सदा, **पराशरः**। कन्यादित्ये चतुर्थ्यां तु शुक्ले चन्द्रस्य दर्शनम्। मिथ्याभिर्दूषितं कुर्यात्तस्मात्पश्येन्न तं तदा। तथा पद्मानने भानौ पक्षयोरुभयोरपि। तद्दोषशान्तये सिंहः प्रसेनमिति वै पठेत्। **श्लोकस्तु—विष्णुपुराणे**। सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः। सुकुमारक मारोदीस्तवह्येषः स्यमन्तकः। इति। तेन चतुर्थ्यामुदितस्यैव दर्शननिषेधः।

भाद्रपदशुक्लपञ्चमी—ऋषिपञ्चमी। सा हेमाद्रिमते परा। सितापरयुतास्यात्पञ्चमीति **दीपिकोक्तेः**। माधवमते तु पूर्वा। सर्वत्र

पञ्चमी पूर्वेत्युक्तेः । अत्र ऋषिपूजनं तु मध्याह्नव्यापिन्यां प्रशस्तम् । पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनीतिथिरिति **माधवीये हारीतोक्तेः** । दिनद्वये मध्याह्नव्याप्तावव्याप्तौ वा पूर्वैव, युग्मवाक्याच्च । अत्र कर्त्तव्यं **निर्णयामृते** स्पष्टम् ।

भाद्रपदशुक्लषष्ठी वाराहजयन्ती । सा पञ्चमीयुता ग्राह्या ।

भाद्रपदशुक्लाष्टमी दूर्वाष्टमी । सा पूर्वा । शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत् । दूर्वाष्टमी तु विज्ञेया नोत्तरा सा-विधीयते । इति **पुराणसमुच्चयोक्तेः** । **यत्तु**—मुहूर्तैरौहिणेष्टम्यां पूर्वा वा यदि वा परा । दूर्वाष्टमी तु सा कार्या ज्येष्ठां मूलं च वर्जयेत् । इत्युत्तरार्द्धस्याग्राह्यत्ववचनं तत् पूर्वदिने ज्येष्ठादियोगे द्रष्टव्यम् । दूर्वा-ष्टमी सदा त्याज्या ज्येष्ठामूलर्क्षसंयुता । **तथा**—ऐन्द्रर्क्षे पूजिता दूर्वा हन्त्य-पत्यानि नान्यथा । भर्त्तुरायुर्हरा मूले तस्मात्तां परिवर्जयेदिति निषेधादिति **हेमाद्रौस्थितम्** । इदं चागस्त्योदये कन्यार्के च न कार्यम् । शुक्ले भाद्रपदेमासि दूर्वा सञ्ज्ञा तु साष्टमी । सिंहार्के एव कर्त्तव्या न कन्यार्के कदाचन । सिंहस्थेसोत्तमा सूर्ये उदिते मुनिसत्तम । इति **मदनरत्ने स्कान्दोक्तेः** । नागस्त्य उदिते जातु पूजयेदमृतोद्भवाम् । वैधव्यं पुत्र-शोकं च दशवर्षाणि पञ्चचेति तत्रैव दोषोक्तेश्च । इदं च व्रतं स्त्रीणां नित्यम् । या न पूजयते दूर्वा मोहादिह यथाविधि । त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः । इति **पुराणसमुच्चयात्** । यदा ज्येष्ठादिकं विनाष्टमी न लभ्यते तदा तत्रैवोक्तम् । कर्त्तव्या चैकभक्तेन ज्येष्ठामूलं यदा भवेत् । दूर्वामभ्यर्च्ययेद्भक्त्या न बन्ध्यं दिवसं नयेदिति । अत्र **विधिर्मदनरत्ने भविष्ये** । शुचौ देशे प्रजातायां दूर्वायां ब्राह्मणोत्तम । स्थाप्य लिङ्गं ततो गन्धैः पुष्पैर्धूपैस्समर्चयेत् । दध्यक्षतैर्द्विज-श्रेष्ठ अर्घं दद्यात् त्रिलोचने । दूर्वाशमीभ्यां विधिवत्पूजयेच्छ्रद्धयान्वितः । **मन्त्रस्तु**—त्वं दूर्वेऽमृतजन्मासि वन्दितासि सुरासुरैः । सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव । यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले । तथा

ममापि सन्तानं देहि त्वमजरामरमिति । अत्रानग्निपक्वं भक्षयेत् । अनग्निपक्वमश्नीयादन्नं दधि फलं तथा । अक्षारलवणं ब्रह्मन्नाश्नीयादिति मे मतिः । इति तत्रैव भविष्योक्तेः ।

अत्रैव ज्येष्ठा पूजोक्ता माधवीये स्कान्दे । मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते । यस्मिन्कस्मिन्दिनेकुर्याज्ज्येष्ठायाः परिपूजनमिति । इयं ज्येष्ठावशेन पूर्वा परा वा ग्राह्या । दिनद्वययोगेऽपि परा । पूर्वेह्नि रात्रियोगे पूर्वैव । नवम्या सह कार्यास्यादष्टमी नात्र संशयः । मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुता । रात्रिर्यस्मिन् दिने तत्र ज्येष्ठायाः परिपूजनमिति तत्रैवोक्तेः । अस्यापवादः । यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणु । तस्मिन् हविष्यं पूजां च न्यूनत्वे पूर्ववासर इति । इयं च (केवल) तिथौ केवलनक्षत्रे चोक्तं माधवीये । प्रत्याब्दिकं तिथावुक्तं तज्ज्येष्ठादैवतं व्रतम् । प्रतिज्येष्ठाव्रतं यच्च विहितं केवलं शुभे । तिथावेवाचरेदाद्यं द्वितीयं केवलर्क्षक इति । दाक्षिणात्यास्तु—ऋक्ष एव कुर्वन्ति । तथा—मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत् । मूले विसर्जयेद्देवीं त्रिदिनं मन्त्रस्तु—ज्येष्ठायै ते नमस्तुभ्यं ज्येष्ठायै ते नमोनमः । शिवायै ते नमस्तुभ्यं शाङ्कर्यै ते नमोनमः । भाद्रशुक्ल द्वादश्यां श्रवणयोगरहितायां पारणं कुर्यात् । आभाकासितपक्षेष्विति दिवोदासोदाहृतवचनात् । उपोष्यैकादशीम्मोहात्पारणं श्रवणे यदि । करोति हन्ति तत्पुण्यं द्वादशद्वादशाभवम् । इति स्कान्दात् । अस्यैव तत्र प्रतिप्रसवः । विशेषेण महीपाल श्रवणं वर्द्धते यदि । तिथिक्षये न भोक्तव्यं द्वादशीं लङ्घयेन्नहि । इति । इह च श्रवणर्क्षं त्रेधा विभज्य मध्यमर्विंशतिघटिकायोगं त्यक्त्वा पारणं कुर्यात् । तदुक्तं विष्णुधर्मे—श्रुतेश्चमध्ये परिवर्त्तमेति सुप्तिप्रबोधपरिवर्तनमेववर्ज्यम् । इति । केचित्तुर्धा विभज्य मध्यमपादद्वयं वर्ज्यमित्याहुः । अत्रैव विष्णुपरिवर्तनोत्सवं कुर्यात् । अत्रैव शक्रध्वजोत्थापनमुक्तम् । अपरार्के गर्गेण—द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदे तथा । शक्रमुत्थापयेद्राजन् विश्व-

श्रवणवासरे । इयमेव **श्रवणद्वादशी** । तत्रैकादश्यां द्वादशीश्रवणयोगे सैवोपोष्या, **विष्णुशृङ्खलयोग विशेषात्** । एकादश्यां श्रवणयोगाभावेऽपि तद्दिनावच्छेदेन श्रवणस्पृष्टद्वादशीयोगादेव **विष्णुशृङ्खलमिति हेमाद्रिमतम्** । **निर्णयामृते तु**—श्रवणस्यैकादशीद्वादशीभ्यां योगे एव विष्णुशृङ्खलं नान्यथेति । यदा निशीथानन्तरं सूर्योदयावधि द्विकलामात्रमपि श्रवणर्क्षं तदापि पूर्वैव । **दिवोदासीये तु** रात्रेः प्रथमयामे श्रवणयोगे पूर्वा । अन्यथोत्तरेत्युक्तम् । इयं बुधवासरेऽतिप्रशस्ता । यदात्वेकादश्येव श्रवणयुता, न द्वादशी, तदा एकादश्यामेव व्रतं भवति । यदा द्वादश्येवर्क्षयुता तदा शक्तः उभयत्रोपवसेत् । अशक्तस्तु—एकादश्यां गौणोपवासं कृत्वा द्वादशीमुपवसेत् । यदा ऋक्षस्पृष्टापि द्वादशी न, तदा **मदनरत्ने**—द्वादशीश्रवणस्पृष्टा कृच्छ्रपुण्यतमातिथिः । न तु सा तेन संयुक्ता तावत्येव प्रशस्यते । इदं च व्रतं काम्यमिति **गौडाः** । नित्यमिति **दाक्षिणात्याः** । पारणं तूभयान्ते अन्यतरान्ते वा कुर्यात । **भाद्रपदे श्रवणैकादश्यां मध्याह्ने वामनावतारः** । तत्र वामनपूजा प्रतिमादानादिकं व्रतं **हेमाद्रौ** स्थितम् । श्रवणयुतशुद्धैकादश्यालाभे तु दशमीविद्धापि श्रवणयुता ग्राह्या । तथा च **मदनरत्ने वह्निपुराणे**—दशम्यैकाकादशी यत्र सा नोपोष्या भवेत्तिथिः । श्रवणेन तु संयुक्ता सोपोष्या सर्वकामदेति । अस्यां द्वादश्यां दुग्धव्रतसङ्कल्पः । दुग्धव्रते तु पायसादिकं वर्ज्यम् । दधिघृतादयस्तद्विकारा ग्राह्या । नन्वेवं सन्धिन्यादि क्षीरनिषेधेऽपि दध्यादिग्राह्यं स्यादिति चेत्तत्र वाचनिक निषेधसत्वात् । तदाहापरार्के—**शङ्खः** । क्षीराणियान्यभक्ष्याणि तद्विकाराशने बुधः । सप्तरात्रव्रतं कुर्यात्प्रयत्नेन समाहितः । व्रतङ्गोमूत्रयावकम् ।

भाद्रपदशुक्लचतुर्दश्यामनन्तव्रतम् । तत्र द्विमुहूर्त्तव्याप्तौदयिकी ग्राह्येति **माधवः** । **दिवोदासीये तु**—मध्याह्ने भोज्यवेलायामिति कथायां श्रवणात् मध्याह्नव्यापिनी ग्राह्येत्युक्तम् ।

सिंहगे सूर्ये एकविंशतिदिनोपरि **अगस्त्योदयः** । उदेति

याम्यां हरिसंक्रमाद्वेरेकाधिके विंशतिमेऽगस्त्यः । इति **दिवोदासोदाहृत** वचनात् । तत्र काशपुष्पमयीं अगस्त्यप्रतिमां कृत्वा तत्पूजादिफलकम् । "अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः । उभौवर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम" इति मन्त्रेणार्घ्यंदद्यादित्यादित्रतं हेमाद्रौ स्पष्टम् ।

भाद्रपदपौर्णमास्यां प्रपितामहात्परान् त्रीनुद्दिश्य श्राद्धं कर्तव्यम् । **तदुक्तं हेमाद्रौब्राह्ममार्कण्डेययोः** । नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ । पौर्णमास्यां तु कर्त्तव्यं वाराहवचनं यथा इति । नान्दीमुखत्वं चोक्तम्–तत्रैव–पिता पितामहश्चैव तथैव प्रपितामहः । त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः । तेभ्यः पूर्वतरा ये च प्रजावन्तः सुखैधिताः । ते तु नान्दीमुखानान्दी–समृद्धिरिति कथ्यते । एतच्च नित्यम् । प्रत्यब्दमित्युक्तेः । अत्र मातामहा अपि कार्याः । पितरो यत्र पूज्यन्ते तत्र मातामहा अपीति **धौम्योक्तेः** । पितृशब्दस्य पितृभावापन्नमात्रपरत्वात् । जनकपरत्वे बहुवचनासामञ्जस्यात् । आब्दिके तु वचनान्निवृत्तिः ।

इति श्रीमद्भट्टोजिदीक्षित विरचिते तिथिनिर्णये भाद्रपदमासः समाप्तः

अथ महालयः । पृथ्वीचन्द्रोदये वृद्धमनुः । आषाढ़ीमवधिं कृत्वा पञ्चमं पक्षमाश्रिताः । काङ्क्षन्ति पितरः क्लिष्टा अन्नमप्यन्वहं जलम् ॥ **ब्रह्माण्डमार्कण्डेययोः** । कन्यागते सवितरि दिनानि दश पञ्च च । पार्वणेनैव विधिना श्राद्धं तत्र विधीयते । **हेमाद्रौ** । कन्यागते सवितरि यान्यहानि तु षोडश । क्रतुभिस्तानि तुल्यानि देवो नारायणोऽब्रवीत् । इत्युदाहृत षोडशत्वं त्रेधा व्याख्यातम् । तिथिवृद्ध्या पक्षस्य षोडश दिनात्मकत्वे श्राद्धवृद्ध्यर्थमित्येकः पक्षः। भाद्रपक्षपूर्णिमया सहेति द्वितीयः। आश्विनशुक्लप्रतिपदा सहेति तृतीयः । इह पञ्चपक्षाः । पक्ष पर्यन्तः १ पञ्च-

म्यादिः २ अष्टम्यादिः ३ दशम्यादिः ४ एकस्मिन् दिने वा श्राद्धमिति १ तथा च **गौतमः** । **अथापरपक्षे श्राद्धं** पितृभ्यो दद्यात् । पञ्चम्यादिः । दर्शान्तम् । अष्टम्यादिः । दशम्यादिः । एकस्मिंश्चेति । **हेमाद्रौ नागरखण्डे** । आषाढ्याः पञ्चमेपक्षे कन्यासंस्थे दिवाकरे । यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे । तस्य सम्वत्सरं यावत्सन्तुष्टाः पितरो ध्रुवम् ।

सकृन्महालये वर्ज्यतिथ्यादिकं **पृथ्वीचन्द्रोदये प्रयोगपारिजातावुक्तम् । तत्र वशिष्ठः** । नन्दायां मार्गवदिने चतुर्दश्यां त्रिजन्मसु । एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् । जन्मभं तत्पूर्वोत्तरे च त्रिजन्मानि । **अस्यापवादो हेमाद्रौ** । अमापाते भरण्यां च द्वादश्यां पक्ष मध्यके । तथा तिथिं च नक्षत्रं वारं च न विचारयेदिति **पराशरमाधवीये मदनपारिजातादिष्वप्येवम् । निर्णयदीपिकायां तु**–पितृमृताहेऽपि सर्वनिषेधापवाद उक्तः । आषाढ्याः पञ्चमेपक्षे कन्या संस्थे दिवाकरे । मृताहनि पितुर्योवै श्राद्धं दास्यति मानवः । तस्य सम्वत्सरं यावत्सन्तुष्टाः पितरोध्रुवमिति **नागरखण्डोक्तेः** । या तिथिर्यस्य मासस्य मृताहे तु प्रवर्त्तते । सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नत इति **कात्यायनोक्तेश्च । अत्रिः** । महालये क्षयाहे च दर्शे पुत्रस्य जन्मनि । तीर्थे च निर्वपेत्पिण्डान् रविवारादिकेष्वपि । **कात्यायनः** । अशक्तः पक्षमध्ये तु करोत्येकदिने तथा । निषिद्धेष्वपि दिने कुर्यात्पिण्डदानं यथाविधि ।

यत्तु स्मृत्यर्थसारे । विवाहव्रतचूडासु वर्षमर्द्धं तदर्धकम् । पिण्डदानं मृदास्नानं न कुर्यात्तिलतर्पणम् । **अस्यापवादमाह दिवोदासीये बृहस्पतिः** । तीर्थे सम्वत्सरे प्रेते पितृयागे महालये । पिण्डदानं प्रकुर्वीत युगादि भरणी मघे । महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि । कृतोद्वाहोपि कुर्वीत पिण्डनिर्वपणं सदा । इति ।

सन्यासिनां तु द्वादश्यां श्राद्धं कार्यम् । यतीनां च

वनस्थानां वैष्णवानां विशेषतः । द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः । इति **पृथ्वीचन्द्रोदये सङ्ग्रहोक्तेः** । इदं च श्राद्धमन्नेनैव कर्त्तव्यम् । मृताहं च सपिण्डं च गयाश्राद्धं महालयम् । आपन्नोपि न कुर्वीत श्राद्धमामेन कर्हिचित । इति **स्मृतिदर्पणे गालवोक्तेः** ।

अथात्र देवताः । **सङ्ग्रहे**—तात्राम्बात्रितयं सपत्नजननी मातामहादित्रयं सखि स्त्रीतनयादि तातजननीस्वभ्रातरस्तत् स्त्रियः । तात्राम्बात्मभगिन्यपत्यधवयुक् जायापिता सद्गुरुः शिष्यात्राः पितरो महालयविधौ तीर्थे तथा तर्पणे । **अस्यार्थः** । तातत्रयी पितृत्रयी मातृत्रयी च । अत्र विशेषः—**स्मृतिदर्पणे गालवः** । अनेका मातरो यस्य श्राद्धे चापरपरपक्षिके । अर्घ्यदानं पृथक्कुर्यात् पिण्डमेकं तु निर्वपेत् । जीवन्मातृकस्तु सापत्नमातुरेकोद्दिष्टं कुर्यान्न पार्वणम् । सखीति मातामहादित्रयं सपत्नीकमित्यर्थः । तथा च नवदैवत्यम् । उक्तञ्च-**हेमाद्रौ**—महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च । नवदैवतमेवेष्टं शेषं षाट्पौरुषं विदुः ।

विभवे सति तु मातामहादीनां पृथक्कार्यम् । महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च । ज्ञेयं द्वादशदैवत्यं तीर्थे प्रौष्ठे मघासु च । इति **निगमोक्तेः** । तातभ्राता पितृव्यः, जननीभ्राता मातुलः, तत् स्त्रियः पितृव्यस्त्रीमातुलानीभ्रातृजायाः । पितृष्वसा मातृष्वसा भगिन्योऽपत्यमर्तृयुक्ताः तेन सापत्याये सधवाये इति प्रयोगो ज्ञेयः । एतासु सतीषु न तद्भ्रात्रादेर्दानं, द्वारलोपात् । जायापिता श्वशुरः । अत्र श्वश्रूरपि बोध्या तथा च हेमाद्रौ । उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः । श्वशुरभ्रातृतत्पुत्र पुत्रर्त्विक्शिष्यपोषकाः । भगिनीस्वामिदुहितृजामातृभगिनीसुताः । पितरौ पितृपत्नीनां पितुर्मातुश्च या स्वसा । सखिद्रव्यदशिष्याद्यास्तीर्थे चैव महालये । एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः । इति । अत्र क्रमान्यत्वेप्याचारादव्यवस्था । अशक्तौ तु **चतुर्विंशतिमते** । एकस्मिन् ब्राह्मणे सर्वानाचार्यादीन् प्रपूजयेत् । दश द्वादश वा पिण्डान् दद्यादकरणं न तु ।

विधवायास्तु—विशेषः **स्मृतिसंग्रहे** । चत्वारि पार्वणानीह

विधवायाः सदैव हि । स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च । ततो मातामहानां च श्राद्धदानमुपक्रमेत् । तथा-श्वश्रूणां च विशेषेण मातामह्यास्तथैवचेति । अशक्तौ तु—स्मृतिरत्नावल्याम् । स्वभर्तृप्रभृति त्रिभ्यः स्वपितृभ्यस्तथैव च । विधवा कारयेच्छ्राद्धं यथाकालमतन्द्रिता । विधवा स्वयं संङ्कल्पं कृत्वान्यद्ब्राह्मणद्वारा कारयेदित्युक्तं प्रयोगपारिजाते ।

अत्रैकपाको वैश्वदेवतन्त्रं पिण्डं बर्हिश्चैकमिति स्मृत्यर्थसारे । अत्रैकोदिष्टेषु पाणिहोमः।पिण्डाश्च द्विजान्तिक इत्याचार्याः । अत्र धुरिलोचनौ वैश्वेदेवौ । प्रतिदिनं च प्रयोगभेदाद् दक्षिणाभेदः । प्रयोगैक्यादन्ते एव वा दक्षिणेति हेमाद्रौ स्थितम् । एतच्च सन्यस्तपितृकादिना जीवत्पितृकेणापि कार्यम् । वृद्धौ तीर्थे च सन्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः इति कात्यायनोक्तेः । यत्तु कौण्डिन्यः । दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकम् । न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव च इति । तत्सन्यस्तपितृकाद्यन्यपरम् । काम्यश्राद्धपरं वा । एतच्च जीवत्पितृकेण पिण्डरहितं कार्यम् । मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः । न जीवत्पितृकः कुर्याद्दुर्विणीपतिरेव चेति दक्षोक्तेः । अन्वष्टक्यमातृवार्षिकादौ तु वचनाद्भवति । तथा च-छागलेयः । पिण्डो यत्र निवर्तेत मघादिषु कथञ्चन । साङ्गरूपं तु तदा कार्यं नियमाद्ब्रह्मचारिभिः ।

अत्र श्राद्धाङ्गतर्पणं पक्षश्राद्धं प्रतिदिनं श्राद्धोत्तरम् । सकृन्महालये तु परेह्नि कार्यम् । तदुक्तं नारदीये । पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने । सकृन्महालये चैव परेऽह्नि तिलोदकम् । इति ।

यत्तु संग्रहे—पक्षश्राद्धेहिरण्येचपरेह्नितिलोदकमिति तत् सकृन्महालयाविषयम् । प्रयोगपारिजाते गर्गः । कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत् । पितॄणां प्रत्यहं कार्यं निषिद्धाहेपि तर्पणम् ॥

इदं नित्यं काम्यं च । एतच्च मलमासे न कार्यम् । पित्रोर्मरणे प्रथमाब्दे तु कृताकृतमिति त्रिस्थलीसेतौ ।

अत्र भरण्यां श्राद्धमतिप्रशस्तम् । तदुक्तं मात्स्ये । भरणी पितृपक्षे तु महती परिकीर्तिता । तस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत् । पृथ्वीचन्द्रोदये-नभस्यापरपक्षस्य द्वितीया यदि याम्यभे । तृतीया चाग्नितारामिः सहिता प्रीतिदा पितुः । अत्र प्राजापत्यर्क्षे। अस्मिन् पक्षे कपिलाषष्ठी-तदुक्तं वाराहे—नभस्य कृष्णपक्षे तु रोहिणीपातभूसुतैः । युक्ता षष्ठी पुराणज्ञैः कपिला परिकीर्तिता ॥ अतोपवासनियमैर्भास्करं तत्र पूजयेत् । कपिलां च द्विजाग्र्यायदत्वा क्रतुफलं लभेत् ।

अत्रैव हस्तार्के फलातिशय इति निर्णयामृते पुराणसमुच्चये च । भाद्रेमास्यसिते पक्षे भानौ चैव करे स्थिते । पाते कुजे च रोहिण्यां सा षष्ठी कपिला भवेत् । संयोगे तु चतुर्णां तु निर्दिष्टा परमेष्ठिना इति ।

इयमेव चन्द्रषष्ठी । सा पूर्वयुता ग्राह्या । तदुक्तं भविष्ये । तद्वद्भाद्रपदे मासि षष्ठ्यां पक्षे सितेतरे । चन्द्रषष्ठीव्रतं कुर्यात्पूर्वविद्धः प्रशस्यते । तथा-चन्द्रोदये यदा षष्ठी पूर्वाह्णेचापरेऽहनि । चन्द्रषष्ठ्यासिते पक्षे सैवोपोष्या प्रयत्नतः । इति । तस्माच्चन्द्रोदयव्यापिनी पूर्वा ग्राह्या । दिनद्वये चन्द्रोदयसत्त्वासत्त्वे पूर्वा । इति ।

अत्राष्टम्यामाश्वलायनेन मघावर्षसंज्ञं श्राद्धमुक्तम् । "एतेन माघ्यावर्षं प्रौष्ठपद्याऽपरपक्षे" इति । इदं च सप्तम्यादिषु त्रिष्वहःसु कार्यमिति नारायणवृत्तिः । हरदत्तस्तु-मघायुक्तवर्षासु भवं त्रयोदशी श्राद्धमिति व्याचख्यौ ।

अत्रैवाष्टम्यां महालक्ष्मीव्रतम् । तत्र चन्द्रोदयव्यापिनी ग्राह्या, तत्रैव-पूजाद्युक्तेः । परदिने चन्द्रोदयादूर्ध्वं त्रिमुहूर्त्तापि सा पूज्या । परतश्चोर्द्धगामिनीति मदनरत्ने सङ्ग्रहोक्तेः । अर्धरात्रमतिक्रम्य वर्तते योत्तरातिथिः । तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं सदेति वचनात् ।

अथ नवम्यामन्वष्टकाश्राद्धम् । तत्र कात्यायनः । अन्वष्टकासु नवभिः पिण्डैः श्राद्धमुदाहृतम् । पित्रादि मातृमध्यं च ततो

मातामहान्तकम्–पृथ्वीचन्द्रोदये ब्रह्माण्डे । पितॄणां प्रथमं दद्यान्मातॄणां तदनन्तरम् । ततो मातामहानां च अन्वष्टक्ये क्रमः स्मृतः । **श्राद्धहेमाद्रौ छागलेयः** । केवलास्तु क्षये कार्या वृद्धावादौ प्रकीर्तिताः । अन्वष्टकासु मध्यस्था नान्त्याः कार्यास्तु मातरः । **दीपिकायां** तु—मातृश्राद्धमादौ कार्यमित्युक्तम् । तथा च **निर्णयामृते मैत्रायणीये** आन्वष्टक्यं गयाप्राप्तौ सत्यां यच्च मृतेऽहनि । मातुःश्राद्धं सुतःकुर्यात्पितर्यपि च जीवति । यद्यपि जीवत्पितृकस्य पञ्चान्वष्टका अवश्यंकर्त्तव्यास्तथाप्यशक्तस्येयमावश्यकी । अत्र स्वमातरि जीवन्त्यामपि सपत्नमातृभ्यो दद्यात् । सर्वासामेव मातॄणां श्राद्धं कन्यागते रवौ । नवम्यां हि प्रदातव्यं ब्रह्मलब्धवरा यतः । इति **सुतौक्तौ** सर्वासां नाम कथनात् । अत्र सर्वासां नामनिर्देशेनैकोब्राह्मणोऽर्घ्यः पिण्डश्च । नामैक्ये तु द्विवचनादि प्रयोग इति **नारायणवृत्तौ** । अत्र भर्तृमरणोत्तरं पूर्वमृतमातृश्राद्धं न कार्यमिति मन्वाना केचित्पठन्ति । श्राद्धं नवम्यां कुर्यात्तन्मृते भर्तरि लुप्यत इति । तन्निर्मूलमिति प्रामाणिकाः । इदं च जीवत्पितृकेणापि सपिण्डं कार्यम् तदुक्तं **हेमाद्रौ–विष्णुधर्मे** । अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं तथैव चेत्युपक्रम्य पिण्डनिर्वपणं कार्यमित्युक्तत्वात् । इहातिदेशादेव पिण्डदाने प्राप्ते जीवत्पितृकत्व गर्भिणीपतित्वादिप्रयुक्तनिषेधादिस्थले प्रतिप्रसवार्थं तदुक्तिः । अत्र सुवासिनी भोजनमुक्तं **मार्कण्डेयपुराणे** । मातुः श्राद्धे तु सम्प्राप्ते ब्राह्मणैः सहभोजनम् । सुवासिन्यै प्रदातव्यमिति शातातपोऽब्रवीत् । भर्तुरग्रे मृता नारी सह दाहेन वा मृता । तस्याः स्थाने नियुञ्जीत विप्रैः सह सुवासिनीम् ॥

तथैव **मदालसावाक्यम्**–स्त्रीश्राद्धे पुत्रदेयाः स्युरलङ्काराश्चयोषिते । मञ्जीरमेखलादामकर्णिकाकङ्कणादयः । इति ।

अत्रैव च **त्रयोदश्यां श्राद्धे** महाफलम् । मघायुक्तायां तु अतीव प्रशस्तम् एतच्चाविभक्तैरपि पृथक्कार्यम् । तथाच **हेमाद्रौ**–विभक्ता वाऽविभक्ता वा कुर्युः श्राद्धं पृथक् सुताः । मघासु च ततोऽन्यत्र नाधिकारः

पृथग्विनेति। **अपरार्के वायवीये**। हंसे करस्थिते या तु मघायुक्ता त्रयोदशी। तिथिर्वैवस्वती नाम सा छायाकुञ्जरस्य तु। अत्र पिण्डदानं नास्ति। इदञ्च मलमासेऽपि कार्यम्। मघात्रयोदशीश्राद्धं प्रत्युपस्थिति हेतुकम्। अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचे इति **काठकगृह्योक्तेः**। इयं **युगादिरपि**। अत्र मघात्रयोदशी महालययुगादि श्राद्धानां तन्त्रेण प्रयोग

अथ चतुर्दशी। तत्रापमृत्युहतानां श्राद्धम्। एतच्च दैवयुक्तमेकोद्दिष्टमित्युक्तं **प्रयोगपारिजाते**—प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः। दैवयुक्तं तु तच्छ्राद्धं पितॄणामक्षयं भवेत्। तथा—तच्छ्राद्धं दैवहीनंचेत्पुत्रदारधनक्षयः। एकोद्दिष्टं दैवयुक्तमित्येवं मनुरब्रवीत्। पितामहोपि शस्त्रहतश्चेदेकोद्दिष्टद्वयं कार्यम्।

यत्तु—देवस्वामिनोक्तं त्रिष्वपि शस्त्रहतेषु पृथगेकोद्दिष्टत्रयं कार्यम्। नतु पार्वणमाहात्म्यवचनाभावात्। तदन्ये नानुमन्यन्ते।

पित्रादयस्त्रयो यस्य शस्त्रघातादिभिर्हताः।
सम्भूते पार्वणं कुर्यात् आब्दिकानि पृथक् पृथक्॥

इति बृहत्पराशरोक्तेः।

एकस्मिन् वा द्वयोर्वापि विद्युच्छस्त्रादिभिर्हते।
एकोद्दिष्टद्वयं कुर्यात् त्रयाणां दर्शवद् भवेत्॥

इति पृथ्वीचन्द्रोदये वचनाच्च। अपरार्के हेमाद्रौ चैवम्। यस्त्वत्रैव शस्त्रादिना हतस्तस्य वार्षिकेणैवास्य प्रसङ्गसिद्धिर्न पृथगनुष्ठानमिति **पृथ्वीचन्द्रोदये**। अत्र श्राद्धाकरणे तु दिनान्तरे पार्वणमेव कार्यमिति तत्रैव स्थितम्।

अमायां विशेषमाहापरार्के यमः।

हंसे करस्थिते या तु अमावास्या करान्विता।
सा ज्ञेया कुञ्जरच्छाया इति बौधायनोऽब्रवीत्॥

इति श्रीमद्भट्टोजिदीक्षित विरचिते तिथिनिर्णये महालयः समाप्तः।

आश्विनशुक्लप्रतिपदि दौहित्रो मातामहश्राद्धंकुर्यात्। उक्तं च **हेमाद्रौ**—जातमात्रोपि दौहित्रो जीवत्यपि हि मातुले। कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते। इति। इयं च सङ्गवव्यापिनी ग्राह्येति **निर्णयदीपे** उक्तम्। प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणम्। श्राद्धं मातामहं कुर्यात्सपिता सङ्गवे सिते। जातमात्रोपि दौहित्रो जीवत्यपि हि मातुले। प्रातः सङ्गवयोर्मध्ये याऽश्वयुक् प्रतिपद्भवेत्। इति वचनात्। अत्र सपितेति विशेषणाज्जीवत्पितृक एवाधिकारी। अतएव-पिण्डरहितं कुर्यात्। मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः। न जीवत्पितृकः कुर्यात् गुर्विणीपतिरेव च इति **दक्षवचनात्**। आन्वष्टक्यवद्विशेषवचनाभावात्। इति॥

अत्रैव नवरात्रारम्भः। तत्र परविद्धा ग्राह्या। तदुक्तं **गोविन्दार्णवे मार्कण्डेय देवीपुराणयोः**। पूर्वविद्धा तु या शुक्लाभवेत्प्रतिपदाश्विने। नवरात्रंव्रतं तस्यां न कार्यं शुभमिच्छता। देशभङ्गो भवेत्तत्र दुर्भिक्षं चोपजायते। नन्दायां दर्शयुक्तायां यत्र स्यान्मम पूजनम्। इति। तथा तत्रैव **देवीपुराणे**-न दर्शकलया युक्ता प्रतिपच्चण्डिकार्चने। उदये द्विमुहूर्ताऽपि ग्राह्या सोदयकारिणीति। यदा तु-पूर्वदिने शुद्धा भूत्वा परदिने वर्द्धते तदा पूर्वैव। सम्पूर्णत्वादमायोगाभावाच्च। यानि च द्वितीयायोगनिषेधपराणिवचनानि तानि शुद्धाधिकपराण्येव। परदिने प्रतिपदोऽसत्वे तु अमायुक्तापि ग्राह्या। अमायुक्ता प्रकर्त्तव्येति **नृसिंहप्रसादोदाहृतवचनान्येष्वेतद्विषयाण्येव**।

अत्र देवीपूजाप्रधानम्। उपवासादिकंत्वङ्गम्। अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम्। पूजयित्वाश्विने मासि विशोको जायते नरः। इति **हेमाद्रौ भविष्ये** तस्या एव फल सम्बन्धसत्वात्। उक्तवचनादष्टमीनवमीरूपदिनद्वयपूजैव प्रधानमितरत्सर्वमङ्गमिति तु गौडाः। **हेमाद्रौ भविष्ये**। एवं च विन्ध्यवासिन्यां नवरात्रोपवासतः। एकभक्तेन नक्तेन तथैवायाचितेन च। पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे इत्यादि। **देवीपुराणे** तु त्रिकालं पूजयेद्देवीजपस्तोत्रपरायणः इति।

यत्तु माधवेनोक्तम् । तस्य नक्तव्रतस्यादिति सोऽयं पाक्षिक नक्तानुवादः, अन्यथा नवरात्रोपवासत इत्याद्यपक्षानुपपत्तेः । अत्र वैधृतिं चित्रां चातिक्रम्य व्रतारम्भः । तदसम्भवे तयोरंशत्रयं पाददयं वा त्याज्यम् । तथा च भार्गवार्चनदीपिकायां देवीपुराणे । त्वाष्ट्रवैधृतियुक्ता चेत्प्रतिपद्यण्डिकार्चने । तयोरन्ते विधातव्यं कलशारोपणं गृह । इति । दुर्गोत्सवे कात्यायनः । प्रतिपच्चाश्विने मासि भवेद्वैधृतिचित्रयोः । आद्यपादौपरित्यज्य प्रारभेन्नवरात्रकम् । भविष्ये । चित्रा वैधृति संयुक्ता प्रतिपच्चेद्भवेन्नृप । त्याज्यार्द्धांशात्रयस्त्वाद्यास्तुरीयांशे तु पूजनम् । कलशस्थापनं तु रात्रौ न कार्यम् । न रात्रौ स्थापनं कार्यं न च कुम्भाभिषेचनमिति मात्स्योक्तेः । भास्करोदयमारभ्य यावत्तु दशनाडिकाः । प्रातः काल इति प्रोक्तः स्थापनारोपणादिषु । इति विष्णुधर्मोक्तेश्च । आद्याः षोडशनाडीस्तु त्यक्त्वा यः कुरुते नरः । कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवमिति भार्गवार्चनदीपिकायां देवीपुराण ह्यामरुतन्त्रवचनोदाहरणाच्च । अत्र केचित्–नवरात्रशब्दो नवाहोरात्रपरः । वृद्धौसमासिरष्टम्यां ह्रासेऽमा प्रतिपतिथिः । प्रारम्भो नवचण्ड्यास्तु नवरात्रमतोऽर्थवदिति देवीपुराणादित्याहुः । अन्ये तु वचनमिदं निर्मूलं मत्वा तिथिविशेषपरतामेवाहुः । युक्तञ्चैतत् । अतिह्रासवृद्धौ न्यूनाधिकतायाः दुष्परिहरत्वात् । उक्तञ्च–तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम् । अष्टरात्रे न दोषोयं नवरात्रतिथिक्षये । इति । प्रारम्भो नवरात्रस्येत्यादौ लक्षणयाकर्म्मपरतेति दिक् । विश्वरूपनिबन्धे-सूतकेपूजनं प्रोक्तं दानं चैव विशेषतः । देवीमुद्दिश्यकर्तव्यं तत्र दोषो न विद्यते इति वचनान्मध्ये आशौचपातेपि पूजा ब्राह्मणद्वारा कार्या न तु स्वयम् । विष्णुरहस्ये । पूर्वसङ्कल्पितं यच्च व्रतं सुनियतव्रतैः । तत्कर्त्तव्यं नरैः शुद्धे दानार्चनविवर्जितमिति । उपवासादि स्वयमेव कार्यम् । सङ्कल्पोव्रतसत्रयोरितिवचनात् । अनारब्धं तूपवासादि अन्यद्वारा कार्यमेदिति दिवोदासीये । ब्राह्मणभोजनादि सूतकान्ते कु-

र्यात । भूरिजन्मा कश्चित्साक्षोदेवपूजनं कार्यमिति जजल्प । एवं रजोदोषेपि । पूजा तु अन्यद्वारा कार्या । सुवासिनीनां तु—गन्धालङ्कारताम्बूलं पुष्पमाल्यानुलेपनम् । उपवासे न दुष्यन्ति दन्तधावनमज्जनमिति ।

आश्विनशुक्लपञ्चम्यामुपांगललिताव्रतम् । अत्र विशेषवचनाभावेऽपि शक्ति पूजनत्वाद्रात्रिव्याप्तिनीग्राह्या । रात्रिशब्दः पूर्वविद्धा वचनपर इति हेमाद्रिः । युग्मवाक्याच्च । भुक्त्वा जागरणे नक्ते चन्द्रार्घाद्यर्घव्रते तथा । तारात्रतेषु सर्वेषु रात्रियोगः प्रशस्यते इति **कालहेमाद्रिवचनादपि** पूर्वविद्धा ग्राह्या । अस्य च भुक्त्वा जागरणरूपत्वात् । **यत्तु भूरिजन्मा जजल्प**—वचनाभ्विना रात्रिव्याप्तिन्या ग्रहणे प्रमाणाभावात् जागरणस्यचाङ्गत्वात् पूर्वाह्नव्याप्तिन्येव ग्राह्येति तद्भूरिजन्मनो मन्दप्रज्ञस्य दुर्बुद्धिविलसितमात्रामित्युपेक्ष्यम् ।

आश्विनशुक्लसप्तमी देवीपूजायां परा । युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया । स्वेरुदयमीक्ष्यन्ते न तासु तिथियुग्मतेति **प्रतापमार्तण्डभविष्योक्तेः** । वर्षवृद्धिर्जन्मतिथिः ।

अत्रैव मूलनक्षत्रे पुस्तकस्थापनमुक्तं **देवीपुराणे** । मूलेषु स्थापनं देव्याः पूर्वाषाढासुपूजनम् । उत्तरासु बलिं दद्याच्छ्रवणेन विसर्जयेत् । **रुद्रयामले**—मूलऋक्षे सुराधीश पूजनीया सरस्वती । पूजयेत् प्रत्यहं देव यावद्वैष्णवमृक्षकम् । नाऽध्यापयेन्नचलिखेन्नाधीयीत कदाचन । पुस्तके स्थापिते देव विद्याकामो द्विजोत्तमः । इति ।

अथाष्टमी । तत्राष्टम्यां महाकाली दक्षाध्वर विनाशिनी । प्रादुर्भूता महाघोरा योगिनीकोटिभिर्वृता । सा च परयुता ग्राह्या । **देवीपुराणे**-सप्तमीवेधसंयुक्ता यैः कृता तु महाष्टमी । पुत्रदारधनैर्हीना भ्रमन्तीह पिशाचवत् । **मदनरत्ने स्मृतिसंग्रहेऽपि**—शरन्महाष्टमी पूज्या नवमीसंयुता सदा । सप्तमी संयुता नित्यं शोकसन्तापकारिणी । जम्भेन सप्तमी युक्ता पूजिता च महाष्टमी । इन्द्रेणाभिहतो जम्भस्तस्यां दानवपुङ्गवः । तस्मात्सर्वप्रयत्नेन सप्तमीसहिताष्टमी । वर्जनीया प्रय-

स्नेन मनुजैः शुभकाङ्क्षिभिः । तथा—सप्तमी कलया यत्र परतश्चाष्टमी भवेत् । तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदम् । पुत्रान् हन्ति पशून् हन्ति हन्ति राष्ट्रं सराजकम् । हन्ति जातानजाताँश्च सप्तमीसहिताष्टमी । शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी । पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुता । वसुरन्ध्रयोरिति युग्मवाक्यञ्चात्र मुहूर्तन्यूनापि सप्तमी वर्जनप्रयोजिका न त्रिमुहूर्तैव । पुराणे—सप्तमी स्वरूप संयुक्ता वर्जनीया सदाष्टमी । स्तोकापि सा तिथिः पुण्या यस्यां सूर्योदयो भवेदिति । नवमीयुताऽलाभे तु सप्तमीयुतैव ग्राह्या । तथा च स्मृतिसंग्रहे—यदा पूर्वदिने न स्यान्नवमी च परेऽहनि । तदाष्टमीं प्रकुर्वीत सप्तम्या सहितां नृपेति । उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् इति मदनरत्ने ।

अथाश्विनशुक्ल नवमी महानवमी लैङ्गे दुर्गापूजासु नवमी मूलाद्यृक्षसमन्विता । महती कीर्तिता तस्यां दुर्गा महिषमर्दिनी । पूजयेदिति शेषः । सा पूर्वविद्धा ग्राह्या । युग्मवाक्यात् । बृहद्यमोऽपि । श्रावणी दुर्गनवमी दूर्वाचैव हुताशनी । पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्वलेर्दिनमिति । अस्यामेव पूजनहोमबलिदानादि कार्यमिति राजमार्तण्डे । नवम्यां च जपं होमं समाप्य विधिवद्बलिमिति । ब्रह्मवैवर्त्तेऽपि । अत्रापराह्णिके काले बलिदानं प्रशस्यते । दशमीं वर्जयेत्तत्र नात्र कार्या विचारणेति । तेन नवम्यामुपक्रम्य नवम्यामेव समापयेत् । केचिदष्टमीमारभ्य नवम्यां समापयन्ति । तत्र मूलं शिष्टाचार एव । अत्र डामरतन्त्रे विशेषः । पायसं सर्पिषा युक्तं तिलैः शुक्लैर्विमिश्रितम् । होमयेद्विधिवद्भक्त्या दशांशेन नृपोत्तम । रुद्रायामले यथा होमं मन्त्रेणानेन साधयेत् । रुद्रयामलेऽपि । प्रधानद्रव्यमुद्दिष्टं पायसान्नं तिलास्तथा । किंशुकैः सर्षपैः पूगैर्लाजादूर्वाकुरैरपि । यवैर्वा श्रीफलैर्दिव्यैर्नानाविधफलैरपि । रक्तचन्दनखण्डैश्च गुग्गुलैश्च मनोहरैः । प्रतिश्लोकं च जुहुयात् सर्वद्रव्याणि च क्रमात् । पारणा तु नवम्यां कार्या तदुक्तं रुद्रयामले । अष्टम्यां जागरं कुर्यान्नवम्यां पारणा तथा ।

दशम्यां च विसर्गः स्यादभिषेकश्च माधव । नवम्यां च विशालाक्ष कार्या होमादिका क्रिया । पारणं च प्रकुर्वीत देवीपूजनपूर्वकमिति । तस्मात्तु पारणं कुर्यान्नवम्यां विबुधाधिप । नवम्यां पारिता देवी कुलवृद्धिं प्रयच्छति । दशम्यामिश्रिता यत्र पारणे नवमी भवेत् । सप्तजन्मकृतं पुण्यं तत्क्षणादेव नश्यति । तथा-योमोहात्पारणं कुर्याद्दशमी दिवसे विभो । तद्राष्ट्रं नाशमायाति दुर्भिक्षादि भयं भवेत् । नृपहीनं भवेद्राष्ट्रं दशम्यां पारणे कृते । तस्मात्तु पारणं देव नवम्यां भक्तितत्परः । नवमीवृद्धिश्चेत्तदा पूर्वदिने पारणं कार्यं, न तु परदिने इत्यादि । अत्र केचिद्दशम्यामप्याहुः । आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रकम् । प्रतिपदादि क्रमेणैव यावच्च नवमी भवेदिति हेमाद्रि वचनात् । भविष्ये । तस्मादियं महापुण्या नवमी पापनाशिनी । उपोष्या सुप्रयत्नेन सततं सर्वपार्थिवैरिति । नवमी तिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् । इति । आदिशब्देनोपवासादि । एवं तूभयविधायकवाक्यानां स्वकुलपरम्पराचारतो व्यवस्था । येनास्य पितरो याता इति मनुवचनात् । पारणं च सूतकेऽपि कार्यम् । रुद्रयामले । सूतके पारणं कुर्यान्नवम्यां होमपूर्वकम् । तदन्ते भोजयेद्विप्रान् दानं दद्याच्च शक्तितः । इति । काम्योपवासे प्रक्रान्ते अन्तरा-सूतसूतके । तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितमिति माधवीये—कौर्मोक्तेश्च । एवं रजोदर्शनमध्येपि कार्यम् । सत्यव्रतः-प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् । न तत्रापि व्रतस्यस्यादुपरोधः कथञ्चनेति । एतच्च सधवापरम् । विधवायास्तु त्रिरात्रमध्ये भोजननिषेधादिति केचित् । तन्न । निषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधपारणविषयत्वायोगात् । अन्ये तु-नियमस्था यदा नारी सम्पश्येदन्तरा रजः । उपोष्यैव तु ता रात्रीः स्नात्वा शेषं व्रतं चरेदित्यङ्गिरोवचनात् पञ्चमेऽहनि पारणं कार्यमित्याहुः इति महानवमी निर्णयः ।

अथ विजयादशमी । सा शमीपूजा यात्रादौ नक्षत्रोदयव्यापिनी ग्राह्या । तदुक्तं रत्नकोशे । ईषत्सन्ध्यामतिक्रान्तः किञ्चिदुद्भिन्नतारकः । विजयो नाम कालोऽयं सर्वकार्यार्थसाधकः । इति । दिनद्वये

तदूव्याप्तौ पूर्वैव । या पूर्वा नवमीयुक्ता तस्यां पूज्यापराजिता । क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः । नवमीशेषयुक्तायां दशम्यामपराजिता । ददाति विजयं देवी पूजिता जयवर्द्धिनी ॥ एकादश्यां न कुर्वीत पूजनं चापराजितमिति स्कान्दोक्तेश्च । दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नरः । तस्य सम्वत्सरं राज्ये न कोपि विजयो भवेत् । दिनद्वये तारकोदयकालाभावे परदिने एकादशमुहूर्त्ते यात्रादि कार्यम् । आश्विनस्य सिते पक्षे दशम्यां सर्वराशिषु । सायंकाले शुभा यात्रा दिवा वा विजयक्षणे । एकादश मुहूर्त्तोऽपि विजयः परिकीर्तितः । तस्मिन् सर्वैर्विधातव्या यात्रा विजयकाङ्क्षिभिः । इति भृगूक्तेः । परदिने एकादश मुहूर्तेदशमीव्याप्त्यभावेऽपि श्रवणयोगश्चेत्तदैव यात्रा कार्या । उदये दशमी किञ्चित् सम्पूर्णैकादशी यदि । श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा । इति मदनरत्नेदक्षोक्तेः । तथा च कश्यपः श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः । उल्लङ्घयेत्तु सीमानं तद्दिनर्क्षे ततो नरः ।

अत्र कृत्यं भविष्ये । शमीं सल्लक्षणोपेतामशिनाशां प्रतिष्ठिताम् । सम्प्रार्थितां च सम्पूज्य ईशानीं सम्मुखो भवेत् । शमी शमयते पापं शमी लोहितकण्टका । धारयिष्यर्जुनबाणानां राम सम्वाददायिनी । करिष्यमाणयात्रायां यथाकालं सुखं मम । तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते । गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् । गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति । ततो भूषणवस्त्रादि धारयेत् स्वजनैः सह इति दिक् । इति **विजयादशमी** ।

आश्विनशुक्लद्वादश्यां द्विदलव्रतम् ।

आश्विनीपौर्णमासी परा ग्राह्या । आश्वयुजी कर्मणि तु पूर्वाह्णव्यापिनी दैवकर्मत्वात् । **हेमाद्रिलिखितमादित्यपुराणं पूर्णिमारम्भे** प्रमाणम् । अत्रैव व्रीह्याश्रयणम् । तच्च शेषपर्वणि कार्यम् । इदं च मलमासे न कार्यम् । आग्रयणादि कार्यमेव । अस्याकरणे प्रायश्चितम्-**कारिकायाम्** । अकृताग्रयणोऽग्नीयान्नवान्

यदि वै नरः । वैश्वानराय कर्त्तव्यश्चरुः पूर्णाहुतिस्तथेति । **आश्विन-कृष्णतृतीयायां** ललितादेव्या यात्रा **काशीखण्डे** -आश्विनकृष्णतृतीयायां ललितां प्रतिपूज्य वै । नारी वा पुरुषोवापि लभते वाञ्छितं फलम् ।

आश्विनपौर्णमास्यां **कोजागरव्रतम्** । तत्र निशीथव्यापिनीति **लिङ्गपुराणे** ।

आश्विनशुक्लैकादश्यां पौर्णमास्यां वा **कार्तिकस्नानारम्भः**। **विष्णुरहस्ये**—प्रारभ्यैकादशीं शुक्लामाश्विनस्यैव मानवः । प्रातःस्नानं प्रकुर्वीत यावत्कार्तिकमास्करः। **विष्णुना तु** तुलासंक्रान्तिमारभ्य कर्त्तव्यमित्युक्तं पूर्वमेव । पूर्णिमाश्वयुजेमासि पौर्णमास्यां समाहितः । इत्युक्त्वा "मासं समग्रं परया च भक्त्या समाप्यते कार्त्तिकपौर्णमास्यामिति" **हेमाद्रिः** ।

इदं कार्तिकस्नानं काशीस्थ पञ्चनदेऽति प्रशस्तम् । किरणाधूतपापा च पुण्यतोया सरस्वती । गंगा च यमुना चैव पञ्चनद्यः पुनन्तु माम् । शतं समास्तपस्तप्त्वा नरैर्यत्प्राप्यते फलम् । तत् कार्तिके पञ्चनदे सकृत् स्नानेन लभ्यते । इति काशीखण्डात् । इति ॥

इति श्रीमद्भट्टोजिदीक्षित विरचिते तिथिनिर्णये आश्विनमासः समाप्तः ।

अथ कार्तिकमासः । तत्र स्कान्दे—कार्तिके मासि विप्रेन्द्र धात्रीवृक्षोपशोभिते । वने दामोदरं विष्णुं चित्रान्नैस्तोषयेद्विभुम् । मूलेन पायसेनाथ होमं कुर्याद्विचक्षणः । ब्राह्मणान् भोजयेत्पश्चात् स्वयं भुञ्जीत बन्धुभिरिति **निर्णयामृते** । तुलायां तिलतैलेन सायङ्काले समागते । आकाशदीपं यो दद्यान्मासमेकं हरिप्रियम् । महतीं श्रियमाप्नोति रूपसौभाग्यसम्पदमिति । तत्र दीपदानमन्त्रः—दामोदराय नभसे नमोऽनन्ताय वेधसे । प्रदीपं ते प्रयच्छामि तुलस्या लोलया सह । इति ।

कार्तिककृष्णचतुर्थी करकचतुर्थी। सा चन्द्रोदयव्यापिनी ग्राह्या। अत्र स्त्रीणामेवाधिकारः। तासामेव फलश्रुतेः।

कार्तिककृष्ण द्वादशी वत्सद्वादशी। सा पूर्वयुता। वत्सपूजा वटश्चैव कर्त्तव्या प्रथमेऽहनि। इति **स्मृत्यन्तरात्**। **युग्मवाक्याच्च**। **भविष्ये**–सवत्सां तुल्यवर्णां च शीलिनीं गां पयस्विनीं। चन्दनादिभिरालिप्य पुष्पमालाभिरर्चयेत्। **तत्रार्घ्यमन्त्रः**। क्षीरोदार्णवसम्भूते सुरासुरनमस्कृते। सर्वदेवमये मातर्गृहाणार्घ्यं नमोनमः। **इत्यर्घ्यं** दद्यात्। तद्दिने तैलपक्वं च स्थालीपाकं युधिष्ठिर। गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत्। इति **भविष्योक्तेः**।

अथ दीपावली। **ज्योतिर्निबन्धे नारदः**। आश्विने कृष्णपक्षे तु द्वादश्यादिषु पञ्चसु। तिथिषूक्तः पूर्वरात्रे नृणां नीराजनो विधिः। नीराजयेयुर्देवांस्तु विप्रान् गाश्च तुरङ्गमान्। ज्येष्ठान्श्रेष्ठान्जघन्यांश्च मातृमुख्यास्तु योषितः।

कार्तिककृष्णचतुर्दशी नरकचतुर्दशी। सा अभ्यङ्गे-चन्द्रोदयव्यापिनी ग्राह्या। कार्तिकस्यासिते पक्षे चतुर्दश्यां विधूदये। अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः। इति **निर्णयामृते भविष्योक्तेः**। **ब्राह्मे**–आश्वयुक् कृष्णपक्षस्य चतुर्दश्यां विधूदये। कर्त्तव्यं तिलतैलेन स्नानं नरकभीरुभिरिति। दिनद्वये विधूदये चतुर्दशी सत्वे पूर्वैव। पूर्वविद्धचतुर्दश्यां कार्तिकस्य सितेतरे। पक्षे प्रत्यूषसमये स्नानं कुर्यात् प्रयत्नतः। इति **स्मृतिदर्पणोक्तेः**। **निर्णयामृते** तु परैव। दिनद्वये चन्द्रोदये चतुर्दश्यभावे तु चतुर्दश्यां चतुर्थयामे स्नानमिति **दिवोदासनिबन्धे स्मृतिदर्पणेऽपि**—चतुर्दशी याऽश्वयुजस्य कृष्णा स्वात्यर्क्षयुक्ता च भवेत्प्रभाते। स्नानं समभ्यञ्ज्य नरैस्तु कार्यं सुगन्धतैलेन विभूतिकामैः। इति। **तथा**–तैले लक्ष्मी जले गङ्गा दीपावल्यां चतुर्दशीम्। प्राप्येति शेषः। तथा च **नारायणः**। तथा कृष्णचतुर्दश्यामाश्विनेऽर्कोदयात् पुरा। यामिन्याः पश्चिमे यामे तैलाभ्यङ्गो विशिष्यते इति। मृगाङ्कोदयवेलायां त्रयो-

दृश्यां यदा भवेत् । दर्शे वा मङ्गलस्नानं दुःखशोकभयप्रदम् । इति कालादर्शे त्रयोदशी निषेधात् । यद्यपि–त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी । रात्रिशेषेत्वमावास्या तदाभ्यङ्गेत्रयोदशीति वचनं तद्धेमाद्रिनिर्णयामृतादिभिरलिखितत्वान्निर्मूलम् । अतएव सर्वज्ञनारायणेन चतुर्थ्यामभात्रे स्नानमुक्तम् इति । ज्योतिर्निबन्धे नारदः । ईषासितचतुर्दश्यामिन्दुक्षयतिथावपि । ऊर्ज्जादौ स्वातिसंयुक्ते तदा दीपावली भवेदिति । अमावास्या चतुर्दश्योः प्रदोषे दीपदानतः । यममार्गान्धकारेभ्यो मुच्यते कार्तिके नर इति दीपदानमुक्तम् । अत्र यमतर्पणं कार्यमिति ब्राह्मे । जीवत्पितृकेणापि कार्यमिति तत्रैवोक्तेः । इति चतुर्दशी

अथ कार्तिकामावास्यायां कृत्यमुक्तम् । आदित्यपुराणे । दिवातत्र न भोक्तव्यमृते बालातुराज्जनात् । प्रदोषसमये लक्ष्मीं पूजयित्वायथाक्रमम् । दीपवृक्षास्तथा कार्याः शक्त्या देवगृहेषु च । ब्राह्मणान् भोजयित्वादौ सम्भोज्य च बुभुक्षितान् । स्वलंकृतेन भोक्तव्यं नववस्त्रोपशोभिना । दीपमन्त्रः—त्वं ज्योतिः श्रीरविश्चन्द्रो विद्युत्सौवर्णतारकः । सर्वेषां ज्योतिषां ज्योतिर्दीपज्योतिर्नमोस्तुते । मन्त्रेणानेन कमलां दीपहस्ताश्चियो द्विजाः । देवीं प्रबोधयेयुश्च ततः कुर्याच्च भोजनम् इति । इयं प्रदोषव्यापिनी ग्राह्या । दिनद्वयसत्त्वासत्त्वे परा । युग्मवाक्यात् । पूर्वेद्युरेव प्रदोषव्यापित्वे पूर्वा, श्राद्धे तु परैव । ज्योतिर्निबन्धे–तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः । उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम् । इत्यमावस्या ।

कार्तिकशुक्लप्रतिपत्पूर्वा । पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनमिति बृहद्यमोक्तेः । अत्र तैलाभ्यङ्गो नित्यः । वत्सरादौ वसन्तादौ बलिराज्ये तथैव च । तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यत इति वृद्धवशिष्ठोक्तेः । हेमाद्रौ स्कान्दे च–प्रातर्गोवर्द्धनः पूज्यो द्यूतं चापि समाचरेत् । पूजनीयास्तथा गावस्त्याज्ये वाहनगोधने । गोक्रीडनादौ

यद्यपि प्रातःकालव्यापिनी उत्तरैव प्रतिभाति । तथापि "सोमो राजा पशून् हन्ति" इति देवलवचनात् परविद्धा चन्द्रदर्शनवती निषिद्धत्वाद्दर्शविद्धैव ग्राह्या । प्रतिपद्दर्शसंयोगे क्रीडनं तु. सर्वा मतमिति तेनैवोक्तत्वाच्च द्वितीय दिने चन्द्रदर्शनाभावे गोक्रीडनादावुत्तरैव । **तत्र मन्त्रः** । गोवर्द्धन धराधार गोकुलत्राणकारक । वहुवाहुकृतच्छाय गवां-कोटिप्रदो भव इति **ब्राह्मे** । तस्माद्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः । तस्मिन्द्यूते जयो यस्य तस्य संवत्सरं जयः । पराजयो विरुद्धश्च लाभना-शकरो भवेत् । दयिताभिश्च सहितैर्नेया सा च भवेन्निशा । इति **प्रतिपत्** ।

कार्तिकशुक्लद्वितीया यमद्वितीया । सा पूर्वविद्धा अपराह्ण-व्यापिनी ग्राह्या । तदुक्तं स्कान्दे—ऊर्जे शुक्ले द्वितीयायां अपराह्णेऽर्च-येद्यमम् । स्नानं कृत्वा भानुजायां यमलोकं न पश्यति । ऊर्जे शुक्ले द्विती-यायां पूजितस्तर्पितो यमः । वेष्टितः किंकरैर्हृष्टैस्तस्मै यच्छति वाञ्छितम् । **भविष्ये**—कार्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर । यमो यमुनया-पूर्वं भोजितः स्वगृहेऽर्चितः । अतो **यमद्वितीयेयं** त्रिषु लोकेषु विश्रुता । तस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः । स्नेहेन भगिनी-हस्ताद् भोक्तव्यं पुष्टिवर्द्धनम् । दानानि च प्रदेयानि भगिनीभ्यो विधा-नतः । स्वर्णालङ्कारवस्त्रान्नपूजासत्कारभोजनैः । सर्वा भगिन्यः सम्पूज्या अभावे प्रतिपन्नकाः । प्रतिपन्नका भगिनीस्थाने मानिता । **ब्रह्माण्डे**—या तु भोजयते नारी भ्रातरं युग्मकेतिथौ । अर्चयित्वापि ताम्बूलैर्न सा वैधव्यमाप्नुयात् । भ्रातुरायुः क्षयो राजन्न भवेत्तत्र कर्हिचित् । इति **यमद्वितीया** ।

कार्तिकशुक्लनवमी कूष्माण्डनवमी । तत्र कूष्माण्डदान-मुक्तम् । इयं युगादिः पूर्वाह्णिकी ग्राह्या । शुक्लपक्षस्थत्वात् ।

कार्तिकशुक्लैकादश्यां **भीष्मपञ्चकव्रतमुक्तम्** । **नारदीये**—पञ्चाहं पञ्चगव्याशी भीष्मायार्घ्यं च पञ्चसु । अहःस्वपि तथा दद्यान्म-

न्त्रेणानेन सुव्रत । सत्यव्रताय शुचये गाङ्गेयाय महात्मने । भीष्मायैतद्ददाम्यर्घ्यमाजन्मब्रह्मचारिणे । वैयाघ्रपदगोत्रायेति वाऽर्घ्यं दत्वा तर्पणं कार्यम् । इदं व्रतमेकादश्यादिपंचदिनात्मकम् तिथिह्रासेऽपितस्यानुष्ठानमिति ।

कार्तिकशुक्लद्वादश्यां रेवतीनक्षत्रयोगरहितायां पारणं कुर्यात् । आभाकासित पक्षेति वचनात् । यदा तु रेवतीयोगरहिता द्वादशी न लभ्यते, तदा रेवत्यन्तपादं वर्जयित्वा पारणं कुर्यात् । अस्यामेव रात्रौ **देवोत्थापनमुक्तम्** । **ब्राह्मे**–एकादश्यां तु शुक्लायां कार्तिके मासि केशवम् । प्रसुप्तं बोधयेद्रात्रौ भक्तिश्रद्धासमन्वितः । **रामार्चनचन्द्रिकायां तु द्वादश्यामुक्तम्** । पारणाहे पूर्वरात्रे घण्टादीन्वादयन्मुहुरिति । **अस्य देशाचारतो व्यवस्था** । **उत्थापनस्तोत्राः**–**वाराहे**–ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वान्दित वन्दनीय । बुद्ध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव । इयं तु द्वादशी देव प्रबोधार्थं विनिर्मिता । त्वयैव सर्वलोकानां हितार्थं शेषशायिना । उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते । त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदम् । उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव । गता मेघा वियच्चैव निर्मलं निर्मला दिशः । शारदानि च पुष्पाणि गृहाण मम केशव । इदं विष्णुरिति प्रोक्तो मन्त्र उत्थापने हरेरिति ।

अस्यामेव चातुर्मास्यव्रतसमाप्तिः । चतुर्धा गृह्य वै चीर्णं चातुर्मास्यव्रतं नरैः । कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत् । **मन्त्रस्तु भारते**–इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो । न्यूनं सम्पूर्णतां यातु त्वत्प्रसादाज्जनार्दन । इति । इदं शुक्लास्तादावपि कार्यम् । अशौचे तु पूजादिकमन्येन कारयेत् ।

कार्तिकद्वादशी पौर्णमासी च मन्वादिः । सा पौर्वाह्णिकी ग्राह्या ।

कार्तिकशुक्ला चतुर्दशी वैकुण्ठचतुर्दशी । सा रात्रिव्यापिनी ग्राह्या । तदुक्तं **हेमाद्रौ भविष्ये** । कार्तिकस्य सिते पक्षे

चतुर्दश्यां नराधिप । सोपवासस्तु सम्पूज्य हरिं रात्रौ जितेन्द्रियः । अस्यामेव यदा विश्वेश्वरप्रतिष्ठादिनत्वात तत्प्रीतये उपवासादि क्रियते, तदा निशीथव्यापिनी अरुणोदयव्यापिनी ग्राह्या । दिनद्वययोगे परा । तदुक्तं—**सनत्कुमारसंहितायाम्**—वर्षे च हेमलम्बाख्ये मासेश्रीमति कार्तिके । शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं प्रति । महादेवतिथौ ब्राह्मे मुहूर्त्ते मणिकर्णिके । स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयत् । सङ्क्षेपं ज्योतिषस्तत्र प्रतिष्ठाख्यं तदाऽकरोत् । स्वयमेव स्वमात्मानं चरन् पाशुपतव्रतम् । इति । पूर्वदिने कृतोपवासः, अरुणोदये मणिकर्णिकायां स्नात्वा विश्वेश्वरं पूजयेत् । ततः प्रभाते विमले कृत्वा पूजां महाद्भुताम् । दण्डपाणेर्महाघाघ्नि वनेऽस्मिन्कृतपारणः । श्रीमद्भवानीसदनं सम्प्रविश्येदमुत्तममिति । **काशीखण्डे**-कार्तिकस्य चतुर्दश्यां विश्वेशं यो विलोकयेत् । स्नात्वा त्रिपथगामिन्यां न तस्य पुनरागमः । इति ।

अथ कार्तिकपौर्णमासी । सा च सामान्य निर्णयात्परेति **दीपिकोक्तेः** । अत्रकर्त्तव्यम्-**काशीखण्डे**-कार्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनम् । सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः । इति ।

त्रिपुरोत्सवोप्यत्रैवोक्तः । **भविष्ये** । पौर्णमास्यां तु सन्ध्यायां कर्त्तव्यः त्रिपुरोत्सवः । दद्यादनेन मन्त्रेण दीपांश्चैव सुरालये । कीटाः पतङ्गा मशकाश्च वृक्षा जले स्थले ये विचरन्ति जीवाः । दृष्ट्वा प्रदीपं नहि जन्मभागिनो भवन्ति नित्यं श्वपचा हि विप्राः । इयं त्रिपुरोत्सवे सन्ध्याकालव्यापिनी ग्राह्या ।

इति श्रीमद्भट्टोजि दीक्षितविरचिते तिथिनिर्णये कार्तिक मासः समाप्तः ।

अथ मार्गशीर्षः । मार्गशीर्षकृष्णाष्टमी **कालाष्टमी** । सा रात्रिव्यापिनी ग्राह्या । मार्गशीर्षसिताष्टम्यां कालभैरवसन्निधौ । उपोष्यजागरं कुर्वन् सर्वपापैः प्रमुच्यत इति **काशीखण्डात्** । **रुद्रव्रतेषु सर्वेषु** कर्तव्या सम्मुखीतिथिरिति **ब्रह्मवैवर्तात्**–रात्रिव्रतावगते दिनद्वयेऽशतोव्याप्तावुत्तरैव, भैरवोत्पत्तेः प्रदोषकालीनत्वादिति केचित् । तन्न । **शिवरहस्ये** मध्याह्ने भैरवोत्पत्तेः श्रवणात् । **तथा च**–नित्ययात्रादिकं कृत्वा मध्याह्ने संस्थिते रवौ । इत्युपक्रम्य ब्रह्मणा रुद्रावगतेरुक्तम् । ततोग्ररूपात्क्षणाज्जातः श्रीकालभैरवः । आविरासीत्तदालोकान् भीषयन्नखिलानपि । कृत्वा च विविधां पूजां महासम्भारविस्तरैः । नरो मार्गसिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत् । तीर्थे कालोदके स्नात्वा कृत्वा तर्पणमत्वरः । विलोक्य कालराजानं निरयादुद्धरेत्पितॄन् । इति । तेन मध्याह्नव्यापिनी युक्ता इत्युक्तम् । **तथापि–शिवरहस्ये**-उक्तोपवासार्घ्यदानजागरणैः, रात्रौ यामचतुष्टयपूजादि बहुकृत्याभिधानाद्रात्रिव्यापिनी पूर्वविद्धैव ग्राह्या । कृष्णपक्षत्वात्कालव्यापित्वाच्च । दिनद्वये तद्व्याप्तौ पूर्वैव ।

मार्गशीर्षशुक्लपञ्चमी नागपञ्चमी । शुक्ले मार्गशिरे पुण्या श्रावणे नागपञ्चमी । स्नानदानैर्बहुफला नागलोकप्रदायिनी, इति **हेमाद्रौ स्कान्दे च** । इयं परा, पञ्चमी नागपूजायामिति वचनात् ।

मार्गशीर्षशुक्लषष्ठी चम्पाषष्ठी । मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता । रविवारेण संयुक्ता सा चम्पेतीह कीर्तिता इति **मल्लारिमाहात्म्ये** । **तथा**–मार्गशीर्षेऽमले पक्षे षष्ठ्यां वारेऽशुमालिनः । शततारागते चन्द्रे लिङ्गं स्यादृष्टिगोचरमिति । इयं योगविशेषेण पूर्वा, परा वा ग्राह्या । तदभावे सप्तमीयुता, युग्मवाक्यात् ।

इयमेव **स्कन्दषष्ठी** । सा पूर्वयुता ।

अथ चतुर्दशी । **काशीखण्डे**–मार्गशुक्लचतुर्दश्यां कपर्दीश्वरसन्निधौ । स्नात्वाऽन्यत्रापि मरणान्न पिशाचत्वमाप्नुयात् । अत्रप्राप्तपैशाच्यस्य स्वपित्राद्युद्देश्यकत्वे च पार्वणत्वादपराह्णव्यापिनी । अज्ञात-

नामापिशाचाद्युद्देश्यकत्वे त्वेकोद्दिष्टत्ववान्मध्याह्नव्यापिनी ग्राह्या। कुलधर्मादावुत्तरैव । चैत्रनभोगतेतरसिता स्यादूर्द्धमिति दीपिकोक्तेः । अस्यां साम्वत्सरीयात्रां ये करिष्यन्ति मानवाः । तीर्थप्रतिग्रहात्पापान्निस्तरिष्यति ते नराः इति ।

अथ मार्गशीर्षपौर्णमास्यां दत्तात्रेयोत्पत्तिः । तदुक्तं स्कान्दे-सह्याद्रिखण्डे-मार्गशीर्षे तथा मासि दशमेऽहि सुनिर्मले। मृगशीर्षयुतेपौर्णमास्यां ज्ञस्य च वासरे। जनयामास देदीप्यमानं पुत्रं सती शुभम् । तं विष्णुमागतं ज्ञात्वा अत्रिर्नामाऽकरोत् स्वयम्। दत्तवान्स्वस्य पुत्रत्वाद्दत्तात्रेय इतीश्वरः । इति। इयं प्रदोषव्यापिनीति वृद्धाः । अत्रैव प्रत्यवरोहणम्। तत्र गृह्ये-मार्गशीर्ष्यांप्रत्यवरोहणं चतुर्दश्यां पौर्णमास्यां वेति। अमान्तमासपक्षेण मार्गशीर्षकृष्णाष्टमी । अष्टका हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका, इत्याश्वलायनवचनात्। तत्पूर्वदिने सप्तमीषु पूर्वेद्युरष्टकासूत्तरेद्युरन्वष्टकासु च श्राद्धमुक्तम्-कालादर्शे-मार्गशीर्षे च पौषे च माघे प्रौष्ठे च फाल्गुने । कृष्णपक्षेषु पूर्वेद्युरन्वष्टक्यं तथाष्टका इति । अत्राष्टमी अपराह्णव्यापिनी ग्राह्या । सप्तम्यन्वष्टकाश्राद्धयोस्तु-अष्टम्यनुरोधेन निर्णयः। मार्गादिषु मलमासे सति तत्रान्वष्टका न कार्या ।

इति श्रीमद्भट्टोजिदीक्षित विरचिते तिथिनिर्णये मार्गशीर्षमासः समाप्तः ।

अथ पौषः—पौषे माघे च अमायां योगविशेषेणार्धोदयः । अमार्कपातश्रवणैर्युक्ताचेत्पौषमाघयोः । अर्धोदयः स विज्ञेयो सूर्यपर्वशताधिकः । दिवैव योगः शस्तोऽयं न तु रात्रौ कदाचन । स्कान्दे-अर्द्धोदये तु सम्प्राप्ते सर्वे गङ्गासमं जलं । शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसम्मिताः। यत्किञ्चिद्दीयते दानं तद्दानं मेरुसन्निभमिति । प्रसङ्गादन्यदपि। अमासोमसमायोगे श्राद्धं यद्यत्र लभ्यते। तीर्थे कपिलधारेऽस्मिन् गयया पुष्करेण किम् । दिव्यान्तरिक्षेभौमानि यानि तीर्थानि सर्वशः । तान्यत्र

निवसिष्यति दर्शे सोमदिनान्विते इति स्कान्दोक्तेः । शङ्खः । अमावास्या तु सोमेन सप्तमी भानुना तथा । चतुर्थीभूमिपुत्रेण सोमपुत्रेणाष्टमी । चतस्रस्तिथयस्त्वेताः सूर्यग्रहणसन्निभाः । स्नानं दानं तथा श्राद्धं सर्वं तत्राक्षयं भवेत् ।

पौषकृष्णसप्तमी बौद्धजयन्ती। पौषशुक्लैकादशी मन्वादिः, पौर्वाह्णिकी इति ।

इति श्रीमद्भट्टोजिदीक्षित विरचिते तिथिनिर्णये पौषमासः समाप्तः ।

अथ माघमासः । तुलामकरमेषेषु प्रातःस्नायी सदा भवेत् इति माघस्नानमुक्तम् । माघमासे च यः स्नायान्नैरन्तर्येण भारत । पौण्डरीकफलं तस्य दिवसे दिवसे भवेत् । ब्रह्मपुराणे । एकादश्यां शुक्लपक्षे पौषमासे समारभेत् । द्वादश्यां पौर्णमास्यां वा शुक्लपक्षे समापनम् । ततः-स्नानस्यावसाने तु भोज्यद्रव्यं सुसंस्कृतम् । भोजयेद्द्विजदाम्पत्यं भूषयेच्च सुभूषणैः । दम्पत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते । त्रिंशच्च मोदका देया शर्करा तिलसंयुताः । सौभाग्यद्रव्ययुक्ते शूर्पेकृत्वेति शेषः । इति चन्द्रिकोक्तेः । माघकृष्णचतुर्दश्यां यमतर्पणमुक्तं हेमाद्रौ । अनर्कांभ्युदिते काले माघकृष्णचतुर्दशीम् । स्नातः सन्तर्प्य तु यमं सर्वपापैः प्रमुच्यते । इति ।

माघशुक्लतृतीया कल्किजयन्ती ।

माघशुक्लचतुर्थी तिलचतुर्थी । सा प्रदोषव्यापिनी ग्राह्या । माघशुक्लचतुर्थीं तु नक्तव्रतपरायणः । ये त्वां डुंढेऽर्चयिष्यन्ति तेऽर्च्या-सुरसुरद्रुहाम्, इति काशीखण्डात् । विधाय वार्षिकीं यात्रां चतुर्थ्यां प्राप्य तापसीम् । शुक्लान् तिलान् गुडैर्वद्ध्वा प्राश्नीयाल्लड्डुकान्व्रती । इति तत्रैवोक्तेः । तापसी माघी । **इयमेव कुन्दचतुर्थी** । सा प्रदोषव्यापिनी ग्राह्येति कौर्मोक्तेः ।

माघशुक्लपञ्चमी श्रीपञ्चमी। इयं माधवमते पूर्वा। हेमाद्रिमते परा। चैत्रशुक्लपञ्चमी श्रीपञ्चमीति **दिवोदासः**॥

माघशुक्लसप्तमी रथसप्तमी। सा अरुणोदयव्यापिनी स्नानादौ ग्राह्या। सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी। अरुणोदयवेलायां तस्यां स्नानं महाफलमिति **विष्णूक्तेः**। अरुणोदयवेलायां शुक्ला माघस्य सप्तमी। प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समेति **स्मृत्यन्तराच्च**। दिनद्वयेऽरुणोदये चेत्पूर्वैव। षण्मुन्योरिति युग्मवाक्याच्च। **भविष्ये**। सौवर्णे राजते ताम्रे भक्त्याऽलाबुमये तथा। तैलेन वर्तिर्दातव्या महारजनरञ्जिता। समाहितमना भूत्वा दत्वा शिरसि दीपकम्। भास्करं हृदये ध्यात्वा इमं मन्त्रमुदीरयेत्। नमस्ते विष्णुरूपाय रसानां पतये नमः। वरुणाय नमस्तेऽस्तु हरिवास नमोऽस्तुते। जले परिहरेद्दीपं ध्यात्वा सन्तर्प्य देवताः इति-**दिवोदासीये**। महारजनं कुङ्कुमम्। इक्षुदण्डेन जलं चालयित्वा सप्तार्कपत्राणि बदरीपत्राणि च शिरसि निधाय वक्ष्यमाणमन्त्रैः स्नायात्। यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु। तन्मे रोगं च शोकं च माकरी हन्तु सप्तमीति। **अर्घ्यमन्त्रः**। सप्तसप्तिवहप्रीत सप्तलोक प्रदीपक। सप्तमीसहितो देव गृहाणार्घ्यं दिवाकर इति **मदनरत्ने**। जननी सर्वलोकानां सप्तमी सप्तसप्तिके। सप्तव्याहृतिके देवि नमस्ते सूर्यमण्डले। इति प्रार्थयेत। लोलार्के रथसप्तम्यां स्नात्वा गङ्गासिसङ्गमे। सप्तजन्मकृतैः पापैर्मुक्तो-भवति तत्क्षणात्। इति **काशीखण्डे**। **गर्गः**-षष्ठी च सप्तमी योगे वारश्चेदंशुमालिनः। योगोऽयं **पद्मकोनाम** सहस्रार्कग्रहैः समः। इति। **इयं मन्वादिः**।

माघशुक्लाष्टम्यां **भीष्मतर्पणम्**। तदुक्तं **ब्राह्मे**-माघे मासि सिताष्टम्यां सतिलं भीष्मतर्पणम्। श्राद्धं च ये नराः कुर्युस्ते स्युः सन्ततिभागिनः इति। तर्पणमन्त्रस्तु **भारते**-भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः। आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम्। वैयाघ्रपदगोत्राय सांकृत्यप्रवराय च। अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे। वसूनामवता-

राय शन्तनोरात्मजायच । अर्घ्यं ददामि भीष्माय आबाल्यब्रह्मचारिणे । ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्माय नो जलम् । संवत्सरकृतं तेषां पुण्यं नश्यति सत्तमेति । इदं च जीवत्पितृकेणापि कार्यम् ।

माघशुक्लद्वादशी भीष्मद्वादशी । इयं पूर्वयुता । युग्मवाक्यात् ।

अथ माघीपौर्णिमा । **भविष्ये**–वैशाखी कार्त्तिकी माघी तिथयोऽतीव पूजिताः । स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन इति ।

माघपूर्णिमानन्तराष्टमी माघी अष्टका उक्ता पूर्वम् । तथा च–चतसृष्वष्टकास्वशक्तस्येयमावश्यकी । एकस्यां वेत्याश्वलायनोक्तेः । इयं मन्वादिः ।

इति श्रीमद्भट्टोजिदीक्षितविरचिते तिथिनिर्णये माघमासः समाप्तः ॥

फाल्गुनकृष्णाष्टम्यां जानक्योत्पत्तिः । इति ।

अथ शिवरात्रिः । माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्दशी । शिवरात्रिस्तु सा ख्याता सर्वपापप्रणाशिनी । इदं नित्यं काम्यं च । परात्परतरं नास्ति शिवरात्रिः परात्परम् । न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरम् । जन्तुर्जन्मसहस्रेषु भ्रमते नात्र संशयः । इति नित्यत्वमुक्तम् । शिवं च पूजयित्वा तु यो जागर्ति चतुर्दशीम् । मातुः पयोधररसं न पिबेत् स कदाचन । मम भक्तस्तु यो देवि शिवरात्रिमुपोषकः । गणत्वमक्षयं दिव्यमक्षयं शिवशासनम् । सर्वान्भुक्त्वा महाभोगान् मृतो भूयो न जायते । इति काम्यत्वञ्चोक्तम् । तत्र चतुर्दशी निशीथव्यापिनी ग्राह्या । माघकृष्णचतुर्दश्यामादिदेवो महानिशि । शिवलिङ्गमभूत्तत्र कोटिसूर्यसमप्रभम् । तत्कालव्यापिनीग्राह्या शिवरात्रिव्रते तिथिरिति, **ईशानसंहितोक्तेः** । **नारदीये** । अर्द्धरात्रयुता यत्र माघकृष्णा चतुर्दशी । शिवरात्रिव्रतं तत्र वाजिमेधफलं लभेत् । **स्कान्दे**–महतामपि पापानां दृष्ट्वा वै निष्कृतिः पुरा । न

दृष्ट्वा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवाम्। इति दर्शयोगनिषेधात्। **स्मृत्यन्तरे**। भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा। शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथा। इति। **ईशानसंहितायां**-व्याप्यार्द्धरात्रं यस्यां तु लभ्यते या चतुर्दशी। तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः। पूर्वेद्युर्वा परेद्युर्वा महानिशि चतुर्दशी। व्याप्यासौ दृश्यते यस्यां तस्यांकुर्याद्व्रतं नरः। शिवलिङ्गाविर्भावकाले व्याप्या ग्राह्या चतुर्दशी। तदूर्ध्वाधोन्विता भूता सा कार्या व्रतिभिः सदेति। ममप्रीतिकरी ह्येषा माघकृष्णा चतुर्दशी। महानिशि ततः कुर्यादिदं प्रोक्तं व्रतं ममेति। दिनद्वये निशीथव्याप्तावव्याप्तौ वा परैव। आदित्यास्तमये काले अस्तिचेद्या चतुर्दशी। तद्रात्रिः शिवरात्रिः स्यात् सा भवेदुत्तमोत्तमेति **कामिकात्**। **शिवपुराणे**-प्रदोषव्यापिनी ग्राह्या शिवरात्रिः शिवप्रियैः। रात्रौ जागरणं यस्मात्तस्मात्तस्यामुपोषणमिति। दिवारात्रिव्रतं यच्च एकमेव तिथौ गतं। तस्यामुभययोगिन्यामाचरेत्तद्व्रतं व्रतीति **स्मृतेः**। प्रदोषव्याप्त्याधिक्याच्च पूर्वदिन एव निशीथप्रदोषोभयव्याप्तौ पूर्वैव। त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु। भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेदिति **वायुपुराणात्**। त्रयोदशी यदा देवि दिनभुक्तिप्रमाणतः। जागरे शिवरात्रिः स्यान्निशिपूर्णा चतुर्दशी। इति **स्कान्दात्**। परेद्युर्यदि तादृशी चेत्सैव। निशाद्वये चतुर्दश्यां पूर्वा त्याज्या पराशुभेति **कामिकात्**। यदापूर्वेद्युर्निशीथे परेद्युश्च प्रदोषे तदा पूर्वैव। अर्द्धरात्रात्पुरस्ताच्चेज्जायायोगो यदा भवेत्। पूर्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैः इति **पाद्मोक्तेः**। **स्कान्दे**—माघकृष्ण चतुर्दश्यां रविवारो यदा भवेत्। भौमो वाऽथ भवेद्देवि कर्त्तव्यं व्रतमुत्तमम्। शिवयोगस्य योगे वै तद्भवेदुत्तमोत्तमम्। **भविष्ये**—माघमासे चतुर्दश्यां कृष्णपक्षे समाहितः। कृत्तिवासेश्वरं लिङ्गं येऽर्चयन्ति विधानतः। ते यान्ति परमं स्थानं सदाशिवमनामयम्। इति।

पारणं तु तिथिमध्ये एव कार्यम्। **माधवीये**—उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणम्। कृतैः सुकृतलक्षैश्च लभ्यते वाऽथवा

न वा । ब्रह्माण्डोपरिमध्ये च यानि तीर्थानि सन्तिवै । संस्नातानि भवन्तीह मृतायां पारणे कृते । तिथिनामेव सर्वामुपवास व्रतादिषु । तिथ्यन्ते पारणं कुर्यात् विना शिवचतुर्दशीम् । यत्तु–कृष्णाष्टमी रोहिणी च शिवरात्रिस्तथैव च । पूर्वविद्धैव कर्तव्या तिथिभान्ते च पारणमिति । स्कान्देऽपि । कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रि चतुर्दशी । एताः पूर्वयुताः कार्या तिथ्यन्ते पारणं भवेदिति, तद्गौणकालपरम् । स्वकाला दुत्तरो गौणः कालः सर्वस्य कर्मणः इति मंडनोक्तेः । उभयविधायकवाक्यानां व्यवस्था तु मदनरत्ने । यदा दिनमध्ये एव चतुर्दशी समाप्यते तदा तदन्ते । यदा तृतीयप्रहरादूर्द्धं तदा चतुर्दश्यामेवेति । इति शिवरात्रिः ।

मासशिवरात्रिस्तु बहुरात्रिव्यापिनी ग्राह्या । यत्तु प्रदोषव्यापिनी ग्राह्येति तत्सन्यस्तविषयम् । तथा च विश्वरूपनिबन्धे नन्दिकेश्वरवचनम् । मोक्षमार्गरतानां च मुनीनामूर्द्ध्वरेतसाम् । तेषामेव तु सा प्रोक्ता सामावास्या चतुर्दशी । शिवरात्रिव्रतं देव पूजाजपपरायणः । करोमि विधिवद्दत्तं गृहाणार्घ्यं महेश्वर । नमः शिवाय शान्ताय सर्वपापहराय च । इति प्रतिमासशिवरात्रिः ।

माघमासस्यामावास्या मन्वादिः ।

अथ फाल्गुनः । फाल्गुनामावास्यायां रुद्रादिपूजोक्ता । लैङ्गेः फाल्गुनपक्रमे–अमायां तु प्रपूज्याश्च रुद्रोभिः ब्राह्मणास्तथा । मांसोदनैः पोलिकाभिः पूज्यश्चात्मा सबान्धवः इति ।

अथ श्रवणार्कयोगे व्यतीपातः । तथा च शङ्खः । श्रवणाश्विधनिष्ठार्द्रा नागदैवतमस्तके । यद्यमा रविवारेण व्यतीपातः स उच्यते । तत्र दत्तं हुतं जप्तं सर्वं कोटिगुणं भवेत् । इति । नागदैवतमाश्लेषा । मस्तकं मृगशीर्षकम् ।

फाल्गुनपौर्णमास्यां होलिकोत्सवः । नृपं प्रति नारदवचोभविष्ये-अद्य पञ्चदशी शुक्ला फाल्गुनस्य नराधिप । अभयं चैव लोकानां

प्रक्ष्य तिथिष्वनुक्रमात् । इषु सूर्यनखोद्भुतः पुनर्घटिकाभ्यो घटिकात्रयं शुभम् । गजादितिथिषु इष्वादिघटिकोत्तरं घटिकात्रयं भद्रापुच्छमित्यर्थः । अस्मिन्विषये पूर्णिमोत्तरदिने सार्द्धयामत्रयमिता ततोऽधिका वा प्रतिपद्-श्रवृद्धिस्तदा पूर्णिमोत्तरप्रतिपदि प्रदोषे होलिका कार्या, नतु पूर्वेद्युर्विष्टि-पुच्छे । सार्द्धयामत्रयं पूर्णा द्वितीये दिवसे यदा । प्रतिपद्वर्द्धमाना तु तदा सा होलिका स्मृता इति **भविष्योक्तेः** । यातूत्तरदिने प्रदोषैकदेशेऽस्ति पूर्वरात्रे च भद्ररहिता नैव लभ्यते सा सुतरामुत्तरैव । यदा पूर्वदिने रात्रौ भद्राव्याप्ता, उत्तरदिने च प्रदोषे चन्द्रग्रहणं, तदा तत्र स्नात्वा कार्या । स्नात्वा कर्माणि कुर्वीत शृतमन्नं च वर्जयेदिति वचनात् । फाल्गुनो मलमासश्चेच्छुद्धे मासि होलिका कार्या । स्पष्टमासविशेषाख्याविहितंवर्जयेन्मले, इति वचनात् । **पूजामन्त्रस्तु**—अष्टकूपाभयत्रस्तैः कृता त्वं होलि बालिशैः । अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव । इति । **किञ्च**—होलिकाग्रहण भावुकायनं प्रेतदाहदिवसोऽत्र पञ्चमः । तत्परं च करिसंज्ञकं दिनं वर्जितं सकलकर्म सूभयम् । **अपि च**—होलिका ग्रहण भावुकायनं प्रेतदाहमिति पञ्चकं स्मृतम् । तत्परेऽहनि करीषमृत्युकर्मकृत् सर्वगमने विवर्जयेत् । होलिकानां करीषेषु सर्वकर्म विवर्जयेत् । इति । इयमपि **मन्वादिः** ।

चैत्रकृष्णप्रतिपदि वसन्तोत्सवः साचौदयिकीग्राह्या । प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ । इति **भविष्योक्तेः** । दिनद्वये तथात्वे पूर्वा । वत्सरादौ वसन्तादौ बलिराज्ये तथैव च । पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः । इति **वृद्धवशिष्ठवचनात्** ।

अत्रविशेषो **हेमाद्रौ भविष्ये**—चैत्रे मासि महाबाहो पुण्ये तु प्रतिपद्दिने । यस्तत्र श्वपचं दृष्ट्वा स्नानं कुर्यान्नरोत्तमः । न तस्य दुरितं किञ्चिन्नाधयो व्याधयो नृप इति । तथा—प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ । कृत्वाचावश्यकार्याणि सन्तर्प्य पितृदेवताः । वन्दयेद्धोलिकाभूमिं सर्वदुःखोपशान्तये । **मन्त्रश्च**—वन्दितासि सुरेन्द्रेण ब्रह्मणा शङ्करेण च । अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भव । इति ।

अत्र चूतकुसुमप्राशनमुक्तं तत्रैव पुराणसमुच्चये-वृत्ते तुषारसमये सितपञ्चदश्यां प्रातर्वसन्तसमये समुपस्थिते च। सम्प्राश्य चूतकुसुमं सहचन्दनेन सत्यं हि पार्थ पुरुषोऽथ समाः सुखी स्यात्। मन्त्रस्तु-चूत-मग्र्यं वसन्तस्य माकन्द कुसुमं तव। सचन्दनं पिबाम्यद्य सर्वकामार्थ सिद्धये ॥ इति।

चैत्रामावास्या मन्वादिः। साचापराह्णव्यापिनी ग्राह्या। कृष्णपक्षस्थत्वादिति।

इति फाल्गुनमासः समाप्तः।

इति पदवाक्यप्रमाणज्ञ लक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन विरचितस्तिथिनिर्णयः समाप्तः।

विश्वोऽसौ यस्य वश्यः स्वयमपि सततं भक्तवश्यो यएव।
साचाल्लक्ष्मीविहीनः क्षपयति जगतां लक्ष्म्यपूर्तिं क्षणेन ॥
त्रैलोक्यान्तैकहेतुर्हितमति रचयत्यर्चितो योऽखिलेन।
विष्वक्तं विश्वनाथः प्रणमति शिरसा विश्वनाथैकनाथः॥

श्रीविश्वनाथः प्रसीदतु।

श्री गणेशाय नमः ।

श्रीमन्नागोजिभट्टविरचितः—

तिथिनिर्णयः ।

तिथिर्द्वेधा, सम्पूर्णा खण्डा च । सूर्योदयमारभ्य द्वितीयसूर्योदयपर्यन्त सम्पूर्णा । सूर्योदयमारभ्य सूर्यास्तपर्यन्ताप्यहर्मात्रसाध्ये कर्मणि सम्पूर्णा योदयान्मध्याह्नपर्यन्ता, सापि तावन्मात्रसाध्ये कर्मणि सम्पूर्णेति जटमल्ल विलासः । रात्रिस्तु तत्र विहितकर्मातिरिक्तकर्मणि निषिद्धा । तदितर खण्डा । तत्र पूर्णायामसन्देहात्खण्डा निर्णेया । तत्र निषेधेन सा निर्णेया तस्य कालमात्रापेक्षितत्वात् किन्तु विधावेव । मन्वादियुगादिग्रहणवैधृति-व्यतीपातेषु विधिविषयेऽपि तत्कालव्यापितैव । तानि कर्माणिद्विविधानि दैवानि पित्र्याणि च । तत्र दैवानि—उपवासैकभक्तनक्तायाचितव्रतदान रूपाणि । अह्नश्च प्रातःसङ्गवमध्याह्नापराह्णसायाह्नात्मकः पञ्चधाविभाग एव प्राह्यः । तत्रोपवासोऽहोरात्राभोजनपालनरूपः । तदहोरात्रावच्छिन्न द्वितीयभोजनाभावविशिष्टं मध्याह्नभोजनमेक भक्तम् । तादृशमेव प्रदोषभो जनं नक्तम् । अयाचितलब्धस्य तादृशमेव सकृद्भोजनमयाचितम् । एत विशेष्यमात्रं मध्याह्नादिसाध्यम् । विशेषणांशस्त्वहोरात्रसाध्य एव । तत्र यस्य कर्मणो यः कालस्तद्व्यापिनीतिथिस्तत्र कर्मणि ग्राह्येत्युत्सर्गः । तत्र कर्म-कालव्याप्तौ पञ्चपक्षाः । पूर्वेद्युरेव साकल्येनैकदेशेन वा । परेद्युरेव वा तथा उभयेद्युः कात्स्न्र्येन सा । उभयेद्युरेकदेशेऽपि न सा । उभयेद्युरेकदेशेनैवेति । अन्त्येऽपि द्वैधम् । साम्येन वैषम्येणवेति । तत्र या एकत्रैव कात्स्न्र्येनैकदेशेन वा कर्मकालव्यापिनी सा सैव ग्राह्या । क्वचिदपवादो वक्ष्यते । वैषम्येण व्याप्तौ यदा याधिककालयोगिनी सा ग्राह्या । साम्येन व्याप्तौ यत्कर्म मध्याह्नादावेवोपक्रम्य वा मध्याह्नादावनुष्ठीयमाने कर्मणि साम्येन तदेकदेशस्पर्शस्तेषु तेषु कर्मकालव्याप्तानिर्णयेषु निर्णयो युग्मवा-

क्षयादिभिः। तत्र द्वितीयातृतीययोः पूर्वातिथिरुत्तरविद्धा, उत्तरतिथिः पूर्वविद्धा कार्या। एवं कृष्णत्रयोदशी चतुर्दश्योरपि। इति **दैवकर्मसु निर्णयः**।

पित्र्ये तु तिथिसाम्ये तद्वृद्धौ वा परा पूज्या। तत्क्षये पूर्वेति। **माधवस्तु**—तिथिविशेषमुपजीव्य प्रवृत्तशास्त्राणां कर्मकालव्याप्तिशास्त्रात् दुर्बलत्वं यतस्तिथिरङ्गं कर्मप्रधानमतः पूर्वाह्णैव देवानामिति शास्त्रबोधित त्रिमुहूर्त्तपञ्चमुहूर्त्तान्यतररूपपूर्वाह्णरूपकर्मकालव्याप्त्यैव दैवकर्मसु निर्णयः। परदिन एव त्रिमुहूर्त्तव्याप्तौ क्षयगामित्वे त्रिमुहूर्त्तामपि परां हित्वा पूर्वेद्युरेवानुष्ठानम्। वृद्धिगामित्वे सा च परेद्युः। इतरेषु तु पक्षेषु पूर्वत्रैवेति **माधवः**।

ननु प्रतिपद्द्वितीयायुता, द्वितीयायुता च प्रतिपद्ग्राह्या। एवं चतुर्थीतृतीययोरपि स्मृतिषूक्तम्। एवं च विरोध इति चेन्न। शुक्लपक्षे उदयगामिन्यास्तिथेः कृष्णपक्षे अस्तगामिन्यास्तिथेर्ग्राह्यतयाऽविरोधात्। क्वचित्कर्मविशेषेणापि व्यवस्था वक्ष्यते। एवञ्च मानान्तरेण पूर्वस्याः परस्या वा तिथेर्ग्राह्यत्वे सिद्धे तदर्हभागे तिथेरभावेऽपि तत्रैव तत्कर्मानुष्ठानम्। उदयास्तगामिन्योः साकल्यस्य **देवलेनोक्तेः**। इदमुदयोत्तरमस्तात्पूर्वं वा वर्त्तमानतिथेर्ग्राह्यत्वम्। **साकल्यं** च त्रिमुहूर्त्तसत्त्वे एव नतु न्यूनत्वे। क्वचिद्द्विमुहूर्त्तायाऽपि ग्राह्यत्वकथनं त्रिमुहूर्त्तविश्यं ग्राह्येत्येतत्परम्। अपिशब्दघटितत्वात्तद्वाक्यस्य। दानस्नानादौ द्विमुहूर्त्तानुकल्प **इत्यन्ये**। **अन्त्यात्पूर्वं** तु त्रिमुहूर्त्तसत्त्वेवापेक्षिता। एवं वेधिकाऽपि त्रिमुहूर्त्तैव वेधिका न न्यूना। एवञ्चोत्सर्गतो दिवैव वेधव्यवहारः। क्वचिद्रात्रिकार्ये रात्रिवेधोऽपि। यदिदमापादितसाकल्येन तत्तत्काले तत्तत्तिथ्यभावेऽपि कर्मानुष्ठानं तन्मन्वादिग्रहणवैधृतिव्यतीपातकर्त्तव्यस्नानश्राद्धाद्यतिरिक्तविषयम्। तेषां तु तत्कालावर्त्तिन्यामपि निर्णयेन प्राप्तानां तत्तत्तिथिमध्य एवानुष्ठानम्। न तत्तत्कालप्रतीक्षा। **उपवासे तु**—शुद्धत्रिमुहूर्त्ताधिकायां सत्यप्युत्तरस्यायुग्मत्वे कालव्याप्तिवशात्पूर्वैव। या तु शुद्धाप्युत्तरदिने नास्त्येव, त्रिमुहूर्त्तन्यूना वा साऽयुग्मापि पूर्वैव। परन्तु तस्यां न मुख्योपवासः।

किन्त्वनुकल्पः । न्यूनया वेधेत्याज्यत्वबोधकानि, यानि च त्रिमुहूर्तेन्यूनाया अपि ग्राह्यत्वबोधकानि, तानि तन्निन्दास्तुतिपराणि एकादशी विषयाणि वा । एकमूलकल्पनालाघवात् । या तु त्रिमुहूर्तपूर्वतिथिविद्धोत्तरदिने त्रिमुहूर्त्ता सा परयायुग्मत्वे सति परैव । युग्मत्वादुपक्रमकाले सत्वात् । या तु तादृशी पूर्वतिथ्या युग्मा सा पूर्वैव । युग्मत्वादहोरात्रसत्वाच्च । अस्तमयवर्तिन्या अपि आपाद्य साकल्येन सङ्कल्पकालेऽपि सत्वाच्च । **सङ्कल्पश्च**–प्रातःकालवर्त्तमानतिथिमेवकर्मकालयुक्तत्वेनरूपेणाधिकरणतयोल्लिख्यामुकतिथ्युपवासमहं करिष्य इति । अनेकदिनसाध्येत्वद्यप्रभृतितावदन्तं करिष्य इति । स च शङ्खशुक्ताश्मकांस्यरूप्यताम्रमयपात्रे साम्रमूलदर्भत्रयफलपुष्पान्विते जलं गृहीत्वा पूर्वदिङ्मुखेनोत्तरदिङ्मुखेन वा जलाशयादितीरे ऐशान्यां जलप्रक्षेपेण कार्यः । पात्राभावे हस्तेनापि । मृन्मये तु सर्वथा वर्ज्यम् । उपवासोत्तरदिने च भोजनात्मकं पारणं तत्तत्तिथ्यन्ते सतिसम्भवे पूर्वाह्ण एव कार्यम् । पारणं चोपवासाङ्गम् । भोक्ष्येऽहं पुण्डरीकाक्षेति सङ्कल्पविषयत्वात् । अपूप्राशनरूपप्रतिनिधिविधानाच्च । एवमेकभक्तनक्तादिष्वपीति **माधवः** । उपवासएवेत्यन्ये । तिथिनक्षत्रोभयव्रते उभयान्ते पारणम् । यदि तु दिवा तिथ्यन्तादिप्रतीक्षया कालो न लभ्यते तदा न तत्प्रतीक्षा, किन्तु दिवैव । धारणपारणाख्ये व्रते रात्रावपि तत् । एवं **जन्माष्टमीव्रतेऽपि** । तत्रापि महानिशा वर्ज्यैव । यामत्रयोर्द्ध्वगामिन्यां प्रातरेव हि पारणमित्यत्र मूलं चिन्त्यम् । तत्र प्रतिपदुपवासे शुक्ला कृष्णा वा पूर्वैव । यद्यपि सूर्यास्तपूर्वत्रिमुहूर्त्तात्मकसायाह्नमात्रव्याप्त्यापि पूर्वविद्धा भवति, एषैव **संमुखीत्युच्यते** तथापि प्रतिपत् तत्पूर्वभावि त्रिमुहूर्त्तात्मकापराह्णेऽपि यदि वर्त्तते तदैव पूर्वा । अन्यथा तु परैव । उपवासेतरदैवकर्मसु कृष्णा उत्तरविद्धा, शुक्ला तु तेष्वपि पूर्वैव । आपराह्णिके अन्यथा परैव । **माधवस्तु** उपवासेऽपि कृष्णोत्तरैवेत्याह । उपवासेतरदैवकर्मसु शुक्ला सायाह्नमात्रव्यापिन्यप्यनुकल्प्यत्वेन ग्राह्येतिचाह । **इति प्रतिपन्निर्णयः** ।

अथ द्वितीया। द्वितीया तु कृष्णा पूर्वा, शुक्ला परा।उपवासादि सर्वदैवेषु। केचित्तु युग्मवाक्यमात्रादरेण सर्वाऽपि द्वितीया परैवेत्याहुः प्राक्तयाः। यापि कृष्णा उपवासादौ पूर्वा, सा यदि त्रिमुहूर्त्तात्मके पूर्वाह्णे प्रविष्टा चेत्तदैव। नोचेत्सापि परैव, यदि परदिने त्रिमुहूर्त्तास्ति। ततो न्यूनत्वे सर्वथा अभावे वा पूर्वैव। एवं या शुक्लापि परदिने त्रिमुहूर्त्तन्यूना नास्त्येव, सापि पूर्वैव। इति द्वितीया।

तृतीयातु—रम्भाव्रतातिरिक्तेषूपवासादि सकल दैवकर्मसु चतुर्थीयुता ग्राह्या। द्वितीयाविद्धा च त्याज्या। अत्रैतत्कर्त्तव्यरम्भाव्रतादतिरिक्तगौरीदैवत्यव्रतेषु यद्द्वितीयायावेधकत्वमुत्तरविद्धाया ग्राह्यत्वम्, तत्र न त्रिमुहूर्त्ताग्रहः। किन्त्वरूपयापि पूर्वतिथ्याविद्धा त्याज्या। उत्तराचाल्पापि ग्राह्येति केचित्। यदा चतुर्थीयुता न किञ्चिदपि लभ्यते तदा गौरीव्रतेष्वपि त्रिमुहूर्त्तालाभेचेतरेष्वपि द्वितीययुतापि ग्राह्या। अन्येत्वत्रापि त्रिमुहूर्त्तादर एव कलाकाष्ठापीत्यपि शब्दस्वरसादित्याहुः। अन्येषु तु सर्वेषां त्रिमुहूर्त्तादरः। कलाकाष्ठादिरूपमल्पत्वं च मुहूर्त्तरूपमिति। रम्भाव्रतेतूपवासानुपवासरूपे सर्वत्र द्वितीयाविद्धैव। वैशाखशुक्लतृतीयायामक्षयतृतीयाव्रतमप्युत्तरविद्धायामेव कार्यम्। यत्तु शुद्धाधिक्येऽपि तृतीयायाः शुद्धामपि हित्वाऽधिकाचतुर्थीयुतैव गौरीव्रते ग्राह्येति माधवेनोक्तं, तच्चिन्त्यम्। इति तृतीया।

चतुर्थी तु विनायक नाग गौरीव्रतान्युपवासपूजारूपाणि हित्वाऽन्यदैवत्ये उपवासे व्रतान्तरे वा पञ्चमीयुतैव। विनायकनागव्रतयोस्तु मध्याह्नव्यापिनी। तत्रापि वैनायके यदा परेद्युरेव मध्याह्नव्याप्तिः, सम्पूर्णाधिका वा तदैव परविद्धा। इतरेषु तु सर्वपक्षेषु तृतीयायुतैव। गौरीयोगप्राशस्त्यात्। नागव्रते तु पूर्वेद्युरेव मध्याह्नव्याप्तौ पूर्वा। अन्ये तु सर्वपक्षेषूत्तरा, पञ्चम्या नागतिथित्वेन तद्योगस्य तत्र प्राशस्त्यत्वात्। गौरीव्रते तु तद्दैवत्यतृतीयायोगस्य प्रा-

स्तत्वातृतीयायुतैव । बहुलाव्रतेऽप्येवमेव । प्रतिमासक्रियमाणसङ्कष्ट-चतुर्थीव्रते तु चन्द्रोदयव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तौ, तदव्याप्तौ वा पूर्वविद्धा, मातृविद्धा प्राशस्त्यात् । इति चतुर्थी ।

पञ्चमी तु-उपवासादिसर्वकर्मसु चतुर्थीविद्धैव । **नागव्रते स्कन्दव्रते** च परविद्धैव । सापि त्रिमुहूर्तचतुर्थीवेधे परदिने त्रिमुहूर्तसत्वे । अन्यथा तु पूर्वैव । **हेमाद्रिगौडाश्च** कृष्णापञ्चमी पूर्वा, शुक्ला परेत्याहुः । उपवासे पूर्वा । तदितरकर्मसु परविद्धेत्यपि पक्षान्तरं **हेमाद्रिः** । इतिपञ्चमी ।

षष्ठी तु स्कन्दव्रतातिरिक्ते सर्वत्रोपवासादौ सप्तमीविद्धा । अत्र च षण्मुहूर्तपञ्चमीविद्धा त्याज्या, न तु त्रिमुहूर्तविद्धापि । **स्कन्दषष्ठी** तु षण्मुहूर्तपञ्चमीयुता पूर्वैव । **माधवस्तु** त्रिमुहूर्तपञ्चमीयुतैव पूर्वा । षण्मुहूर्ततद्युता तु परैवेत्याह । अयं च षण्मुहूर्तविद्धषष्ठीनिषेधो नक्तैकभक्तादिव्यतिरिक्तविषय इति **हेमाद्रिः** । तदपि पूर्वदिनएव मध्याह्नादिव्याप्तौ द्रष्टव्यम् । इति षष्ठी ।

सप्तमी तु—उपवासादि सर्वकर्मसु पूर्वविद्धैव । यदा तु पूर्वेद्युरस्तमयपर्यन्ताषष्ठी, परेद्युश्च क्षयवशादष्टम्याविद्धा सप्तमी, तदा गुणानुरोधेनलोपस्यान्याय्यत्वान्निषेधमतिक्रम्याप्युत्तरविद्धा गौणकालत्वेन स्वीकृत्य तत्रैवोपवासादि सर्वं कर्मकार्यमिति **सप्तमी** ।

अष्टमी तु शुक्लोत्तरा, कृष्णा पूर्वोपवासादिसर्वकर्मसु ग्राह्या । **दूर्वाष्टमी** तु शुक्लापि पूर्वविद्धैव । इदञ्च व्रतं ज्येष्ठामूलरहितायां भाद्रपदशुक्लाष्टम्यां सिंहस्थ सूर्येऽनुदितेऽगस्त्ये च मध्याह्नव्यापिन्याम् । शुक्लेऽगस्त्योदये मा-विनि सुसन्निहित तत्पूर्वकृष्णाष्टम्यां कार्यम् । भाद्रस्याधिमासत्वेप्येवम् । किं बहुना । अगस्त्ये उदिते वार्षिकस्त्रीव्रतानि निखिलान्यपि न भवन्ति । एवं च पूर्वस्याः कर्मकालस्पर्शे सत्यपि वा तत्स्पर्शे ज्येष्ठामूलान्यतरयोगे उत्तरा तद्रहिता कर्मकालस्पर्शिन्यपि दूर्वाव्रते ग्राह्या । आपाद्य साकल्यसत्वात् । अनुष्ठानं तु रौहिणमुहूर्तएव । नित्यंचेदम् । तेन यत्पर्वे

ज्येष्ठामूलरहितायां अलाभस्तत्राप्यनुकल्पेनैकभक्तेनानुष्ठानं, न तु सर्वथा त्यागः। अन्यद्वारा च पूजा। ज्येष्ठामूलेति निषिद्धकालमात्रोपलक्षणम्। अनिषिद्धेऽपि काले ब्राह्मणेभ्यः पिष्टकदानानन्तरमनग्निपक्वभोजनं कार्यमिति **निर्णयामृते**। निषिद्धकालेत्वनग्निपक्वैकभक्तम्। यत्तु भाद्रपद शुक्लाष्टमीमारभ्य कृष्णाष्टमीपर्यन्तं कर्त्तव्यं **महालक्ष्मीव्रतम्**, तदुपक्रमे इतरव्रतवन्नवमीयुतायामेव, ज्येष्ठायुतायामसम्भवे केवलायामपि नवमीयुतायाम्। **अस्य च सिंहस्थरवौ प्रारम्भः, कन्यास्थे समापनम्**। समापनं तु यत्कृष्णाष्टम्यां तच्चन्द्रोदयव्यापिन्यां **चन्द्रार्घदानोक्तेः**। उभयदिने तदृव्याप्तौ कृष्णत्वात् पूर्वा। तत्रापि यदि चन्द्रोदयोत्तररात्रिमुहूर्त्तस्पर्शिनी तदोत्तरैव। तस्यां च नवमीवेधो हस्तोत्तरदलकत्वं त्रिस्पृशत्वमवमत्वञ्चेति दोषचतुष्टयं वर्ज्यम्। पुष्ययोगे तु प्राशस्त्यमिति **निर्णयामृते**। अस्यव्रतस्यारब्धस्योक्ते निषिद्धकाले यदा समाप्तिप्रसक्तिस्तदर्घे नास्यारम्भः कार्यः। द्वितीयादि प्रयोगस्यतु निषिद्धेऽपि समापनम्। यत्तु-भाद्रपदशुक्लाष्टम्यामेवालक्ष्मीनिवृत्तये ज्येष्ठाशब्देनालक्ष्मीःपूजा क्षीणामुक्त्वा तत्र यैव ज्येष्ठायुता सैव ग्राह्या। अत्र कन्यार्कयोगेन प्राशस्त्यम्। मासस्तुभाद्रश्चान्द्र एव। न तु तद्युक्तिथ्यन्तरे। अत्राष्टमी परैव। दिनद्वयेऽपि तद्योगे तु मध्याह्नादूर्ध्वं नक्षत्रयोगसत्त्वे परा। अन्यथा रात्रावपि तद्योगे पूर्वेवेति कोचित्। केवलज्येष्ठर्क्षेऽपि विहितं व्रतान्तरम्, तत्तु मध्याह्नोत्तरमपि यद्दिने ज्येष्ठाव्याप्तिस्तद्दिनएव। न्यूनत्वे तु पूर्वदिन एव। तिथिविषये तु मध्याह्नादूर्ध्वं सत्ताऽवश्यकीत्यन्ये। भानुवारयुतज्येष्ठर्क्षस्यैव "**नीलज्येष्ठेति**" नाम केवलनाक्षत्रव्रते इत्येके। भानुज्येष्ठायुताष्टम्या एवेदं नामेति **माधवादयः**। यत्तु-मिलितशिवशक्तिदैवत्यव्रतं, तत्र पक्षद्वयेऽपि नवमीयुताष्टमी। एतद्विषया एव सप्तमीविद्धा निषेधाः। इत्यष्टमी।

नवमी पक्षद्वयेप्यष्टमीयुतैव सर्वकार्येषु। **रामनवमीव्रते** तु मध्याह्नव्यापिनी सा। मध्यह्नश्च पञ्चधाविभागेन, त्रेधाविभागेनेति केचित्।

आवर्त्तनाख्यमुहूर्त्त एव वा । अत्र मध्याह्नः कृष्णाष्टम्यां मध्यरात्रवदिति परे । दिनद्वयेऽपि मध्याह्नव्याप्तौ तदव्याप्तौ तदेकदेशव्याप्तौ वा या पुनर्वसुयुता सा कार्या । तादृश्या दिनद्वयेऽपि पुनर्वसुयोगे मध्याह्ने तद्योगवती ग्राह्या । दिनद्वयेऽपि मध्याह्ने तद्योगे मध्याह्नं विहाय वा तद्योगे सर्वथाऽयोगे चोत्तरैव । इयंसर्वान् प्रति नित्येत्येके । **रामोपवासकान् प्रत्येव तथेत्यन्ये । इति नवमी ।**

दशमी तु दिनद्वयेऽपि कर्मकालव्यापिनी, परा वा पूर्वा वा यथेच्छया ग्राह्या । अन्येषु पक्षेषु पूर्वेति **हेमाद्रिः । माधवस्तु**-कालव्याप्त्यानिर्णये शुक्लकृष्णवाक्याभ्यां व्यवस्थामाह । दशमी सर्वापि **पूर्वेत्यन्ये । इति दशमी ।**

एकादशी तु सर्वकार्येषु द्वादशीयुतैव । उपवासे तु निर्णेष्यते । **इत्येकादशी ।**

द्वादशी तु सर्वकार्येष्वेकादशीयुतैव । तत्र यदैकादशीद्वादश्युपवासौ खण्डतिथित्वादेकदिने प्राप्नुतस्तदोपक्रमप्रभृति तन्त्रेण कार्यौ । यदा तु तिथेरखण्डत्वादुपवासद्वयं नैरन्तर्येण प्राप्नोति तदा प्रक्रान्तद्वादश्युपवासेन प्रधानानुरोधादेकादश्युपवासाऽपारणं वाधित्वोपवासद्वयं कार्यम् । अनुपक्रान्त तदुपवासेनतु नोपक्रमितव्य एव स इत्येके । **माधवस्तु**—अद्भिः पारणं कृत्वोपक्रान्तानुपक्रान्तो वा द्वादश्युपवासः कार्य एवेत्याह । अन्यतिथिष्वपि नैरन्तर्येणोपवासप्राप्तावयमेव निर्णयः । **इति द्वादशी ।**

त्रयोदशी तु कृष्णोत्तरा । शुक्ला पूर्वा । उपवासादि सर्वकर्मसु या च शुक्ला त्रयोदशी पूर्वा ग्राह्या सा न सायाह्नमात्रव्यापिनी, किन्त्वापराह्णिक्यपि । **कामत्रयोदशी** त्वनापराह्णिक्यपि पूर्वैव शुक्ला । सा कृष्णापि परदिने न लभ्यते तदा पूर्वाऽपि । **इति त्रयोदशी ।**

चतुर्दशी शुक्ला परा । कृष्णा पूर्वा, उपवासे तु पक्षद्वयगापि परैव । रुद्रदैवत्योपवासे तु पक्षद्वयगाप्यापराह्णिकीचेत्पूर्वैव । आपराह्णिक्य-

लाभेस्त्रयापि परैव । एवं कृष्णापि पूर्वालाभे परैव । **दमनकपविद्धारोपणयोस्तु** शुक्लेऽपि चैत्रश्रावणचतुर्दश्यौ रात्रियोगिन्यौ पूर्वे एव ग्राह्यौ । इदमपि दिवेत्यन्ये । **अनन्तचतुर्दशी** तु त्रिमुहूर्तात्मकं पूर्वाह्णव्यापिनी ग्राह्या । दिनद्वयेऽपि तद्व्याप्तौ पूर्वैव । सम्पूर्णत्वात् । दिनद्वयेऽपि तदेकदेशव्याप्तौ यत्र कर्मकालपर्याप्ता सैव । अन्यथा पूर्वैव । मध्याह्नगौणकालमुख्योभयव्याप्तेः । **शिवरात्रिस्तु** वक्ष्यते । **इति चतुर्दशी** । **पञ्चदशी** च शुक्ला कृष्णा च सावित्रीव्रतातिरिक्ते सर्वत्रोपवासादौ परविद्धैव ग्राह्या । सावित्रीव्रते तु पूर्वविद्धैव, शुक्ला च । कन्यामकरमीनतुलामिथुनस्था तु द्विविधाऽपि तत्तत्पुरस्कारेणविहितश्राद्धव्रतादौ रविव्रतादौ च पूर्वविद्धैव । अत्र पूर्वविद्धयोः कर्त्तव्यमपि सावित्रीव्रतं नवमूहूर्त्तात्मकभूतविद्धयोर्नकार्यमिति **माधवः** । अन्ये तु यत्र भूतविद्धा निषिद्धा तत्र तावद्विद्धा न कार्या । सावित्रीव्रतं तु तावद्वेधेऽपि कार्यमेवेत्याहुः । **इति पञ्चदशी** ।

अथ जन्माष्टमी—सा च पूर्णिमान्तमासपक्षे भाद्रपदकृष्णाष्टमी । दर्शान्तपक्षे श्रावणकृष्णा । सा द्विविधा, शुद्धा विद्धा च । तत्र सप्तमीयोगरहिता शुद्धा, तद्युक्ता विद्धा । अत्र रात्रिमात्रसत्वेऽप्यष्टम्याविद्धत्वमिति **माधवादयः** । अत्र त्रिकालपूजाप्युक्ता । तथाप्यर्द्धरात्रपूजा प्रधानमिति च । अतएवार्द्धरात्रोऽत्र मुख्यः कालः । मुख्यस्यप्रधानकाल इति हेतोरित्येके । असाधारण्येन निर्णायकत्वात् मुख्यः काल इत्यन्ये । उपवासोऽप्यत्र प्रधानमित्येके । कर्तृसंस्कारकतयाङ्गमित्यन्ये । अत्राष्टम्यारोहिणीमात्रयोगे जयन्तीत्वमिति **दाक्षिणात्याः** । अर्द्धरात्रे एव तद्योगे जयन्तीत्वमिति **प्राच्याः** । जयन्तीव्रतं भिन्नमभिन्नं वेति तु न विचार्यते। भेदवादिनोप्युभयसन्निपाते जयन्तीव्रतानुष्ठानस्यैव सम्मतत्वात् । सेयं द्विविधाप्यष्टमी प्रत्येकं द्विधा । परदिने सूर्योदयोत्तरं सती असतीचेति । तादृश्यपि पुनः प्रत्येकं द्विधा । रोहिणीसहिता तद्रहिताचेति । तत्र शुद्धायां विद्धायां च रोहिणीसहितायां तद्रहितायां परदिने सूर्योदयोत्तरम-

सत्यां विवाद एव न। द्वितीयदिनेऽष्टम्यभावात्। शुद्धाधिकायाविद्धाधिकाया अन्यत्रैव रोहिणीयोगे यैव रोहिणीयुता सैव ग्राह्या। तेन परदिन एव रोहिणीयोगे निशीथव्यापिन्यपि। किंबहुना। शुद्धामपि पूर्वां त्यक्त्वा परैव ग्राह्या। केचित्त्वेतादृशशुद्धविषये पूर्वेद्युरेव व्रतमाचरन्ति, तदाऽग्रहमात्रमित्यन्ये। रोहिणीयोगस्य मुख्यतया निर्णायकत्वम्। तेन सन्देहे निशीथस्य, तेनापि सन्देहे नवमीयुक्तत्वादि निर्णायकत्वं वदन्तः।

केचित्तु—अर्द्धरात्रएव मुख्यो निर्णायकः। रोहिणीयोगस्तु तेन निर्णयासम्भवे निर्णायकः। शुद्धायान्तु सन्देहाभावान्नास्यप्रवृत्तिरित्याहुः। तन्मते तादृश शुद्धाविद्धाविषये च पूर्वदिन एव व्रतम्। शिष्टाचारोप्येवमेव। अस्तु वा विद्धाविषये तथा, शुद्धाविषये तु पूर्वत्रैवानुष्ठानं युक्तम्। या तु शुद्धाधिकपूर्वदिने निशीथे तद्विहाय वा रोहिणीयुक्ता, सा सैवोपोष्या। विद्धाधिका परदिने च रोहिणीयुक्ता दिनद्वये वा रोहिणीरहिता सा पूर्वैवोपोष्या। या तु विद्धाधिकान्तरदिने एव निशीथे रोहिणीयुक्ता, सा सैवोपोष्या। विद्धाधिकार्यदिनद्वयेऽपि निशीथे रोहिणीयोगे परैव। तत्र घटिकाद्वयरूपार्द्धरात्रव्यापित्वे सत्यमेव। अत्र मूलम्—अर्द्धरात्रादधश्चोर्द्धमेकार्धघटिका तथा। रोहिणी चाष्टमी ग्राह्या उपवासव्रतादिष्विति माधवीये योगीश्वरः। तदभावे आद्यन्तार्द्धघटीद्वयव्यापिनी ग्राह्या। तत्र सप्तमीविद्धायां पूर्वार्द्धावसानेऽर्धघटीयोगः। नवमीयुतायामुत्तरार्द्धघटीयोगः। पच्छादियोगस्तु दुर्ज्ञेयत्वान्ननिर्णायकः। विद्धाधिकायादिनद्वयेऽपि निशीथं विहाय रोहिणीयोगोऽनेकैः प्रकारैः। पूर्वेद्युर्निशीदूर्ध्वं प्रवृत्तयोस्तिथिनक्षत्रयोः परेद्युर्निशीथादर्वागेव समाप्त्ययोः ऋक्षस्य पूर्वेद्युर्निशीथादर्वागेव प्रवृत्तस्य परेद्युस्तस्मादर्वाक् समाप्तस्य तिथिमात्रस्य वा तथा प्रवृत्तिसमाप्त्या, षषु तत्रैव व्रतम्। तृतीयप्रकारे केचित्पूर्वत्र व्रतमिच्छन्ति। दिनद्वयेऽपि निशीथव्यापिनी पूर्वेद्युरेव रोहिणीयुक्ता यदि तदोत्तरैव। केचित्त्वीदृशे विषये पूर्वामिच्छन्ति ते मान्याः। यापि दिन-

द्वयेप्यर्द्धरात्रादन्यत्र रोहिणीयुक्ता, परेद्युरेव निशीथव्यापिनी, सापि परैव । **तथा**–विद्धाधिकादिनद्वयेऽपि रोहिणी योगरहिता **सापि त्रिधा**–अन्यतरत्रैव निशीथे वर्तमाना, दिनद्वयेऽपि तादृशी, दिनद्वयेऽपि तदस्पर्शिनी चेति । तत्राद्ये यादृशी सा ग्राह्या । अन्त्ययोस्तूत्तरैव ।

वैष्णवास्तु—अर्द्धरात्रव्यापिनीमपि, रोहिणीयुतामपि, सप्तमीविद्धां परित्यज्य नवमीयुतैव ग्राह्येति **नृसिंहपरिचर्याध्यनुयायिनः** । अस्यामेव नवमीबुधसोमान्यतरयोगेन प्राशस्त्यम् ।

पारणं तु—केवलाष्टम्युपवासे पारणादिने तिथ्यनुवृत्तौ तदन्ते कार्यम् । रोहिणीयुक्ताष्टम्युपवासे तु पारणदिने । उभयानुवृत्तावुभयान्ते । तदपि यदि सार्द्धद्वययामोपरितनैकयामात्मकमहानिशातोऽर्वागुभयान्त प्रतीक्षया भोजनकालो लभ्यते तदा । यदा तु तादृशे काले उभयान्तो न लभ्यते, तदैकतरान्त एव । यदा तु महानिशाऽव्यवहित पूर्वक्षणएवैकतरस्याप्यन्तस्तदा महानिशायामपि तदिति **हेमाद्रिः** । तदा दिन एवेति **गौडाः** । **इदमेव युक्तम्** । अशक्तस्यतूत्सवान्त एव । **इदं च नित्यं काम्यम्** । एतदकरणे प्रायश्चित्तं तु प्राणायामशतम् । अशक्तौ प्रतिनिधिरुक्तः, एकब्राह्मणभोजनं, सहस्रंगायत्रीजपो वा द्विगुणान्नदानं वा, द्वादशप्राणायामा वा । काम्यमेव नित्यत्वबोधकविषयस्तु सन्दिग्धमूलाः । आरब्धव्रतं प्रति वा नित्यत्वबोधका **इत्यन्ये** । **इति जन्माष्टमी** ।

अथैकादशी । अत्र केचित् सर्वैः शक्तैः शुक्लायां कृष्णायां च कालमात्रावच्छेदेन **सकलादनीयाभ्यवहरणन्त्याज्यमेव । भोजननिषेधस्मृतेः** । अस्यां भोजननिषेधो नित्य एव ॥ नित्यकाम्यमहोरात्रावच्छिन्नाभोजनसङ्करूपरूपं व्रतं चात्र । तत्रोभयोरेकदिनप्रसक्तौ व्रतानुष्ठानेनैव निषेधपरिपालनसिद्धिः। तत्र निषेधे पक्षद्वयेपि सर्वेषामधिकारः। व्रते तु पक्षद्वयगतेऽपि । नित्ये **गृहस्थव्यतिरिक्तानामावालवृद्धातुराणामधिकारः** । **बालश्चाष्टवर्षपर्यन्तः** । गृहस्थस्य समर्थक-

स्त्रीणां च शुक्लायामेव । शयनीबोधिनीमध्यवर्तिकृष्णायां च । पुत्रवद्गृहस्थस्य तु तस्यामपि नोपवास इति **हेमाद्रिः** । **यद्वा**—पुत्रवद्गृहस्थस्यैवेतरकृष्णापर्युदासः । शयनीबोधिनीमध्यवर्तिनी तु तस्यापि ।

काम्यं तु—सर्वगृहस्थेनापि कृष्णायां कार्यमेव । वक्ष्यमाणलक्षणैर्वैष्णवैः पुत्रवद्भिरपि नित्यव्रतं कृष्णायामपि कार्यमेव । **यत्तु**—रविवारादौ पुत्रवद्गृहिण उपवासपारणयोर्निषेधः स तन्निमित्तकस्य, न तु तदधिकरणकैकादश्यादि निमित्तकस्यापि । पारणमपि शनिवाराद्युपवासाङ्गभूतं रव्यादौप्राप्तं निषिध्यते । तेनापि तदङ्गकोपवासनषिध एव द्रष्टव्यः । व्यतीपातश्राद्धादावुपवासनिषेधस्तु काम्योपवासविषयः । नित्योपवासस्य श्राद्धदिने प्राप्तौ तु तदा पितृसेविताघ्राणमात्रं कार्यमित्याहुः ।

अन्ये तु—भोजननिषेधस्मृतिरपि व्रतपरैव । तद्विध्येकवाक्यत्वात् । **इदं च काम्यमेव** । गृहीतैकादशीव्रतं प्रत्येव तु **नित्यम्** । तस्यैव त्यागे दोषश्रवणात् । अत एव **वाराहपुराणे**—सर्वास्वेकादशीषूपवासमभिधाय तदशक्तौ चातुर्मास्यैकादशीषु, तदशक्तौ मासद्वयैकादशीषु, तदशक्तौ एकस्यामपि नक्ताद्यनुष्ठानेन सिद्धिर्दर्शिता । **किञ्चात्रापि पूजैव प्रधानमुपवासस्त्वङ्गमित्याहुः** । अत्र जीवत्पतिकायाः पत्यनुज्ञयैव नित्यं काम्यं वा व्रतादि । विधवाऽपि यदधीना तदनुज्ञयैव । तस्याः पुष्पालङ्कारगन्धधूपाञ्जनदन्तधावनादित्यागोऽपि व्रताङ्गत्वेन विहितो न भवति । रजोदर्शनेऽप्युपवास तदङ्गनियमाश्च स्वयं कार्याः । पूजादिकमन्यद्वारा । **एवमाशौचादावपि** ।

यत्तु—तदङ्गभूतदानहोमादि, तदन्ते स्वयमेव कार्यम् । वैश्यशूद्रयोर्द्विरात्राधिककालव्याप्ति निषिद्धः । **अत्र सर्वत्र भक्ष्यत्यागेनोपवासो मुख्यः** । तदसामर्थ्यं क्रियाऽनुकल्पः । स च पञ्चगव्य आज्यक्षीरतिलफलौदन हविष्यान्नक्तानि पूर्वपूर्वाभावे । ओदनशब्देन भक्ष्यभोज्यलेह्यरूपं **त्रिविधं गृह्यते** । भक्ष्यं रोटिकादि, भोज्यं भक्तपक्वान्नादि । जिह्वया गृहीत्वा यद्विलीयते तल्लेह्यम् । एवञ्च पेयचोष्येऽनोदनमित्याहुः

प्राच्याः । नक्तस्याप्यसम्भवेऽयाचितैकभक्ते जन्माष्टमीप्रकरणोक्तानि च । फलं मूलादेरुपलक्षणं क्षीरदध्यादेश्च ।

हविष्यानि च । कलापकङ्कुनीवारा वास्तुकं हिलमोचिका । हैमन्तिकं सितास्विन्नं धान्यमुद्गायवास्तिलाः । षष्टिका कालशाकं च मूलकं केमुकेतरत् । लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी । पयोऽनुघृतसारं च पनसाम्रहरीतकी । तिंतिडी जीरकं चैव नागरं गजपिप्पली । कदली लवली धात्री फलान्यगुडमैक्षवम् । अतैलपक्वं मुनयो हविष्यानि प्रचक्षते । शाम्भवं लवणमप्यन्ये । मूलकं च पटोलं च त्रपु संसूरणादियत् । कन्दोपलक्षणमिदम् । कोशकारप्रभेदाश्च विकारा गुडवर्जिताः । हविष्यानि च शृङ्गाराः शालूकादि विसादि यदित्यन्यत्र । गोधूमा अप्यापदि **तथेत्यन्ये** । नारिकेलश्यामाकावपि **परे** । अत्र सङ्कल्पे तत्तदाहारो निराहारो वेत्युल्लिखेत् । क्रियानुष्ठानेऽप्यसमर्थः पुत्रभार्याभ्रातृदौहित्रभगिनी शिष्यैः कारयेत् । दक्षिणां तु दत्वा ब्राह्मणद्वारा वा । तेषां पूर्णोपवासफलमधिकमपि । राजा पुरोहितद्वारापि दक्षिणां विनापि । नित्यस्याप्यशक्तेन बुद्धिपूर्वक **सर्वथाकरणाभ्यासे प्रायश्चित्तं चान्द्रायणम् । एवमष्टमीचतुर्दश्योर्दिवाभोजने, पर्वणि नक्तभोजने च ।**

काम्ये प्रतिनिधिस्तूपक्रमोत्तरम् । अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् । प्रमादेनाज्ञादि भक्षणमप्यव्रतघ्नम् । असकृज्जलपानाच्च सकृत्ताम्बूलचर्वणात् । उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात् । उपवासपदं व्रतमात्रोपलक्षणम् । प्राणात्यये जलपानं कार्यम् ।

अथ व्रताहे वर्ज्यानि । पतित पाखण्डिनास्तिकादिसम्भाषणानृताश्लीलमांसानि । मांसमौषधमपि । तथा काष्ठदन्तधावनाभ्यङ्गपतितसूतिकारजस्वलास्पर्शाभिभाषणे भक्षानुलेपनानि । अन्नस्य स्मृत्यावलोकनगन्धास्वादनकीर्तनेच्छाश्च । अन्यानि च वलकराणि । मैथुनं परदोषु-

स्मरणकीर्तनकेलिप्रेक्षणगुह्यभाषणसङ्कल्पाध्यवसायात्मकमष्टाङ्गमपि । स्वदारेषु तु रेतो विसर्ग एव । सोप्यनृतौ । हिंसाऽऽमिषादि च ।

दशम्यां वर्ज्यानि । कांस्यामिषानृतपुनर्भोजनमैथुनपरान्नद्यूतास्यंबुपानसुरातैलप्रवासदिवास्वापतिलपिष्टक्षारगणतल्पशयनादीनि । भोजनोत्तरं च दन्तकाष्ठं तद्दिने भक्षणीयम् । प्रातश्च सङ्कल्पः कार्यः । तदनन्तरं च देवाय पुष्पाञ्जलिर्देयः । तदनन्तरं त्रिरष्टाक्षराभिमन्त्रितं जलं पेयम् । **विद्धोपवासेत्वेकादश्यां रात्रौ सङ्कल्प इति केचित्** । तदुत्तरं पूजादि । सा च पञ्चोपचारैः, **ॐनमोनारायणायेत्यष्टाक्षरेण** । तदनन्तरं तज्जप्यजपनकथाश्रवणतदर्चनतन्नामकीर्तनश्रवणहोमप्रदक्षिणाप्रणिपातस्तोत्रपाठजयशब्दपुराणश्रवणादिभिर्जागरः कार्यः । ततः प्रातरुपवासं भगवते समर्प्य तुलसीयुक्तेन नैवेद्यशेषेण यथासम्भवं ब्राह्मणैर्बन्ध्वादिभिः सह पारणं कुर्यात् ।

तत्र **पारणाह्ने वर्ज्यानि** । कांस्यमांसमाषतिलपिष्टसुराक्षौद्रलोभानृतव्यायामप्रवासव्यवायादिवानिद्राद्यूताद्यञ्जनाभ्यङ्गतिलपिष्टमसूर क्रोधहिंसालौल्यतैलानिर्माल्यलङ्घनपुनर्भोजनामिषक्षाराणि वर्जयेत् ।

तत्र **ब्राह्मणं न परीक्षयेत्** । केवलं चिन्तयेज्जातिं गुणान्नोविनतात्मजेति । न ब्राह्मणं परीक्षेत कदाचिदपि बुद्धिमानिति । **विश्वामित्रश्च** । दानार्थी यो द्विजं पृच्छेदधीतं च कुलं श्रुतम् । यश्च तस्मै परिक्रूते तावुभौनारकौस्मृताविति । **गौतमश्चेत्यादीनि** विप्रपरीक्षानिषेधकानि, तानि श्राद्धेतरदानपराणि, नित्यश्राद्धपराणि वा । तीर्थश्राद्धपराणि वा । अतिथि पूजापराणि वा । अज्ञातकुलनामानं द्वारदेशमुपागतम् । विपश्चितोऽतिथिं प्राहुर्विष्णुवत्तं प्रपूजयेत् । न वृत्तं न कुलं शीलं नैव विद्यां विचिन्तयेदिति **पुराणात्** । तीर्थे तु ब्राह्मणं नैव परीक्षेत्तु कदाचन । अर्चयेत्समनुप्राप्तं भोजयेन्मनुशासनादिति **मत्स्यपुराणाच्च** । एतदपि विशिष्टब्राह्मणालाभे एव वेदितव्यम् । ननु विशिष्टब्राह्मणालाभे श्राद्धान्तरं किं त्याज्यमेव, नेत्याह **पराशरः** । युगा-

नुरूपतो यस्तु विद्याचारादि संयुतः । सम्पूज्योऽनभिशस्तश्च षट्कर्मनिरतोद्विज इति । **आश्वालयनगृह्ये**—ब्राह्मणान् श्रुतशीलवृत्तसम्पन्नान् तदभावे एकेन वेति । एकेन वा विशिष्टगुणेनयुक्तानित्यर्थः । सुवासिन्यां मृतायां च यच्छ्राद्धं प्रतिवत्सरम् । सुवासिन्यै प्रदातव्यं ब्राह्मणैः सह भोजनम् । **तथा**-वृद्धा सुवासिनी ग्राह्या रजोयुक्ता पतिव्रता । सद्वंशजा वा नारीणामप्रजा न तु रोगिणी । न बालैः सह भुञ्जीत न पुनर्भोजनं तथेति । **इति ब्राह्मणनिर्णयः** ।

अथ देशः । स च दक्षिणनिम्नः । दक्षिणाप्रवणेदेशे श्राद्धं कुर्यात्तुपैतृकमिति **बृहद्पराशरात्** । पैतृकमित्युक्तेरर्थाद्दैवमुदकप्रवणे बोद्धयम् । **गोभिलः**—परकीयप्रदेशेषु श्राद्धं यत्क्रियते नरैः । तद्भूमिस्वामिपितृभिर्हन्यते श्राद्धकर्म तत् । अग्रभावं ततस्तेभ्यो दद्यान्मूल्यं च जीवतामिति । अटवी पर्वतां पुण्यां नद्यस्तीर्थानि यानि च । सर्वाण्यस्वामिकान्याहुर्नहि तेषु परिग्रह इति **यमः** । एवं पूतिगन्धरूक्षकृमिपूर्णपदार्थान्तरसङ्कीर्ण पिपीलिकाव्यालादिजुष्टश्वखरोष्ट्रादिजुष्ट कृत्रिम श्रूयमाणानिष्टशब्दभूमयो वर्ज्याः । तन्मूलानि **महानिबन्धेषु** । उत्तरेण महानद्या दक्षिणेन तु कीकटात् । एष त्रैशङ्कवो देशः श्राद्धकर्मणि वर्जितः । **इति वायुपुराणे** । येषु देशेषु गमने पुनःसंस्कारः श्रूयते तेऽपि वर्ज्याः । पुनःसंस्कारश्च मेखलाजिनदण्डकमण्डलूपवीतरहितो मौञ्जीबन्धः । **इति देशः** ।

अथश्राद्धपूर्वदिनकृत्यम् । **वाराहे**—वस्त्रशौचादिकर्त्तव्यं श्वः कर्त्ताऽस्मीति जानता । दक्षिणांप्रवणां भूमिं गोमयेनोपलेपयेत् । इति । गोमयं च सवत्सायाश्चिरप्रसूतायाः कपिलायाः प्रशस्ततरम् । ततस्तत्र तिलान्विकिरेद्दर्भांश्च वधनीयात् । तिलांश्च विकिरेत्तत्र सर्वतो बन्धयेदर्भान् । असुरोपहतं सर्वं तिलैः शुद्ध्यत्यजनचेति ।

क्षारं च—तिलमुद्गहते शैम्ब्यं मांसं गोधूमकोद्रवौ । चीनकं देवधान्यं च चणकं च तथैक्षवम् । स्विन्नधान्यं तथौषध्यः एष **क्षारगणः**

दश्यामेवोपवासः स्मार्तानाम् । अत्र शुद्धा नामारुणोदयमारभ्योदया-न्ता । अन्ये तु—शुद्धाद्वितीयभेदविषये गृहिभिः पूर्वा कार्या, यतिभिरुत्तरेत्याहुस्तदनाकरमित्यन्ये । त्रिकाण्डमण्डनस्तु—अ-त्रापि पूर्वा गृहस्थस्य यतेरुत्तरैवेत्याह । सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा । सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि । इति नारदः । अन्ये तु—स्मार्तैः पूर्वा कार्या, वैष्णवैर्द्वादशी उपोष्या इति व्यवस्थामाहुः । इद-मेव युक्तम् । या तु शुद्धाधिकद्वादशिका सा सर्वैः परोपोष्या । या तु शुद्धाधिकाऽनधिकद्वादशिका, तस्यां गृहिणां पूर्वेदूयुर्यतीनामुत्तरेद्युरिति माधवः । अत्र यतिपदं वनस्थविधवानामप्युपलक्षणम् । अत्र शुद्धाशब्देनोदयव्यापिन्येव । पूर्वतिथेर्घटित्रयाधिकवृद्धावुत्तरतिथेस्तद-धिकवृद्धेर्ह्रासस्याप्रसिद्धेः । एवञ्चात्रापि विषये वैष्णवानां परैव । अन्ये तु सकामानां पूर्वेद्युः, निःकामगृहिणामप्युत्तरेद्युरिति व्यवस्थामाहुः । यति विधवावनस्थास्तु निष्कामा एव । सकामत्वे तु भवतु तेषामपि पूर्वैवेति तेषामाशयः । निष्कामस्तु गृही कुर्यादुत्तरैकादशींसदेत्येतन्मतमूलभूत-वचनं निष्कामस्त्वगृहीति माधवानुयायिनः पठन्ति । अगृहीपद-व्याख्यानत्वेन व्याचक्षते च । यत्तु—ईदृशीमुपक्रम्य—"उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति" वचनं तत्तिथिद्वयसम्बन्धो यथा भवति तथो-पवासः कार्य इत्यर्थकतयोत्तरत्रोपवासविधायकमेव । विष्णुप्रीणनतत्परैरिति च प्रायो यत्यादीनां तथात्वात्तदुपलक्षणमेवेति माधवानुयायिनः । अन्ये तु—तत्कामानामेतद्वलान्नैरन्तर्येणोपवासद्वयमिच्छन्ति ।

अथ विद्धा । तत्र या तावत्तदुक्तवेधरीत्या विद्धाधिकाधिकद्वा-दशिका सा सर्वैः परैवोपोष्या । या तु विद्धानधिकानधिकद्वादशिका, तस्यां वैष्णवानां शुद्धद्वादश्यामुपवासः । त्रयोदश्यां पारणम् । अन्येषां तु यतीनां गृहस्थानां च विद्धायामेवोपवास इति माधवः । अन्ये तु-एकादश्या न्यूनत्वरूपपक्षये माधवोक्तैव व्यवस्था । तस्यास्साम्ये तु गृहिणां पूर्वेद्युर्यतीनामुत्तरेद्युः। द्वितीयसूर्योदयपर्यन्तत्वं साम्यम्, ततो

न्यूनत्वेक्षयः। किञ्च क्षयविषयेऽप्यपुत्रगृहिणामेव विद्धोपवासः। पुत्रवद्गृहिणातु परदिन एव। तेषां त्रिस्पृशाया उपवासनिषेधात्। साम्ये तु तेषामपि पूर्वेवेत्याहुः। मदनरत्ने तु—विद्धन्यूनायामपि मुमुक्षूणां परेद्युरुपवासः। पूर्वविधायकवाक्ये यतिपदं तु नियमयुक्तमुमुक्षुनैष्ठिकवानप्रस्थादिपरमित्युक्तम्। हेमाद्रावप्येवमेव। या तु विद्धाधिकानधिकद्वादशिका, सा सर्वैरपि परैवोपोष्या साम्ये क्षये चेत्येके। माधवस्त्वत्रापि स्मार्तविषये गृहियतिव्यवस्थामाह, शुद्धाधिकावत्। या तु विद्धानधिकाधिकद्वादशिका, तस्यां वैष्णवानां द्वादश्यामेवोपवासः। अन्येषामपि तत्रैवेत्यलम्। गौडास्तु—यतिरेव वैष्णवः। तेन सर्वत्र गृहियतिव्यवस्थैव। वैष्णवस्मार्तव्यवस्थात्वनाकर्षैव। एवं च विद्धा यतिभिः सर्वथा त्याज्या। शुद्धाप्यन्यतरस्या अपि परत्र सत्वे इत्याहुः। अत्र विद्धा करणे पुरुषानिष्टमपि स्मर्यते। पादकृच्छ्रं प्रायश्चितम्। तदरुणोदयवेधो वैष्णवानां सर्वत्र। काम्ये इतरेषामपि। नित्येत्वितरेषां सूर्योदयवेध एवेति। इति एकादशी निर्णयः।

गौडमते तु—विद्धाधिकाधिकद्वादशिका विषये एव तत्। विष्णुरूपनिबन्धेतु—शुद्धा त्रेधा तथा विद्धा भेदैर्न्यूनसमाधिकैः। प्रत्येकं च पुनस्त्रेधा द्वादश्यूनसमाधिकैः। आद्यासु षट्सु पूर्वैव व्यवस्थानन्तरद्वये। गृहमेधियतीनां च नवमी तु परेऽहनि। आद्यास्तिस्रस्तु पूर्वास्युः व्यवस्थानन्तरद्वये। अपरेऽहनि शेषाः स्युः सप्तमी च व्यवस्थयेति। वल्लभाचार्योऽपि—शुद्धा विद्धा तथा त्रेधा भेदैर्न्यूनसमाधिकैः। प्रत्येकं द्वादशी विद्धि साम्यद्वयैः पुनस्त्रिधा। तत्रैकैकाद्वादशीस्थवृद्धिसामोनता गुणैः। आद्योपोष्या परे द्वे द्वे पौर्वापर्याद्यवस्थिते। गृहियत्योरुत्तरासु षट्सु पूर्वैव संमता। तिसृष्वन्त्यासु विद्धैव तत्पूर्वेतुव्यवस्थिते। अविद्धैव तु शेषासु तृतीया तु व्यवस्थितेति। विष्णोश्शयनपरिवर्तन प्रबोधोत्सवाः, क्रमेणाषाढभाद्रकार्तिकशुद्धैकादशीषु कार्या इति मात्स्ये।

तत्र—निशिस्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम्, ' एष्वेवमासेषु शुक्लद्वादशीषु शयनादिकं वाराहे उक्तम् । द्वादशीषु रात्रौ सन्ध्यायां दिनेचानुराधाश्रवणरेवतीनामादिमध्यान्तं भागयोगास्तेषु शस्ताः । यदा तु द्वादश्यां रात्र्यादिभागेषु तत्तन्नक्षत्रांशायोगस्तदा द्वादशी नक्षत्रमात्रयोगोऽपि तत्तत्कालगतो ग्राह्यः । यदा तु द्वादशीषु नक्षत्राण्येकदेशेनापि न भवन्ति किन्तु पूर्वपरदिनयोः, तत्रापि तत्तद्भक्षभागयुक्तकाले निशाद्यनादरेणैव । एवं द्वादश्यां निशाद्यादरेऽन्यतिथौ तत्तन्नक्षत्रभागयोगादरे नियते यदा द्वादशीषु निशादेरन्यत्र तत्तन्नक्षत्रभागयोगोऽन्यतिथौ च तदितर नक्षत्रभागयोगऽस्तदा द्वादशीष्वेव तत् । परंतु सायंसन्ध्यायामेव त्रयम् ।

केचित्तु—दिनत्रयेऽपि ऋक्षाणामसम्भवे द्वादश्यां सन्धिसमये । उक्तविषये तु तत्काल एवानुष्ठानमाहुः । द्वादश्यामकृतोत्सवेन त्रयोदश्यादावपि कार्यम् । तेषां गौणकालत्वात् । पौर्णमास्यामङ्गीकृतशयनोत्सवास्तैस्तत्रैव कार्यम् । केचित्तु—ऋक्षयोगस्य द्वादश्यामभावेऽपि तत्रैव प्रबोधः । **ऋक्षस्य प्राशस्त्यार्थत्वात्** । तिथेरपि रात्रावसत्त्वे दिवैव । द्वादश्यां दिने रेवत्यन्त्यभागयोगे दिनतृतीयभाग एवोत्थानम् । दिवापि ऋक्षयोगाभावे सन्ध्यायामेव द्वादश्याम् । त्रयोदश्यादि तु गौणकाल एवेत्याहुः । **केचिच्छयनीव्रतं दिनत्रयसाध्यमाहुः** ।

अत्र पारणायां तेषां नक्षत्राणामादिमध्यान्तभागा वर्ज्याः । यदा तु स्वरूपाद्वादशी वर्ज्यर्क्षभागयुक्ता च तदा द्वादश्यामेव पारणमित्याधुनिकाः । **चातुर्मास्यव्रतारम्भोऽप्यासु** द्वादशीषु, तदुत्तरपौर्णमासीषु, कर्कसंक्रान्तिदिने वा । यद्वा—कदाप्यारम्भे, समाप्तिः कार्तिशुक्लद्वादश्यामेव । पौर्णमास्यां वा । शयनाद्युत्सवः चातुर्मास्यव्रतारम्भो गुरुशुक्रास्तादावपि । मलमासे तु नेति वक्ष्यते । **इति शयन्यादिनिर्णयः** ।

अथ श्रवणद्वादशी । द्वादश्यामल्पश्रवणयोगेपि तत्प्रयुक्तोपवासादि भवत्येव । नतूदयास्तान्यतरपर्यन्तत्वं तद्योगस्यापेक्षितम् । तत्र

या तावदेकदिन एव श्रवणयोगवती शुद्धा विद्धा तदधिका वा, तस्यां विवाद एव न । यदा विद्धाधिकायां दिनद्वयेऽपि श्रवणयोगस्तदैकादशी-युता ग्राह्या । **अयमेव विष्णुशृङ्खलयोगः** । तत्रेण चोपवासद्वयम् । तत्रापि तिथिद्वयस्य श्रवणस्पर्शेऽतिप्रशस्तत्वम् ।

कोचित्तु—रात्रेर्द्वितीयप्रहरादौ श्रवणयोगः परदिन एवोदयकालिकस्तदा परा । पूर्वदिनेप्युदयकालिकत्वे पूर्वैव । यदात्वेकादश्यामेव श्रवणयोगस्तदा तस्यामप्येतत्प्रयुक्तं व्रतं कार्यम् । सत्यबुधयोगे द्वादश्यां न कार्यम् । एकादश्यामेवैकादश्युपवासस्तेषां तन्त्रेण द्वयम् । अन्येषान्तूपवासद्वयम् । पूर्वव्रताङ्गपारणस्य बाध एव । अद्भिर्वातत् । यस्तु प्रकान्तश्रवणद्वादशीव्रतः उपवासस्य सामर्थ्ये निश्चयाच्च कृतैकादशीसङ्कल्पः, पश्चात्तत्रासमर्थः स सङ्कल्पितं विधाय श्रवणद्वादशीप्रयुक्तं पूजादिमात्रं विधाय भुञ्जीत । यस्तु प्रागेव निश्चितोपवासद्वयासामर्थ्यः, स श्रवणद्वादश्युपवासमेव कुर्यात् । तद्व्रतपारणन्तु पारणादिने, उभयानुवृत्तावुभयान्त इति मुख्यः । अन्यतरान्तो गौणः । यदा तु **विष्णुशृङ्खले** तिथ्यपेक्षया नक्षत्राधिक्यं पारणातिथौ तदा द्वादश्यामेव पारणेति **कोचित्** । **अस्यां सङ्गमस्नानं महाफलम्** । एवं पुनर्वसु पुष्यरोहिणीयुत द्वादशीष्वप्युपवासो महाफलः । तस्मादुदयमारभ्य द्वितीयोदयपर्यन्तं वा ऋक्षयोगो ग्राह्यः । **इति श्रवणद्वादशी** ।

अथ शिवरात्रिः । सा च माघफाल्गुनकृष्णचतुर्दशी । अत्रापि पूजा प्रधानम्, उपवासजागरावङ्गमित्येके । तेपि प्रधानमित्यन्ये । उपवास एव प्रधानमिति **गौडाः** । **इदं नित्यं काम्यम्** । अथ तिथिद्वैधे अर्द्धरात्रव्याप्त्या निर्णयः । तस्य प्रादुर्भावकालत्वात् । अर्द्धरात्रोऽत्रापि जन्माष्टमीवदेव । तत्र निशीथादूर्द्धमप्यनुवर्त्तमानया त्रयोदश्यायुक्ता चतुर्दशी परदिने निशीथयोगिनी अपि परैवोपोष्या । एतद्विषयाण्येव प्रदोषव्यापिनीग्राह्यत्वबोधकवचनानि । या तु पूर्वेद्युरेव निशीथयोगिनी, सा पूर्वैव । या तु दिनद्वयेऽपि तादृशी सा परेपि **माधवः** । सापि पूर्वैवे-

त्यन्ये । या तु परदिन एव तादृशी सा परैव । यदा पूर्वदिने निशीथैकदेशव्याप्तिः, परदिने च सम्पूर्णा तद्व्याप्तिस्तदापि परैव । **अस्या रविभौमान्यतरयोगे प्राशस्त्यम्** । तत्रापि **शिवयोगे प्रशस्ततरत्वम्** । एकवासरे १३।१४।३० । रूपतिथित्रययुक्तापि प्रशस्ता । अस्याः पारणं तिथिमध्ये एव । तत्रासम्भवे तिथ्यन्तेत्येके । विपरीतं परे । **माधवस्तु**—यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणेत्याह । एवं प्रतिमासं कृष्णचतुर्दशीषु क्रियमाणशिवरात्रिव्रतेऽप्ययमेव निर्णयः । रात्रिव्याप्तिसाम्ये तु परस्यामेवेदम् । **रुद्रव्रतानां संमुखी तिथौ कर्त्तव्यत्वात्** । संमुखी सायाह्नव्यापिनी । **केचित्त्वस्यां सायाह्नव्यापिनीत्वेनैव निर्णयं कुर्वन्ति** । **केचित्तु**—प्रदोषव्याप्त्यैव । इति **शिवरात्रिः** ।

अथैकभुक्तम् । तच्च द्वितीयभोजनाभावविशिष्टं भोजनम् । अत्रचाष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः । द्वात्रिंशत्तु गृहस्थस्येत्युक्तसङ्ख्या मध्ये ग्रासत्रयन्यूनभोजनमपि नियमः । अन्ये नियमाः व्रतसामान्योक्ताप्यत्र । अस्यमुख्यकालस्त्रेधा चतुर्द्धा पञ्चधा विभागेन च प्राक्तावर्त्तनोपरितनो मध्याह्नोत्तरभागः सर्वोऽपि त्रेधा विभागेनैव प्राप्त **इत्यन्ये । पञ्चधा विभागप्राप्त एवेत्यन्ये** । तदुत्तरोऽस्तमयावधिर्गौणः । यातु—अन्यतरदिने एव मध्याह्नोत्तरकालव्यापिनी तदेकदेशव्यापिनी वा, सा सैव ग्राह्या । दिनद्वयेऽपि तद्व्याप्तौ तदस्पर्शे साम्येन तदेकस्पर्शे च पूर्ववैव । गौणकालव्याप्तेराधिक्यात् । मुख्यकाले तिथ्यभावेऽप्यनुष्ठानं मुख्यकाल एव । अत्रोत्तरतिथेः स्वमासषष्टिघटिकापेक्षया यावान्ह्रासो वृद्धिर्वा स पूर्वतिथौ हीनः कार्यः प्रक्षेप्यश्च । तत्र वृद्धिप्रक्षेपः पूर्वदिने कर्मकालासत्वप्रतिपादनाय । **हेमाद्रिस्तु**—दिनद्वये मध्याह्नव्याप्तौ युग्मवाक्यादत्र निर्णयमाह **तच्चिन्त्यमित्यन्ये** । वैषम्येण मुख्यकालैकदेशव्याप्त्याधिकतद्व्यापिनी ग्राह्या । अङ्गभूतैकभक्तेषु प्रधानकालनिर्णयेनैव निर्णयः । तत्र मध्याह्नस्य प्रधानेन व्याप्तौ

गौणकाले तत्कार्यम् । उपवासप्रतिनिधिभूतंतूपवासयोग्यतिथौ मध्याह्नोत्तरदले कार्यम् । इत्येकभुक्तम् ।

अथ नक्तम् । दिवा भोजनाभावविशिष्टरात्रिभोजनं हि तत् । तत्र प्रदोषव्यापिनी तिथिः । एकादशीप्रयुक्तं नक्तं तूदयव्यापिन्याम् । **प्रदोषश्च**–सूर्यास्तोत्तररात्रिमुहूर्त्तात्मकः । दिनान्त्यमुहूर्त्तौ गौणः कालः । तत्पूर्वभाव्यपिमुहूर्त्तद्वयं गौणतरः कालः । मुख्यकालेप्याद्यमुहूर्त्तद्वयं मुख्यतरम् । मैथुनाहारस्वाध्यायादिषु वर्ज्या सन्ध्या तु नक्षत्रदर्शनपर्यन्तैव । सन्ध्यागर्जितादावनध्यायप्रयोजिका तु घटिकात्रयात्मिका । रविवारादौ रात्रिभोजननिषेधस्य रागप्राप्तविषयत्वात्तत्रापि प्राप्तं वैधं नक्तभोजनं मुख्यकाल एव कार्यम् । एवञ्चाहारादिनिषेधे घटिकात्रयसन्ध्याग्रहणेऽपि न क्षतिः । निषेधस्य रागप्राप्तविषयत्वात् । **माधवस्तु**–रविवारादौ नक्तभुक्तौ गौणकाल एवेच्छति । सूर्यदैवत्यनक्तं तूक्तगौणकाले एव । एवं यतिविधवाधिकारिकमपि नक्तं गौणकाले दिवैव । यात्वन्यतरदिने एव कात्स्न्नैकदेशेन वा मुख्यकालं व्याप्नोति, सा सैव । दिनद्वयेऽपि प्रदोषव्यापिन्युत्तरैव । दिनद्वयेपि प्रदोषास्पर्शिनी च परा । भोजनमपि तस्यां सायाह्न एव । दिनद्वयेऽपि साम्येन वैषम्येण वा तदेकदेशस्पर्शिन्युत्तरैव । वैषम्येण प्राप्तौ यदि पूर्वदिने भोजनदेवपूजापर्याप्तमाधिक्यं, तदा पूर्वाऽन्यथापरेति विशेषः । एवं सौरनक्ते यतिनक्ते च सायाह्नव्याप्त्या निर्णयः । एवमेव **गोवत्सद्वादश्यादौ** नक्तव्रते । अन्याङ्गे उपवासप्रतिनिधौ च तादृगेव न्याय एव । अयमेव निर्णयस्तत्कालविहितपूजादावपि तिथिद्वयप्रयुक्तैकभक्तयोरेकदिने प्राप्तौ तु पूर्वप्रारब्धयोर्द्वयोः पूर्वतिथिप्रयुक्तं मुख्यकल्पेन कार्यम् । इतरस्तूत्तरदिने गौणकाललाभे उत्तरदिने स्वयमेव कार्यम् । असत्वे तु—तस्मिन्नेवदिने कर्त्रन्तरेण कारणीयम् । **अयमेव न्यायोऽनेकतिथिव्यापि** पूर्वप्रारब्धव्रतान्तःपातिनि तद्विरोध्येकतिथिव्रतेऽपि । आसनियमस्त्वत्र द्वादश वा पञ्चदश वा द्वाविंशतिर्वेति यथाशक्यम् । **इति नक्तम्** ।

अथायाचितम् । अयाचितं तूपवासवदहोरात्रसाध्यत्वादहोरात्रयोगिन्यां कार्यम् । यदा तु तिथिरेकत्रदिवैव परत्ररात्रौ एव तदाहर्व्यापिन्याम् । सम्भावितपक्षान्तरेष्वपवासवदेव निर्णयः । अयाचितमित्यादिनापि रागप्राप्तेभोजने याचितामिन्नरूपसाधनविशेषो नियम्यते । याचितामिन्नं च तत्सदृशं परकीयमेव । अतएवैकादश्यादिदिने प्रारब्धमासादिव्यापि चतुर्थकालिकत्वव्रतानुष्ठाननिमित्तभोजनाकरणं दृश्यते । आसनियमोऽत्र चतुर्विंशतिः षोडशवेति यथाशक्यम् । **इत्ययाचितम्** ।

अथोपाकर्म । तत्र **ऋग्वेदिनां** श्रावणमासि श्रवणो मुख्यः । सोऽपि शुक्लपक्षस्थ एव । तस्य ग्रहणसंक्रान्त्यादि दुष्टत्वे सूतकादिसम्भावनायां तन्मासशुक्लपञ्चम्यां हस्तयुक्तायां केवलायां वा हस्तयुक्तदिनान्तरे वा कार्यम् । अवृष्ट्यादिनौषधीप्रादुर्भावाभावेन श्रावणश्रवणाद्यसम्भवे भाद्रपदशुक्लयोः श्रवणपञ्चम्योः कार्यम् । एवं श्रावणश्रवणस्य गुरुशुक्रास्ताद्याक्रान्तत्वे, तत्र प्रथमोपाकर्मनिषेधात्तत्रापि यथासम्भवं श्रावणपञ्चम्यादि, भाद्रपदश्रवणपञ्चम्यादि वा । एवं सिंहस्थ गुरुवक्रातिचारयोरपि प्रथमस्य निषेधः । मलमासादौ द्वितीयादेरपि । **यजुर्वेदिनां तु**—श्रावणी पूर्णिमा मुख्या । तत्रासम्भवे येषां गृह्ये श्रवणहस्तपञ्चम्यावुक्ते तैस्ते ग्राह्ये । तत्राप्यसम्भवे भाद्रपूर्णिमा तद्गतहस्तपञ्चम्यौ वा । येषां नोक्ते, तैर्भाद्रपद्येव ।

कातीयानान्तु—श्रवणासम्भवे श्रावणपूर्णिमायां हस्तपञ्चम्यां वा, तदभावे प्रौष्ठपद्याम् ।

बौधायनानान्तु—श्रावण्या ग्रहणादिदुष्टत्वे आषाढ्यां वृष्ट्यभावे तु भाद्रपद्यामेव । एवं **बह्वृचयाजुषैश्च** मुख्यकालासम्भवे स्व स्व सूत्रोक्ता अन्येऽपि काला ग्राह्या । **केचित्तु**—संक्रान्तिग्रहणाद्यपि प्रथमोपाकर्मण्येव निषिद्धमाहुः । एवं श्रवणादीनां सङ्क्रान्त्याद्यधिकरणत्वे एव दुष्टत्वं, तद्दिन एवनक्षत्रान्तरे तिथ्यन्तरे वा सङ्क्रान्त्यादौ न तेषां

दुष्टत्वमिति **केचित्** । यद्दिने सङ्क्रान्तिस्तद्दिनसम्बन्धिनां दुष्टत्व-मित्यन्ये ।

सामगैस्तु--सिंहस्थे रवौ हस्तनक्षत्रे कार्यं, यस्या कस्याञ्चित्-थौ तदप्यपराह्ण एव । **अन्येषां तु**-दैवत्वात्पूर्वाह्ण एव । तत्रास्ता-दिसत्वे श्रावण्यामुपाकृत्वा भाद्रपदशुक्लहस्तर्क्षपर्यन्तं न पठेयुः । एषां मलमासनिषेध आद्यएव । द्वितीयादि मलमासेपि ।

आथर्वणानां तु—श्रावण्यां भाद्रपद्यां वा पौष्यामुत्सर्ग इति । ग्रहसंक्रान्तियोगश्च यद्दिने उपाकर्म तद्दिनार्द्धरात्रात्पूर्वमेव तन्नक्षत्रतिथ्यो-र्विद्यमान एव तयोर्दूषकः, नतु तत्परस्तात् । तथा अतीतार्द्धरात्रात्परतो विद्यमानो दूषकः नतु तत्पूर्वः । अर्द्धरात्रशब्देनात्ररात्रिपूर्वार्द्धग्रहणम् । अत्र हस्तश्रवणपर्वणां खण्डत्वे औदयिकानां ग्रहणम् । तदपि सङ्गवस्पृ-ष्टानाम् । **येषां तु** त्रिमुहूर्तात्मकप्रातःकालमात्रसाध्यमुपाकर्म तेषां सङ्गवास्पृष्टमपीति **केचित्** । अपराह्णोपाकर्मणां **सामगानां** तत्कालव्यापिनमपि पूर्वहस्तं वाधित्वोत्तरदिने एवापराह्णे तदनुष्ठानम् । **हेमाद्रिस्तु-तैत्तिरीयाणामेवोपाकर्मौदयिके पर्वण्यन्येषां याजुषाणां तु पूर्वाह्लविद्ध एव पर्वणीत्याह** । नर्मदोत्तरभागे सिंहयुक्तेऽर्के कार्यम् । दक्षिणे तु कर्कस्थेऽर्के इति तु निर्मूलम् । इदञ्च ग्रहणाध्ययनोभयाङ्गतयाचानुष्ठेयम् । प्रत्यब्दं च । यदा ब्राह्मणो बहुभिः सहकरोति, तदा लौकिकाग्नौ कार्यम् । एकश्चेद्गृह्याग्नौ कुर्यात् । इत्युपाकर्म ।

श्रावण्यां रक्षाबन्ध उक्तः । स पूर्वविद्धायामिति **केचित्** । उदयव्यापिन्यां कार्य इत्यन्ये । स च भद्रायां न । उपाकर्म तु भवत्येव भद्रायामपि । इति रक्षाबन्धः ।

अथोत्सर्जनम् । तच्च **आश्वलायनेन** माघ्यामुक्तम् । **बौधायनेन** पौष्यामपि । इदं षण्मासाध्ययनाभिप्रायेण तत्र श्रावण्यामुपाकर्मणि माघ्याम्, आषाढ्यां तस्मिन्पौष्याम् । सा-

द्वंपञ्चमासाध्ययनपक्षे तु—यदा श्रावण्यामुपाकर्म तदा पौषशुक्लप्रतिपदि, यदा प्रौष्ठपद्यां तदा माघशुक्लप्रतिपदि । **याज्ञवल्क्येन तु**—पौषकृष्णाष्टम्यामुक्तम् । **यथाचारं व्यवस्था । सामगानां** सिंहस्थे रवौ पुष्पनक्षत्रे । यदा सिंहस्थे रवौ हस्तात्पूर्वः कर्कस्थस्तदा तत्रैवोत्सर्जनं तेषां सर्वेषामुपाकर्मदिन एव ततः पूर्वं वा । एते च कालाः खण्डत्वे औदयिका ग्राह्याः । **इदानीन्तु शिष्टा उपाकर्म दिन एव** पूर्वमुत्सर्गमाचरन्ति । **इत्युत्सर्जननिर्णयः ।**

अथ नानातिथिसाध्यव्रतनिर्णयः । तानि द्विधा । केषुचिदेकंकर्मप्रधानमुपवासपूजाद्यात्मकं नानातिथिष्वभ्यस्यते । कर्मणः एकत्वञ्चापूर्वैक्यात् । तत्र सर्वतिथीनां प्रधानकालत्वमेव । केषुचिदन्यतिथिकृत्यमेव प्रधानम् । तत्राद्ये स्वातन्त्र्येणैव तत्तत्कर्मयोग्यतावत्तिथिनिर्णयः कार्यः । तस्मिंश्च क्रियमाणे क्वचित्तिथिद्वयप्रयुक्तस्य तन्त्रेणानुष्ठानात् । क्वचिदेकतिथिप्रयुक्तस्यावृत्यानुष्ठानात् सकलव्रतप्रयोगस्यन्यूनाधिकसावनव्यापित्वेपि न क्षतिः । यथा नवरात्रादौ वटपूर्णिमादि त्रिरात्रादावाद्यविधेप्यन्त्येचान्तिमतिथिं निर्णीय तदनुरोधेनैकदेशवर्त्तिनीनामपि तदव्यवहितपूर्वतिथीनां यावदपेक्षं ग्रहणं, नतु तासां स्वातन्त्र्येण निर्णयः कार्यः । तत्राद्यविधानां यत्रान्तिमतिथेर्निर्णयोपजीव्यस्वरूपप्राधान्यद्योतकं समाख्याधस्ति तत्रैव । अथवा वटपूर्णिमादौ ।

अथ नवरात्रप्रतिपत् । तत्र नवरात्र तु कर्त्तव्यमित्यादौ **नवरात्राख्यो गुणविधिरिति** कश्चित् । **कर्मनामधेयमित्यपरे । अत्र पूजैव प्रधानम्** । उपवासस्नपनबलिदानहोमादित्वङ्गम् । उपवासासामर्थ्येन नक्तैकभुक्तायाचितान्यनुकल्पाः । **इदं नित्यं काम्यम्** । तत्रापि रात्रिपूजैव प्रधानम् । **अत्र स्त्रीशूद्रम्लेच्छादीनामधिकारः** । एषामन्त्रिकैव पूजा । जपहोमादि ब्राह्मणद्वारा । समन्त्रपूजापि तद्द्वारैव । तत्र **विप्राणां** जपयज्ञनिरामिषभक्तबलिदानकूष्माडादिबलिदानभगवतीमाहात्म्यपठनरूपायां **सात्त्विकयामेवाधि-**

कारः । जपयज्ञादि विशिष्टबलिदानसामिषनैवेद्य स्वगात्ररुधिरदानपशु-हिंसादिरूप राजस्यां क्षत्रियवैश्ययोरधिकारः । मन्त्रहीनसुरा-मांसाद्युपहारादिविशिष्ट तामस्यां स्त्रीशूद्रम्लेच्छादीनामधि-कारः । विप्रस्त्रीणान्त्वमन्त्रकसात्विक्यामेव सः । स्त्रीशू-द्रादिभिरुपहारवल्यादीनां देवीमुद्दिश्य नममोत्सर्गः कार्यः । अत्र प्रति-पदमारभ्य नवम्यन्तं कार्यमिति मुख्यः पक्षः । तदसमर्थं प्रति सप्त-म्यादि दिनत्रयम् । तत्राप्यसामर्थ्येऽष्टमीनवम्योरिति दिनद्वयम् । तृती-यामारभ्य सप्तरात्रं, पञ्चमीमारभ्य पञ्चरात्रं वेत्यपिपक्षौ । पञ्चरात्र-पक्षे पञ्चम्यामेकभक्तम् । षष्ठ्यां नक्तम् । सप्तम्यामयाचितम् । अष्टम्या-मुपवासः । नवम्यां पारणमित्यपि पक्षान्तरम् । सर्वत्रासामर्थ्ये केव-लाष्टम्यामपि । अष्टम्यामुपवासः पुत्रवतो निषिद्धः । तेन नक्ताद्यनुकल्प एव कार्यः । केवलनवम्यामप्युपवासपूर्वकं पूजोक्ता-ऽन्यत्र । षष्ठ्यादिपक्षोऽप्यन्यत्र । तत्र षष्ठ्यां बिल्वशाखायां देव्या-बोधनम् । सप्तम्यां तदाहरणपूर्वकं तस्यां पूजाम् , अष्टम्यां पुनस्तस्यामेव-पूजा जागरो महानिशि बलिदानं च । नवम्यां प्रभूतबलिदा-नम् । दशम्यां विसर्जनमिति प्रकारः । इयं पूजा मुख्यनवरात्रक-ल्पापीत्यन्ये । स्वस्याशक्तावन्यद्वारा पूजा । तत्र पुत्रजामातृगुरुभ्रातृ-भागिनेयशिष्या मुख्याः । इतरप्रतिनिधौ तु दक्षिणादानेपि न्यूनफलता । राज्ञः पुरोहितामात्यावपि । आरम्भोत्तरमन्तराशौचपाते सङ्कल्पि-तद्रव्येणान्यद्वारा पूजा । पूर्वमाशौचेत्वनारम्भ एव । नृपतेस्त्वाशौचमध्ये-ऽपि पुरोहितेन स्वीयशुद्ध्या शान्तिकपौष्टिकादिकार्यमेवेति प्राच्याः । विस्तृतपूजाऽशक्तौ गन्धपुष्पधूपदीपनैवेद्यरूपपंचोपचारैः कार्यः । तस्या-प्यभावे गन्धपुष्पाभ्यां, तोयमात्रेण वा, भक्तिमात्रेण वा ।

अथ प्रतिपन्निर्णयः । अत्र केचित् । अस्य नक्तव्रतत्वा-त्प्रतिपन्नक्तव्रतवन्निर्णेतव्या । तत्र पूर्वदिन एव प्रदोषव्यासौ पूर्वा । तद्वि-षयाण्येवामाविद्धाविधायकानि, द्वितीयाविद्धानिषेधकानि च । इतरसर्वेष-

षेषु परा। तद्विषयाणि द्वितीयाविद्धाविधायकानि, अमाविद्धा निषेधकानि चेति वदन्ति। परे तु—दैवकार्यत्वात्पूर्वाह्णस्यैव कर्मकालत्वात्तद्व्याप्त्यैव निर्णयं कुर्वन्ति। यदा तु सम्पूर्णा प्रतिपत् तदा आद्यषोडशनाडीषु त्यक्त्वाऽपराह्णएव कलशस्थापनादि पूजोपक्रमः। अन्यत्रापि यथासम्भवं ता हेया एव। येषां नक्तव्रतत्वं तेषां सायाह्न एव तदुपक्रमः। सर्वदा चित्रावैधृतेरपि कलशस्थापनं न कार्यम् सति सम्भवे। तत्राप्याद्यांशत्रयं पूर्वार्द्धे वाऽतिदुष्टम्। सर्वथा त्यागासम्भवेऽभिजिन्मुहूर्त्ते मध्यदिने प्रदोषादूर्ध्वं प्रवृत्तापरदिनेऽस्तात्पूर्वमेव समाप्ता, एवं दिनद्वयेऽपि कर्मकालस्पर्शिनी, तत्र पूर्वैव स्वोत्तरकालरूपगौणकालव्यापित्वात्। पूजोपक्रमस्त्वत्रापि प्रदोष एवेत्येके। परे तु—परैव सङ्कल्पकाले पूर्वाह्णमध्याह्नपूजयोश्च सत्वात्। सायाह्नरूपगौणकालव्यापित्वाच्च रात्रिपूजाकालेऽपि यातिथिमित्यापाद्य साकल्येन सत्वाच्च। एवञ्च यामित्रमुहूर्त्तदर्शयुक्ता तामुल्लंघ्य द्वितीयाविद्धामुहूर्त्तमात्रायामपि परदिने नवरात्रारम्भः, केषाञ्चिद्भ्रान्त्यैव। एवं च यदा अमाविद्धा चित्रावैधृत्याद्यन्विता तदा तस्यामुपवासाद्यन्यतरदेवीपूजामात्रं च कृत्वा द्वितीयदिने यथायोग्यकालं कलशस्थापनं कार्यम्। येषां तु कुलपारम्पर्येणामाविद्धद्वितीयाविद्धयोरन्यतरस्याङ्गीकारस्तैर्व्यवस्थया तस्यामेव नवरात्रारम्भः कार्यः। तदभावे तूक्तनिर्णयानुसारेण। इति प्रतिपत्।

सप्तम्यादिदिनत्रयविहितपत्रिकादि पूजायां सप्तम्यादय उदयव्यापिन्यः। पूर्वाह्णे तस्या विधानात्। तत्र क्रमेण ज्येष्ठामूलपूर्वोत्तरयोगे प्राशस्त्यम्। न तु तदनुरोधेन पूर्वविद्धाग्राह्यत्वम्। उभयत्र पूर्वाह्णलाभे परैव। तदंगं बिल्वशाखायां देवीबोधनम्। आश्विनकृष्णनवम्यामार्द्रायुतायां, केवलायां वा। तत्र पूर्वाह्णव्यापिनी सा। उभयत्र तदव्याप्तौचार्द्रायुतायाम्। पूर्वाह्णेतरकाले आर्द्रालाभे तु तत्रापि। नक्षत्राभावे तु नवम्यामेव। पूर्वाह्णे उभयत्र तदलाभे लाभे वा पूर्वस्मिन्नेव युग्मवाक्यात्। तस्यामसम्भवे नवरात्रान्तर्गत षष्ठ्यां सायाह्ने आमन्त्रणम्। यद्वाऽष्ट-

मीविद्धायां तस्यां प्रवेशपूर्वदिने सायाह्ने षष्ठ्यभावेप्यामन्त्रणम् । इयं च पत्रिकापूजा तिथिवृद्धिवशाच्चतुरहव्यापिन्यपि । क्षये द्वयहव्यापिन्यपि । एतद्विसर्जने पूजातिथिनिर्णयानुरोधेन यत्रैव दशम्यां योग्यं तत्रैव ।

अथाष्टमी । सा नक्तव्रतत्ववादिनां प्रतिपद्रात्रिव्यापिन्येवेति पूर्वविद्धा प्राप्नोति । तथाप्युदयानन्तरं नवमीदिने स्वल्पमपि विद्यमानाऽष्टमी, उपवासपूजाबलिदानादिषु दिवारात्रिकर्त्तव्येषु परैव । अत्र न त्रिमुहूर्त्तैव सप्तमीवेधिका किन्तु स्वल्पापि । **स्वल्पत्वं चोभयत्रापि मुहूर्त्तमात्ररूपमिति प्रामाणिकाः** । यदातु पूर्वदिनेऽष्टमी सप्तमीविद्धा, नवमी न परदिने तदापि विद्धैव सा । यदा तु पूर्वदिने पूर्णाष्टमी, परदिने च नवमीविद्धा तदा पूर्वैव । अत्र पूर्णाष्टम्यां तत्पूजा परदिने सन्धिपूजा । तत्परदिने नवमीपूजा, तत्परदिने विसर्जनमिति **प्राच्याः**। यदोत्तराऽल्पापि गृह्यते तदा बलिदानादिकं स्व स्व काले एव ।

अथ नवमी । साऽष्टमीविद्धैव पूजायाम्। बलिदाने तु सा दशमीविद्धैव । द्वितीयदिने नवम्यलाभे पूर्वदिने एव नवमीमध्ये कार्यम् । बलिदानंचाष्टमीप्रयुक्तं महानिशायाम् । नवमी प्रयुक्तं तु दिवैव । होमस्तूभयत्र वा एकतरस्मिन् वा इच्छया । यदा तु नवमीविद्धायां पूजात्रयस्यैवकालव्याप्तिस्तदा **तन्त्रेण तत्** । यदाष्टमीनवमीपूजयोः प्राप्तकालिकयोः पृथक्सम्भवस्तदा पृथगेव । सन्धिकालस्य पृथक्लाभे सन्धिपूजापि दिवा वा रात्रौ वा पृथगेव कार्या । **सन्धिश्च तिथ्योरन्त्याद्य दण्डात्मकः** । यदा षष्टिदण्डाया अष्टम्याः परदिनेशेषस्तदाऽष्टमीपूजा पूर्वेद्युरेव । सन्धिपूजा नवमीपूजा सह परदिने । **प्राच्योक्तं** पत्रिकापूजाविषयमिति **केचित्** ।

अथ विसर्जनम् । तद्दशम्याम् । तस्याः खण्डत्वे पूर्वदशम्याम् । श्रवणान्त्यभागयोगे पूर्वत्र । तत्र तद्योगाभावे परत्रैव । परदिने दशम्यभावे तु पूर्वदिनएव नक्षत्रयोगापि दिनद्वयेपि नक्षत्रयोगसत्त्वासत्त्वयोस्तु प्रातःकालप्राशस्त्येन निर्णयः । तदनन्तरं च तस्यां पारणा ।

येषां नवम्यामेव पारणाविसर्जनयोराचारो, नवम्यां पारणा दशम्यां विसर्जनमिति वा कुलाचारस्तैस्तथैव कार्यम्। **कुलाचारानुरोधात्।** नवमीपारणायां तु तिथिवृद्धौ परैव सा। साम्येचाथक्षये पूर्वा पारणाह विनिर्णय इति **परशुरामप्रतापे।** अष्टम्यां पारणेति **केषाञ्चित्कुलाचारस्तेषामष्टमीप्रयुक्तपूजादि कृत्वा पारणा।** एवं नवम्यां पारणायामपि। दशम्यां पारणायान्तु क्रमेणानुष्ठानम्। अस्यां दशम्यामेव **शमीदर्शनं, राज्ञामपराजितापूजा, खञ्जरीटदर्शनं, सीमोल्लघनं च।** तत्र ग्रामसीमान्तैशान्यदिगन्ता शमी पूज्या। **एषु** कर्मसु दशम्या खण्डत्वे यदा परदिने एवापराह्णव्याप्तिस्तदा परत्रैव। तदभावेऽपि परस्यामेव। श्रवणलाभे सैवैकादशीयुता ग्राह्या। अपराह्णरूपकालव्याप्तिरप्यत्र नापेक्षिता। **अपराह्णश्चात्र त्रेधाविभागेन, तथैवाचारदर्शनात्।** उत्तरस्यां श्रवणयोगाभावे तु सर्वपक्षेषु नवमीयुतैव। अपराह्णकालव्याप्तिलाभात्। **प्राच्यास्तु**—दिनद्वयेप्यपराह्णव्याप्तौ नक्षत्रयोगाभावेपि परदिन एव। घटिकान्यूनदशम्याः पूजानर्हत्वाच्छ्रवणयोगेपि पूर्वैव। तत्पूर्वकृत्यञ्च देवीविसर्जनाद्यं दशम्यां, तन्मध्ये **अपराजितापूजनमित्याहुः।** पारणाहे द्विविधसूतकप्राप्तौ तु ब्राह्मणद्वारा नवम्यां होमं कारयित्वा पारणं कार्यम्। सूतकान्ते ब्राह्मणभोजनं दानं च। एवं रजस्यपि। **इति नवरात्रम्।**

अथ दीपावली। तत्र चतुर्दशी, अभ्यङ्गस्नाने प्रातःकालव्यापिनी पूर्वा परा वा ग्राह्येति **प्राच्याः।** **दाक्षिणात्यास्तु**—चन्द्रोदयव्यापिनी ग्राह्या, तदसम्भवे प्रातःकालव्यापिन्यपीत्याहुः। अस्यां **प्रातरभ्यङ्गस्नानं,** ततो **यमतर्पणम्।** ततो **नरकनिवृत्तये दीपदानं,** प्रदोषसमये ततो ब्राह्मणैः सह **नक्तभोजनमिति,** कृत्यम्। तत्र या पूर्वैव प्रातश्चन्द्रोदये वा वर्तते साऽखण्डा सर्वकृत्येषु योग्यैव। या तूत्तरैव प्रातश्चन्द्रोदये वा वर्तते तावत्येव समाप्ता। तत्र तस्यामेव स्नात्वा यमतर्पणम्, दीपदानं तु पूर्वदिने प्रदोषव्यापिन्यामि-

त्येके। अन्ये तु— स्नानोत्तरप्रदोषे, स्नानदिनेप्रदोषे, तिथ्यनपेक्ष्यतद्विधानादित्याहुः। या तु दिनद्वयेऽपि, तस्यां पूर्वस्यामेव। सम्पूर्णत्वाद्भूयः कृत्यक्रमानुग्रहाच्च। एवं दिनद्वयेऽपि वैषम्येण साम्येनवैकदेशेव्याप्तावपि पूर्वैव। या दिनद्वयेऽपि तदस्पर्शिनी तस्यां परत्रैव स्नानादि चन्द्रोदयएववेत्याहुः। इदं तु युक्तम्।

अथ तदमा। अस्यामभ्यङ्गस्नानम्, अमा कर्त्तव्यदीपदानं च श्राद्धानन्तरकर्त्तव्यत्वेन प्रतीयते। तत्र यदा श्राद्धदिने एव प्रदोषव्यापिन्यमा तदा सम्यगेव। तथापि यदा पूर्वेद्युरेव प्रदोषव्यापिन्यमा द्वितीयदिने च श्राद्धयोग्या तदा पूर्वेद्युरेव तत्प्रयुक्तलक्ष्मीपूजा दीपदानादि कार्यम्। **उल्काभिः पितॄणां मार्गदर्शनमप्यत्रैव प्रदोषे।**

अथ तत्प्रतिपदा। अस्यामभ्यङ्गस्नानं द्यूतादिकं च कार्यम्। काले **बलिपूजा** तदुद्देशेन **दीपदानं च।** रात्रौ बलिपूजायामेषा प्रतिपत् पूर्वविद्धा ग्राह्या। **यत्त्वत्रैव पूर्वाह्णे गोक्रीडापूजनादिकमुक्तम्।** तत् प्रतिपदिने चन्द्रदर्शनसम्भवे पूर्वविद्धायामेव प्रातःकार्यम्। सार्द्धत्रियामाधिकत्वेन परदिने चन्द्रदर्शनासम्भवे तु परा। अस्यां **नारीनीराजनं मङ्गलमालिकाचेति** कर्मद्वयमुक्तम्। तन्मुहूर्तमात्रायामप्युत्तरस्यामेव प्रतिपदि। तत्र नारीनीराजनं प्रातः सायं मङ्गलमालिकेति **केचित्**। उभयमपि सायमेवेत्यन्ये। **आद्यं युक्तम्।** एतदुत्तरद्वितीयायां **भ्रातृपूजादिकमुक्तम्।** इदं मध्याह्नव्यापिन्यां कार्यम्। या तु पूर्वत्रैव तादृशी सा सैव। पक्षान्तरेषुपरैव। **युग्मवाक्यात्।** इति दीपावली।

अथ होला। तत्र पौर्णमासी पूर्वविद्धैव। **युग्मवाक्यात्।** दीपनं च प्रदोषे मुख्यम्। भद्रायां सत्यां **तन्न** कार्यम्। तत्र यैव प्रदोषे पूर्वा परा वा सा ग्राह्या। तत्र पूर्वस्यां प्रदोषे भद्रायामसत्यां सम्यगेव। यदा तु तत्र भद्रा, तदा सूर्योदयपूर्वभाविघटीद्वयात्पूर्वं भद्रान्तप्रतीक्षया तद्रहितः कश्चिदपि कालो लभ्यते तदा प्रदोषातिक्रमेऽपि तत्र कार्यम्।

यदा तु तावत्पर्यन्तमपि भद्रारहितकालालाभस्तदा पूर्वदिने रात्रावेव **भद्रापुच्छे** कार्यम्। **यदात्वत्रैव विषये** परदिने पूर्णिमा सार्द्धयामत्रयमिता ततोऽधिका वा प्रतिपच्च परतोवृद्धिगामिनी तदा परदिने प्रतिपद्येव प्रदोषे **तद्दीपनं, न तु पूर्वदिनेविष्टिपुच्छे**। तत्र प्रतिपत्प्रवेशात्पूर्वमेव तद्दीपनमिति **कश्चित्**। एवं च या दिनद्वयेपि कात्स्न्येनैकदेशेन वा प्रदोषव्याप्ता सा सुतरामुत्तरा। पूर्वत्र रात्रौ भद्रासत्त्वात्। यदा तु दिनद्वयेपि प्रदोषास्पर्शः, प्रतिपदश्चवृद्ध्यभावः, उक्तसमये भद्रापुच्छाऽलाभश्च **तदा भद्रायामपि दीपनम्**। कदाचित्तत्काले ग्रहणेऽपि स्नात्वा दीपनं कार्यम्। नित्यनैमित्तिकेषु तत्राप्यधिकारात्। **इति होलोत्सवः**।

अथ श्राद्धम्। अविगीताश्राद्धव्यवहारविषयत्वं श्राद्धत्वम्। तदधिकारिणस्त्वौरसः पुत्रस्तदभावे पौत्रः। ततः पत्नी यदि दायहरा। अन्यथा यो दायहरः सः। तदभावे दौहित्रः। ततः सोदरस्ततो भ्रातृपुत्र इत्याद्यन्यत्र विस्तरः। सर्वाभावे स्त्रियः कुर्युरित्यादि विवाहोढा विषयम्। अनुपनीतोऽपि पुत्रो श्राद्धाद्यधिकारी कृतचूडश्चेत्स्वधाशब्दं प्रयुञ्जीत। अकृतचूडोपि त्रिवर्षः कृतचूडस्त्रिवर्षश्चेद्वेदमन्त्रानपि पठेत्।

तत्र **श्राद्धं द्विविधम्। पार्वणमेकोद्दिष्टञ्च**। तत्र सर्वश्राद्धानां दर्शश्राद्धं प्रकृतिः। **आपस्तम्बानामपरपक्षश्राद्धं**, तेषां सूत्रे तथैव धर्मोपदेशात्। अमाश्राद्धं च कृष्णपक्षश्राद्धाभिन्नमेव। तथाप्यमाश्राद्धमात्रकरणेनाप्यशक्तस्य कृष्णपक्षश्राद्धसिद्धिर्भवति। अविरुद्धाङ्गत्वे तन्त्रेण। विरुद्धाङ्गत्वेत्वाऽवृत्तिरस्तु इति **कश्चित्। अन्ये तु**—तस्या उभयधर्माक्रान्तत्वेन तन्मात्राधिकरणकश्राद्धानुष्ठानेनोभयोरपि सिद्धिरित्याहुः। प्रत्यमं कर्तुमशक्तस्तु कुम्भार्के वृषार्के कन्यार्के अमायामिति त्रिः कुर्यात्। तत्राप्यशक्तौ कन्यार्के अमायाम्। तत्राप्यशक्तेन ब्राह्मणभोजनं कार्यम्। **साग्नेस्तु**—पिण्डदानेनापि सिद्धिः। पूर्णा-

न्नदानाशक्तौ किञ्चिद्धान्यदानम् । तत्राप्यशक्तौ कराग्रमित तिलदानम् । तदभावे सत्यष्टातिलयुक्ततिलाञ्जलि दानम् । गोभ्यो यवसदानं किञ्चित् । सर्वाभावे वनं गत्वा भुजावूर्ध्वौकृत्वा—न मेऽस्ति वित्तं न धनं न चान्यत्श्राद्धोपयोग्यं स्वपितॄन्नतोस्मि । तृप्यन्तु भक्त्या पितरौ मयेतौ कृतौ भुजौ वर्त्मनि मारुतस्येति त्रिः पठेत् । एवञ्च एकः श्राद्धकालः । **एवमष्टकाख्यं कर्म आश्वलायनादीनां** सहोमश्राद्धरूपम् । **कात्यायनादीनां** काले अष्टका पदप्रयोगो गौणः । **तत्राश्वलायनानाम**मान्तमार्गशीर्षादीनां चतुर्णां मासानां कृष्णाष्टमी चतसृषु तदनुष्ठानम् । तादृश भाद्रपदाष्टम्यामपि माघ्यावर्षसञ्ज्ञकमेकाष्टका समानतन्त्रम् । **अन्ये**—फाल्गुनाष्टमीपरित्यागेन तादृशभाद्रपदाष्टम्यासह चतस्रः । तत्राद्यायां शाकप्राधान्यम् । द्वितीयायां मांसप्राधान्यम् । तृतीयामपूपप्राधान्यम् । चतुर्थ्यामपि शाकप्राधान्यम् । **तासां पूर्वापरदिनेऽन्वष्टके** । अयं द्रव्यभेद **आश्वलायनव्यतिरिक्तानामेव** । तेषां तु सर्वत्र द्रव्यदेवतैक्यमेव । **वृद्धिश्राद्धस्य तु**—अग्न्याधानादीनि श्रौतानि, महादान तटाकादीनि **पौराणानि** । स्त्रीसंस्कारापत्यसंस्कारादीनि **सौत्राणि** । ग्रहशान्त्यादि राज्याभिषेकादि **स्मार्तकर्माणि** । तेषां प्रारम्भकाले, वृषोत्सर्गे काम्ये, (न तु प्रेतत्वनिवृत्यर्थे) जातकर्म, प्रोषितागतकर्म, (सोष्यन्ती कर्मसु न, अष्टकासु च न) आधान, होम, वैश्वदेव, वलिकर्म, दर्शपौर्णमास, नवयज्ञेषु, प्रारम्भारम्भ एव । **इदानीं शिष्टानां** तेषु केषुचिदनाकरणमेव । कृष्णपक्षः सर्वोऽपि कालः । तत्र सकृदेव । न तु प्रतितिथ्यावृत्तिः । कामनयाप्येककृष्णपक्षे एक तिथावेव । **अत्र चतुर्दशी वर्ज्या** । एवं च यस्यांकस्याचिदन्यतिथौ कृष्णपक्षनिमित्तके श्राद्धे कृतेऽमायां तन्निमित्तं पृथक् कार्यम् । अमायामेव करणे तु न पृथक् । एवं नन्दा भृगुवार जन्मतारारेवतीरोहिणीमघा कृत्तिकाभरणीसप्तमी त्रयोदशीरविवारभौमवारगण्डवैधृतिव्यतीपातेषु कृष्णपक्षे सामान्यनिमित्तं श्राद्धं न कार्यम् ।

अथ महालयः। तत्र षट्पक्षाः। कृष्णप्रतिपदादि शुक्लप्रतिपदन्त षोडशदिनपक्षः। प्रतिपदादि दर्शान्तं पञ्चदशेति पक्षः। पञ्चम्यादि, अष्टम्यादि, दशम्यादि, चतुर्दशीवर्जं दर्शान्तम्। एकतिथिपक्षश्चेतिषट्। अत्रैकदेशवर्ति कन्यासंक्रान्तियोगेन सकलस्य पक्षस्य प्राशस्त्यम्। **हेमाद्रिणा**—पूर्णिमां गृहीत्वा षोडशपक्ष उक्तः। तिथिवृद्धावेति च युक्तम्। तदयुक्तमित्यन्ये। यज्जीवत्पितृकैराश्विनशुक्लप्रतिपदि मातामहश्राद्धं क्रियते। यच्च नवम्यां, तदपि महालयापरपक्षनिमित्तकमेव। अपरपक्षश्राद्धनिषेधस्तु तेषां सामान्यकृष्णपक्षविषयः। येषां श्राद्धे ये अधिकारिणस्तेषां कन्यागतोपलक्षितेऽपरपक्षेऽपि तैस्तैस्तृप्तेरवश्यसम्पादनीयत्वात्। अतएव जीवत्पितृकैरेव क्रियते. मृतपितृकैः पितृश्राद्धदिन एव पृथक् पृथग्वा तत्तृप्तेः सम्पादितत्वात्। अतएव पुत्रपितृव्यज्येष्ठभ्रात्रादीनामपि तत्तन्मृततिथौ जीवत्पितृकैः शिष्यैः करणं **महालये**। तत्राचारान्नवमीप्रतिपदोरेव तत्करणम्। अत्रैकतिथिपक्षातिरिक्तपक्षेषु निमन्त्रणादि विसर्जनान्त श्राद्धप्रयोगस्य यावत्तिथ्यभ्यासो न तु भेदः। संख्याप्यभ्यासानामेव। अतएव स्मृतिषु श्राद्धं दिने दिने इत्येवंवचनम्। निमन्त्रणदक्षिणादाने तु प्रतिप्रयोगं भिन्न एव। किञ्च पक्षश्राद्धार्थब्राह्मणैस्सह सकृदेव संवादोऽपि। तेषामाशौचोत्पातावन्तरेत्यागोऽन्येषांमुपादानञ्च। शास्त्रीयनिमन्त्रणाभावेनाशौचनिमन्त्रणाप्रवृत्तेः। प्रयोगस्य सम्भूय फलजनकत्वेऽपि सायं प्रातरग्निहोत्रवत् प्रतितिथिसङ्कल्पभेद एव। अन्तरा प्रतिबन्धानिश्चयेन केनचिदभ्यासवताऽपि क्षणारब्धेश्राद्धेऽन्तराशौचपाते चोत्तरप्रयोगाणामननुष्ठानमेव। मुख्यस्य प्रारम्भस्याभावात्सङ्कल्पाभावाच्च कृतानामपि सहकार्यभावादफलत्वम्। आशौचापगमे च सकृत्पक्षेण यावद्दीपावली पुनस्तत्कार्यम्। प्रतिबन्धान्तरे तु—तदैव प्रतिनिधिना कार्यम्। तत्र तिथिह्रासे तिथिद्वयप्रयुक्तस्य तन्त्रेणानुष्ठानम्। वृद्धौत्वाचारादावृत्तिः। एषु न नन्दादि वर्जनम्। एकदिनपक्षे नन्दादि चतुर्दशी च वर्ज्यानि। **इदानीं तु**—एकदिनपक्षे मृततिथिसमानजातीयाया निषेध-

प्रयोजकं नन्दादियुक्तायामपि चतुर्दशीभिन्नायां तिथौ शिष्टा महालयश्राद्धं कुर्वति । अमा, व्यतीपात, भरणीद्वादश्यष्टमीषु निषेधप्रयोजकान्तरसत्त्वेऽपि सकृन्महालयो भवत्येव । **आसु श्राद्धे महाफलम्** । नित्यं चात्रापरपक्षेऽपि श्राद्धम् । यदि केनचित्प्रतिबन्धेन, अमान्तकृष्णपक्षेऽपि महालये श्राद्धं न जातं, तदा तदनन्तरशुक्लपञ्चमीं यावत् । तत्राप्यसम्भवे तुलासङ्क्रान्तिं यावत् । तत्राप्यसम्भवे वृश्चिकसङ्क्रान्तिं यावत् । तत्रापि दीपान्विता मुख्या । **आहिताग्नेस्तु**–कृष्णपक्षसामान्यानि मित्तवदिदमपि सकृत्पक्षे दर्शे एव । **सन्यासिनस्तु**–सकृत्पक्षे द्वादश्यामेव । तत्रासम्भवेऽन्यत्रापि । एवं चतुर्दशीमृतस्यापि शस्त्रादिहतस्य महालये तिथ्यन्तरे एव । शस्त्रादिहतस्यैव तत्र श्राद्धविधेः । चतुर्दश्यामेवेत्यपि **कश्चित्** । **पौर्णमासीमृतस्य तु** श्राद्धेऽमाद्यन्यतरत् । तत्रासम्भवे तिथ्यादि निषेधविचारपूर्वं दिनान्तरे ।

अथ त्रयोदश्यां श्राद्धं विचार्यते । तत्रेदं स्वतन्त्रं, भिन्नमेव महालयनिमित्तात् । **इदमपि नित्यम्** । अस्या युगाद्यित्वेऽपि पुनर्विधिरावश्यकत्वार्थः, **फलातिशयार्थो** वा । एवमेतत्पक्षगा मघापि श्राद्धकालः । मघात्रयोदशीयोगेऽपि प्राशस्त्यम् । ये **तु** पुत्रवतः कृष्णपक्षसामान्यतस्त्रयोदशीश्राद्धनिषेधास्ते पुत्रवतोऽन्यबहुलाभार्थत्रयोदशीश्राद्धविषयाः । तेन सर्वथा सन्तानरहितस्य तद्वतोऽपि वा तदतिरिक्त मोक्षादिफलार्थिनो न निषेधः । **यत्तु**–महालयत्रयोदश्यां केवलायां मघायां वाऽत्यावश्यकं श्राद्धं, तत्पुत्रवता पिण्डदानार्घ्याऽऽनौकरणरहितं कार्यम् । नियमेन मातामहवर्गसहितं च कार्यम् । **अन्यत्र तु**–गृह्येषु मातामहानामनुक्त्या, वृद्धिश्राद्धादिषु पुनः **"षड्भ्यः पितृभ्यः इत्युक्तेश्च"** तेषामनावश्यकत्वम् । अविशेषेण मातामहश्राद्धं कार्यमित्तिपुत्र मातामहविषयम् । तादृश मातामहश्राद्धस्य दौहित्रेणावश्यकर्त्तव्यत्वात् । येन च मातुः सपिण्डनं मातामहेन सहकृतं तेन चावश्यं कार्यम् । **अपुत्रेण तु पिण्डदानमपि कार्यमिति व्यवस्था** । **केचि-**

तु—पुत्रवतः श्राद्धाभाव एव। अपुत्रः पिण्डदानरहितमित्याहुः। तदयुक्तम्।

अथ चतुर्दशी। तत्र कृष्णपक्षसामान्यचतुर्दश्यां येनकेनापि पक्षेण यस्यांकस्याञ्चित्तिथौ चतुर्दशीभिन्नायां पित्रादिश्राद्धे कृतेऽपि शस्त्रादिनिमित्तमरणनिमित्तं पुनस्तेषां श्राद्धं चतुर्दश्यां कार्यम्। **विष सर्प श्वापदादि तिर्यक् ब्राह्मण शस्त्र मरकाद्युपद्रवविह्निजलोद्बन्धनमृतानां युवावस्थामृतानां च तत्। वृक्षारोह-विद्युतादिमृतानां च।** सर्वथा दुर्मृत्युमृतानामुपलक्षणमिदम्। **यस्तु**—प्रायश्चितार्थं विहितबुद्ध्या जलादि प्रवेशेन मृतः, योवाऽतिवृद्धः प्रत्याख्यातभिषक्क्रियस्तथामृतस्तस्य चतुर्दश्यां न कार्यम्। सङ्ग्रामप्रायोपवेशनाशनानां विहितत्वेऽपि तैर्मृतानां चतुर्दश्यां श्राद्धं कार्यमेव। एतच्च पित्रादीनामप्येकोदिष्टमेव। येषां तु—सपिण्डीकरणमेव नास्ति तेषां—नैतत्। येषां वर्षमध्ये और्द्धदेहिकमेव निषिद्धमग्रे च **नारायणबल्यादिपूर्वकं विहितं,** तेषामपि यावत्सपिण्डीकरणं न भवति। अन्यकृष्णपक्षापेक्षया **महालयेऽत्यावश्यकमिदम्।** पित्रादित्रिकमध्ये द्वयोस्त्रयाणां वा शस्त्रादिहतत्वे एकोदिष्टद्वयं, त्रयं वा तन्त्रेण भवति। त्रयाणां दुर्मरणमरणे पार्वणमित्येतदनाकरम्। **यस्तु**—महालयचतुर्दश्यामेव मृतस्तस्य मृताहनिमित्तश्राद्धं यथाचारमेकोदिष्टं पार्वणं वा। **अमावस्याक्षयो यस्येत्यस्य** समूलत्वे **तु**—पार्वणमेव। तदा चतुर्दशीनिमित्तमेकोदिष्टं पृथग् न भवति। न्यूनधर्मतया पार्वणेनापि तन्त्रोपपत्तेः। सङ्क्रान्तिव्यतीपातादिनिमित्तं तस्यां पार्वणमेव। चतुर्दशीनिमित्तं तु तदा पृथक् सपिण्डं कार्यम्। सपिण्डत्वरूप विरुद्धधर्मकत्वात्। दुर्मृत्युनिमित्तके चतुर्दश्यां श्राद्धे कृतेऽपि महालयनिमित्तं दिनान्तरे कार्यमेव। महालयनिमित्तस्य तस्यावर्जनात्। मात्रादितृप्त्यर्थं पितृव्यादितृप्त्यर्थं च। येषु तु पक्षेषु चतुर्दशीवर्जनं नास्ति तेषु महालयचतुर्दशीनिमित्तयोस्तन्त्रमेव। चतुर्दश्यां दुर्मृत्युनिमित्तश्राद्धासम्भवे लोप एव,

दिनान्तरे पार्वणविधिना कार्यमिति **हेमाद्रिस्तु निर्मूलम्** । एवं कन्यास्थे रवौ पौर्णमास्यां स्वपितृपितामहप्रपितामहेभ्यः परे ये **नान्दीमुखसंज्ञकास्त्रयस्तेषां** प्रत्यब्दं पार्वणविधिना कार्यम् । **हेमाद्रिस्तु**—कन्यायोगाभावेऽपि चान्द्रभाद्रपदपौर्णमास्यां कार्यमाह—**इति महालयः**।

नवान्नश्राद्धं शरदि वसन्ते च कार्यम् । अवृष्ट्या तयोर्धान्यापाके तु यदास्यस्तदैव कार्यं । तत्रापि घनुषि न । मातापित्रोर्मृततिथिसजातीयतिथौ **प्रत्यब्दमत्यावश्यकम्** । अपुत्रज्येष्ठभ्रातुश्चावश्यकम् । कनीयसस्तु नावश्यकम् । पुत्रानुजयोः सपिण्डीकरणं पितृज्येष्ठभ्रात्रोर्यद्यपि निषिद्धं, तथापि तदभ्युदयैककामनयाऽन्यद्वारा कार्यम् । ततः स्नेहेन यदीच्छा, तदा सांवत्सरादिकमपि ताभ्यां कार्यम् । **अत्र मरणक्षणसम्बन्धिनी तिथिर्ग्राह्या** । साजात्यञ्च तन्मासतत्पक्षगतत्वेन । **अब्दश्चात्र चान्द्रः** ।

अथाब्दिकम् । इदमपि वत्सरान्ते मृताहन्येव । इदं चाब्दिकं ग्रहणतत्पूर्वकालप्राप्तं भोक्तृब्राह्मणलाभेऽन्नेनैव । तदसम्भवे आमादिनापि तद्दिन एव कार्यम् । **आमं चात्र वितुषम्** । एवं मासिकमपि । **श्राद्धान्तरे तु**—पाकश्राद्धासम्भवे तु आमान्नसाधनत्वे विवाद एव नास्ति । **यत्तु**—ग्रहणद्वितीयेऽहनि तदिति, तदनाकरम् ।

प्रसङ्गादुच्यते । **आपदि आमश्राद्धम्** । स च प्रवासादिषु पाकश्राद्धासम्भवात् । अन्नाभावे पाक्याभावकृतः सः । ग्रहणपुत्रजन्मनोः पक्कान्नभोक्तृभावकृतः सः । पत्न्यभावतद्रजोदोषैकाकी प्रवासतीर्थप्राप्त्यादिषु भोक्त्यभावकृतः सः । एवं च तत्सम्भवे तेष्वपि पाकश्राद्धमेव । **केचित्तु**—सम्भवेष्येषु आमश्राद्धं वदन्ति । **सङ्क्रमौपासनाग्न्यभावयोस्तु**—आपदभावेऽपि स्वातन्त्र्येणामश्राद्धनिमित्तत्वम् । अग्न्यभावेऽग्नौकरणं तु विप्रपाणावेव **साग्नेरपि** । **आमासम्भवे तु चतुर्गुणमूल्येन हेम्ना** । आमान्नं च द्विगुणं, भोजनपर्याप्त्या देयम् । **पुत्रजन्मनि हेमश्राद्धमेव मुख्यम्** । तदभावे आमान्नम् । तच्च

विप्रलब्धं स्वयम्भोक्तव्यमेव । **क्षत्रियादिलब्धं** यथेष्टं विनियोज्यम् । **शूद्रलब्धस्य तु**—स्वीये परकीये वा भोजन एव यथेष्टविनियोगो **न तु नित्यनैमित्तिके**। नापि विप्रलब्धवत्स्वभोजन एव। ततो लब्धहेम्ना तु श्राद्धादि नित्यादिकमपि । **स्त्रीणां शूद्राणां च सदा आमश्राद्धमेव** । पिंडास्तु–पायसादिनापि । विकिरादि तु–सर्वमामेनैव । आमादिश्राद्धे च प्राणाहुत्यादिलोपः । ग्रहणादन्यत्र मृताहे द्विजानामामश्राद्धम्, मृताहश्राद्धं पत्न्या रजस्वलायामपि तदहरेव । **हेमाद्रिस्तु**—तस्या रजोनिवृतौ पञ्चमेऽहनि कार्यम् । तदपि साग्निना । सहाधिकृतभार्यान्तरसत्वे तु तेनापि तद्दिन एवेति **तदाशयमेके**। **निरग्निकेनापि**–पञ्चमेऽहनि कार्यमित्याशयमन्ये **वर्णयन्ति** । यत्र तु भार्यैव कर्त्री, सा रजस्वला, तदा तया तु पञ्चमेऽहन्येव कार्यम् । अमादिनिमित्तं तु तस्या लुप्यत एव । अत्र रजोवद्भार्याकर्तृकममादिश्राद्धं तदहरेवाऽमेन, नत्वन्नेन । **केचित्तु**—पन्त्यभाव एवेदं, तत्सत्वे तु—**पाकेनापीत्याहुः** । **महालयश्राद्धमप्येवम्** । आशौचेन तु क्षयाहप्रतिबन्धे आशौचान्त्यदिनोत्तरदिने तत् । **एवं महालयमासिकाद्यपि** । तद्भिन्नममादिश्राद्धं तु लुप्यत एव । तत्रासम्भवे कृष्णैकादशी, अमाशुक्लैकादश्यान्यतरत् । **तत्रान्त्येमुख्ये** । तत्र सन्निहितपूर्वपूर्वाभावे उत्तरम् । **पाकासम्भवादिनाऽब्दिकविघ्ने तु**—तदुत्तरामादौ पूर्ववत् । **व्याध्याद्यशक्तपुत्रादिना तु**–तद्दिन एवान्नेन प्रतिनिधिद्वारा । प्रतिनिधिनाप्यसम्भवेऽमादिषु । **मासिकं त्वाशौचातिरिक्तनिमित्तेनान्तरितमुत्तरमासिकेन सह कार्यम्** । तद्दिनेचोपोषणरूपं प्रायश्चितं च कार्यम् । **आशौचेन प्रतिबन्धे तु आब्दिकवत्** । यस्य मरणतिथिर्न ज्ञायते, मासस्तु ज्ञायते, तदाब्दिकं तन्मासगतामायाम् । पक्षज्ञाने यदि शुक्लपक्षस्तदाशुक्लैकादश्याम् । कृष्णे तु, अमा तदेकादशी वा । पक्षाज्ञानेपीमे । तत्रामा मुख्या । यदा मरणतिथिरेव ज्ञायते, न मासस्तदा मार्गमाघभाद्रपदान्यतमे मासि तिथौ

कार्यम् । आषाढोऽपि कैश्चिदुक्तः । तत्र पक्षज्ञाने तत्पक्षगता सा । नोचेत्कृष्णपक्षगता सा । मरणसम्बन्धिनोस्तिथिमासयोरुभयोरप्यज्ञाने, प्रस्थानोत्तरमेव । यस्य जीवनवार्ता नास्ति—तन्मृताहश्राद्धे प्रस्थानदिनमासौ ग्राह्यौ । प्रस्थानस्यापि मासमात्रज्ञाने तन्मासादिषु । दिनमात्रज्ञाने मार्गादिषु तद्दिने । शुक्लपक्षे तदज्ञानयोः पूर्ववत् । यदा प्रस्थानदिनमासयोरप्यज्ञानं, यस्य वा प्रस्थानोत्तरं बहुकालं जीवनवार्ता श्रुता, पश्चात्तन्मरणज्ञानं, ननु तद्दिनमासौ, तदा मरणसम्बन्धिनौ दिनमासौ ग्राह्यौ । मरणवार्ताश्रवणसम्बन्धिमासमात्रस्मरणे तदमादिषु । तद्दिनमात्रस्मरणे मार्गादिसम्बन्धि तद्दिने । पक्षज्ञानाज्ञानयोः पूर्ववत् । यस्य तु—मरणतच्छ्रवणप्रस्थानानां सर्वेषामपि दिनमासयोरज्ञाने तस्य माघमार्गाद्यन्यतमामायाम् । यस्य त्वज्ञातदेशगतस्यानिर्धारणात् द्वादशवर्षादि प्रतीक्षया प्रतिकृतिदाहाद्यौर्ध्वदेहिकं क्रियते, तस्य दाहकालिकतिथावेवाब्दिकमासिके कार्यम् । तत्र पितृविषये तारुण्यादिसत्त्वे पञ्चदशवर्षप्रतीक्षा । पित्रतिरिक्तस्य तु तादृशत्वे द्वादशाब्दम् । पितुरपि पञ्चाशदूर्ध्ववयसो द्वादशवर्षम् । तदानीं भार्यायाः सहगमनादिकमपि भवत्येव । एतेचामाद्याः नियमेन षड्दैवत्यपार्वणकालाः प्रत्याब्दिकसपिण्डीकरणे वर्जयित्वा । सपिण्डीकरणात् प्राक् तु एकोद्दिष्टमेव । महालयादिषु सर्वदैवत्यमिति केचित् । आब्दिकं तु यतेः पार्वणमेव । प्रेतपक्षामामृतयोरपि पार्वणमेवेति केचित् । मातापित्रोस्तु—औरसक्षेत्रजाभ्यां साग्निकाभ्यां पार्वणमेव । अन्यैस्तु—एकोद्दिष्टमामं वेति केचित् ।

मिताक्षरा तु—मातापितृविषये पार्वणैकोद्दिष्टयोर्विहितयोराचाराद्व्यवस्थामाह—तत्र प्राच्यादय एकोद्दिष्टमाचरन्ति । पार्वणं दाक्षिणात्याः । दाक्षिणात्यानामपि ज्येष्ठपितृव्यभ्रातृमातृसपत्नीनामपुत्राणां पार्वणे आचारः । कनिष्ठानां तु-

एकोद्दिष्टे। दम्पत्योर्मिथः पार्वणे। मातामहस्यापि पार्वणे। अन्येषां तु-एकोद्दिष्टमेव। प्राच्यास्तु-क्षयाहे सर्वेषामेकोद्दिष्टमेवाचरन्ति।

सङ्घातमरणेत्वासक्त्या श्राद्धक्रमः। यथा पतिपत्न्योः सम्बन्धः प्रत्यासन्नम्। पुत्रस्य ततो विप्रकृष्टः। ततोऽपि भ्रातुरित्याद्यूह्यम्। पित्रोः पत्न्यादीनां तत् द्वादशाह एव। एकदिने तिथिभेदेन पित्रोर्मरणे सहैवोभयोः। **अनुगमनेप्येवम्।** **सपिण्डीकरणं तु**-तत्तद्वादशाह एव। एकदिने तिथिभेदेन पित्रोः प्राप्तौ पितृपूर्वकं द्वयोरपि क्रमेण। **अन्येषां** तथा प्राप्तौ वा सति क्रमेण। **"नैकः श्राद्धद्वयं कुर्यादिति तु"**-एकस्मिन् क्रियमाणे यत्रापरस्यप्रसङ्गात्सिद्धिस्तद्विषयम्। यथा अमानित्यश्राद्धयोः, **यथाचारदर्शनयुगादिश्राद्धयोः।** यत्र पत्नी-भर्तृचित्यामन्वारुह्य मृता, तत्र तिथिभेदेन मरणे तत्तत्तिथौ तस्य तस्याश्च पृथगेवाब्दिकम्। यदा तत्र तिथ्यैक्यं, पाकं तन्त्रेण कृत्वा श्राद्धं पृथगेव। **एवमन्येषामपि सङ्घातमरणे। आसक्तिक्रमेण मरणक्रमेण वा क्रमः। परन्त्वन्वारोहणे** द्वयोः पिण्डैक्यम्। द्विपितृकक्रियमाणे श्राद्धे पितृद्वयोरुद्दिश्यैकैकपिण्डवत्। ब्राह्मणोप्येक एव। **नवश्राद्धानि पृथगेव।** तत्र पिण्डोऽपि पृथगेव। अङ्गतन्त्रता तु तत्रापि पृथगेव, ब्राह्मणः पिण्डश्च। अङ्गानामेव तन्त्रमित्यपि पक्षान्तर-**माब्दिकविषये। अनयोश्च शक्त्यपेक्षया व्यवस्था।** अव्यवहितभिन्नतिथिमरणे खण्डतिथित्वादेकदिनश्राद्धप्राप्तावप्ययमेव निर्णयः। **यत्तु**-तिथिभेदेनाप्यान्वारोहणे मर्तृतिथावेव पत्न्या अपि श्राद्धानुष्ठानं, **तन्न युक्तम्।** तत्र तत्तत्तिथौ पृथगेव तस्य तस्याश्च श्राद्धं युक्तम्। **अनेकाभिर्मातृभिरेकचित्यारोहेप्येवमेव। तत्र द्वितीयपक्षे**-प्रथमं पितुस्ततः साक्षान्मातुस्ततो ज्येष्ठादिक्रमेण। **पार्वणैकोद्दिष्टयोस्सन्निपाते** पूर्वं पार्वणम्, तत एकोद्दिष्टमित्येके। **विपरीतमित्यन्ये।** अनेकनिमित्तसन्निपाते निमित्तानुक्रमेण।

यद्यप्येकदेवताकश्राद्धद्वयादीन्येकदिने निषिद्धानि, तथापि नैमित्तिकानि वचनबलाद्भवन्त्येव । नित्यकाम्ययोरेकदेवत्ययोः सन्निपाते काम्येन नित्यसिद्धिः । इति पार्वण श्राद्धकालः ।

सपिण्डीकरणात्प्राक् नियमेनैकोद्दिष्टमेव । तत्र दशाहान्तक्रियमाणानि नवानि । एष्वेकोद्दिष्टेष्वपि ब्राह्मणा युग्मा एवेत्येके । अन्ये तु—अयुग्मा एवेत्याहुः । एकादशाहिके एकोऽपि । तत्र शय्यादानवृषोत्सर्गादि । एकादशाहिकश्राद्धं स्वस्वाऽऽशौचान्तोत्तरदिने । तेन क्षत्रियादिभिस्त्रयोदशाहादौ त्र्यहैकाहाशौचिभिश्च तन्मध्य एव दशाहकृत्यानुष्ठाने तदन्त एव तत्कार्यमिति शूलपाणिः । मिताक्षरायाम्-क्षत्रियादिभिराशौचमध्येपि वचनादेकादश एव तत्कार्यम् । त्र्यहैकाहाशौचिभिरपि तत्रैव तत्कार्यमित्युक्तम् । गात्रपूरकदशमपिण्डसमाप्तिस्त्वेतन्मतेपि क्षत्रियादीनां स्वस्वाशौचान्त्यदिन एव । इति नवानि ।

अथ नवमिश्राणि । तानि च षोडश श्राद्धानि । आद्यमासिकोनमासिकद्वितीयमासिक त्रैपक्षिक तृतीयमासिक चतुर्थमासिक पञ्चममासिक षाण्मासिकोऽनषाण्मासिक सप्तमाष्टमनवमदशमैकादशद्वादशोनाब्दिकानीति ॥१६॥ तत्र मासिकानि प्रथममासाद्यमृततिथौ । ऊनानि तु—तत्तन्मासान्त्यतिथिषु । एषु भोजने प्रायश्चितानि-नवश्राद्धे चान्द्रायणम् । मासिके पराकः । त्रैपक्षिकेऽतिकृच्छ्रः । षाण्मासिके कृच्छ्रः । ऊनाब्दिके पादद्वयकृच्छ्रः । आब्दिके एकाह इति । ऊनाद्यमासिकं द्वादशाहेऽपि । तत्रैकादशाहे त्रयम्-नवश्राद्धमाद्यमासिकम्महैकोद्दिष्टं चेति । महैकोद्दिष्टं विप्राभावेऽग्नौ, तत्र त्रैपक्षिकपर्यन्तानि । आहिताग्नेर्दाहदिनादारभ्यैकादशाहादिषु । एकाग्नेर्निरग्नेर्वा मरणदिनादारभ्य । तदूर्ध्वानितूभयोर्मरणदिनादेव । एतानि षोडशश्राद्धानि स्व स्व

काले कर्त्तव्यानीति मुख्यः कल्पः। यद्वा—एकस्मिन्नेवाहि एकादशे द्वादशे वा। द्वादशादिनपक्षे आद्यमासिकन्यूनानि पञ्चदशैव। एवं वृद्धिपूर्वदिनादौ (यदा सपिण्डीकरणार्थं क्रियते, तदा) यावन्ति स्वकालकृताऽवशिष्टानि तावन्त्येव। तथैकादशाहप्रभृति आब्दमेकविप्रभोजनपर्याप्यान्नसहित उदकुम्भो देयः। अत्र पिण्डदानं कृताकृतम्। तत्र वर्षान्तसपिण्डीकरणपक्षे प्रेतशब्देनोल्लेखः। द्वादशाहादौ सपिण्डीकरणे प्रेतशब्दोल्लेखो न कार्यः। प्रत्यहं तत्पूरणाशक्तौ, एकस्मिन्नेवदिनेऽपकृष्यापि कार्याणि। अत्रोदकुम्भान्नयोः पृथगेव त्यागः। एष उदकुम्भः, इदमन्नमिति। नतु सोदकुम्भमिति वा, आचारात्। अत्रार्घ्यावाहनादि श्राद्धीयसकलधर्मनिवृत्तिः। कर्तृभोक्तृनियमराहित्यं च। यदेदं पार्वणं तदाप्यदैवं, एकोद्दिष्टेतिकर्त्तव्यता च। एकोऽर्घ्यः, एकं दलम्। एकः पिण्डो नावाहनाऽग्नौकरणविश्वेदेवाः, स्वदितमिति तृप्तिप्रश्नः। सुस्वदितमित्यनुज्ञा। उपतिष्ठतामित्यक्षय्यस्थानेऽभिरम्यतामिति विसर्गेऽभिरताः स्मः, इत्युत्तरमिति।

अथ सपिण्डीकरणकालः। तत्र साग्निकेन पिण्डपितृयज्ञाधिकारिणा कर्त्ताऽशौचोत्तरदिने यथासम्भवं षोडशश्राद्धानि विधाय तदुत्तरदिने दर्शादर्वाक् यत्रकापि दिने वा सपिण्डीकरणं कृत्वा दर्शे पिण्डपितृयज्ञः। द्वादशदिने एव दर्शपाते तत्रैव तन्त्रेण षोडशश्राद्धानि, सपिण्डनम्। पिण्डपितृयज्ञस्य कर्तुमशक्यत्वात् मृत्पितृकस्य तदकरणे प्रत्यवायात्। मातुरपि पितृत्वप्राप्तिः श्राद्धार्थमिव पिण्डपितृयज्ञार्थमप्यपेक्षितैव, तत्पिण्डेष्वपि तस्या अंशभागित्वात्। नचैवं पिण्डपितृयज्ञेपि सपत्नीकत्वेनोल्लेखापत्तिः। तं विनाप्यंशभागित्वेनोपपत्तेः। मातुर्मातामहेन सपिण्डने तत् पिण्ड एव। अन्यथा मातामहांशभागित्वार्थं तत्रापि सदुहितृकेत्युल्लेखापत्तेः। एवं च श्राद्धेऽपि तादृशोल्लेखोऽयुक्त एव। दर्शश्राद्धार्थमपि साग्निकस्यापकर्षे आवश्यकः। तस्यापि सपिण्डनं विना तं

प्रति निषिद्धत्वात्। एवं दर्शश्राद्धाधिकारिसच्छूद्रैरपि दर्शश्राद्धार्थं द्वादशाह एव कार्यम्। नत्वनाहिताग्निवस्त्रयोदशे। यथाहिताग्नेः प्रतिबन्धकवशादेषुनजातं तदा वक्ष्यमाण त्रिपक्षादिषु कार्यम्। निरग्निकेनत्वाहिताग्नेः प्रेतस्य मृततिथ्यधिकतृतीयपक्षे यत्र कापि तत्कार्यम्। प्रेतश्राद्धनिषिद्धतिथिनक्षत्रादिकं तु परिहार्यम्। एतन्निरग्निकस्याहिताग्निप्रेतविषयं कालं प्राच्या न लिखन्ति। उभयोर्निरग्निकत्वे सम्वत्सरपूर्त्यनन्तरमृततिथिर्मुख्यः कालः। स्मृत्यर्थसारे—तत्पूर्वभाविप्रथमसम्वत्सरान्त्यदिने तदुक्तम्। तदयुक्तम्। तत्र प्रथमाब्दिकस्य लोप एवेति श्रीदत्तादयः।

परे तु—सपिण्डीकरणे प्रेतत्वनिवृत्तिपूर्वक पितृत्वप्राप्तिरूपफलभागि प्रेतदैवत्यत्वेनैकोद्दिष्टस्य मुख्यत्वात्तस्य मध्याह्नः कालः। पार्वणं तु—तदभावे संयोजनस्य कर्तुमशक्यत्वात्तदुपकारि, आब्दिकस्य तु पार्वणत्वादपराह्णः काल इति न तत्कालावरोधः। द्वितीयश्राद्धकरणोत्तरं तन्त्रेणोभयान्नभोजने न क्षतिः। येषामप्याब्दिकमेकोद्दिष्टं, तैरपि गौणकालस्याविरोधात्तत्कर्तुं शक्यम्। यद्यपि प्रेतैकोद्दिष्टशेषभोजनं निषिद्धन्तथापि पार्वणांशतद्भोजनमावश्यकम्। अतएव तत्र पार्वणैकोद्दिष्टांशयोः पाकभेदाचारः शिष्टानाम्। एवञ्च सपिण्डीकरणं कृत्वा तद्दिनएवाब्दिकानुष्ठानमित्याहुः। सम्वत्सरान्ते तत्करणाशक्तिनिर्णये तु—एकादश,नव,षष्ठ,तृतीयमासतृतीयपक्षेषु यस्यां कस्याञ्चित्तिथौ क्रमेण पूर्वपूर्वाभावे। तत्राप्यशक्तौ—एकादशदिनमारभ्य द्वादशसु षोडशश्राद्धानि कृत्वा त्रयोदशे ११ आद्यं १२ ऊनाद्यं द्वितीयं च १३ त्रैपाक्षिकं तृतीयं च १४ चतुर्थं १५ पञ्चमं १६ षष्ठं १७ ऊनषाण्मासिकं सप्तमं च १८ अष्टमं १९ नवमं २० दशमं २१ एकादशं २२ द्वादशमूनाब्दिकं चेति। तत्राप्यशक्तौ एकादशे वा तानि कृत्वा मृतदिनाद्द्वादशाहे अयमेव पक्षः शस्तः। 'आनन्त्यात्कुलधर्माणां पुंसां चैवा-

युषः क्षयात्। अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते' इत्युक्तेः। अस्मादेव ज्ञायते सपिण्डीकरणाधिकारिणा यावत्सपिण्डीकरणं, कुलाचारादिप्राप्तमपि माङ्गल्यं कर्म न कार्यमिति। द्वादशाहादिकाले प्रमादादकृतन्तत्तदुत्तरभाविकाले यथासम्भवं कार्यम्। तथा द्वादशाहातिरिक्तपक्षेष्वावश्यकं वृद्ध्यादिप्राप्तौ तन्निमित्तमर्वागपि वृद्धिसन्निहिते कार्यम्। पितृत्वाभावेन वृद्धिश्राद्धस्य कर्तुमशक्यत्वात्। एवं च वृद्धिश्राद्धे येषां देवतात्वं तत्सर्वसपिण्डनस्यापकर्षः। एवं पितृव्यादिभिर्भ्रातुः पुत्रादीनां संस्कारे संस्कार्यपित्रादीनामपि तदङ्गश्राद्धे देवतात्वेन तन्निमित्तं संस्कार्यपित्रादिसपिण्डनस्याप्यपकर्षः।

यत्तु—यस्यकस्यापि सपिण्डनस्य मृतौ तत्सपिण्डनाभावे येनकेनापि तत्सपिण्डेन तदसम्बद्धश्राद्धाङ्गकमपि स्वपुत्रोत्सवादि न क्रियते, तदुपस्थितौ च सपिण्डनानधिकारिणाप्याकृष्य क्रियते, तन्निर्मूलम्। आचारएवमूलम्। तत्र ज्येष्ठासन्निधौ कनिष्ठेनाप्यपकृष्य कार्यम्। मैथिलास्तु—ज्येष्ठेऽसन्निहिते कनिष्ठेन स्वपुत्रादिसंस्कारोपस्थितौ पितरिमृते पितामहादेरेव श्राद्धं कार्यमित्याहुः। तदयुक्तमित्यन्ये। तत्र यदा तदपकर्षप्रसक्तिः, तदा स्वकालकृतावशिष्टषोडशश्राद्धान्यप्यपकृष्य कार्याणि। अपकृष्य कृतान्यपि स्वस्वकाले पुनरप्यनुष्ठेयान्येव। द्वादशाहे सपिण्डीकरणे षोडशश्राद्धे च कृते पुनः स्वकालेऽनुष्ठीयमाने तेषु वृद्ध्युपस्थितौ पुनस्तदपकर्षः। तदुत्तरं च पुनर्न कार्याणि। येषामधिकारिणामुत्तरक्रियाया नावश्यकत्वं तैः सपिण्डीकरणोत्तरं षोडशश्राद्धानि न कार्याणि। यदा पितामहे प्रपितामहे वा कृतसपिण्डीकरणे पितामृतस्तदा त्रयोः सपिण्डनेन पितृभावे तत्पुत्रादिना सम्पादिते तदभावे स्वयं वा तत्सम्पाद्य पितुस्तत्कार्यम्। यदि तथा क्रियमाणे वर्षान्तर्पयन्तकालातिक्रमो न भवति। तदतिक्रमे त्वकृतसपिण्डनाभ्यामपि ताभ्यां पितुः सपिण्डनमन्तिमकाले कार्यम्। एवं कृते दर्शश्राद्धमपि तादृशाभ्यामपि ताभ्यां सह कार्यम्। सपिण्डीकृताभ्यामपि सुतराम्। एवं महालयादीन्यपि।

केचित्तु—सपिण्डने कृतेऽपि प्रथमाब्दे दर्शश्राद्धादीनि न कार्याणीत्याहुः। यत्र तु सहगमनेनान्यथा वा स्त्रियाः पत्यासह सपिण्डीकरणं, तत्र भर्त्तर्यकृतसपिण्डनेऽपि प्रेतीभूतेनैव सह तेन तस्याः सपिण्डनम्। अखण्डपत्नीपिण्डप्रेतस्यैव भर्तुः पिण्डे संयोज्य तादृशं भर्तृपिण्डं त्रेधाकृत्वा पित्रादिपिण्डत्रये तस्य संयोजनमिति प्रकारेणैकोद्दिष्टद्वयवैश्वदेवपार्वणार्थविप्रपात्रोपादानेन सर्वत्र च पिण्डसंयोजनं, पिण्डोत्थापनपर्यन्तं पिण्डदानप्रयोगं कृत्वा कार्यमिति **बहवः**। **अन्ये तु**—सपिण्डनं तावन्मात्रोपयोगिपात्रोपादानेन कृत्वा तद्दिन एव कालान्तरे वा, भिन्नप्रयोगं स्त्रियाः सपिण्डनं कार्यमिति **मन्यन्ते**।

व्युत्क्रममृतौ तु—पितामहे विद्यमानेऽपि पितरि मृते प्रपितामहपूर्वकास्त्रयः पिण्डास्तेषु च पैतृकस्य नियोजनम्। एवं मातुः प्रपितामह्यादिभिः। एवं प्रपितामहजीवने तत्पित्रादिभिः पितामहे मृतेऽपि। **मातापितृभर्तृभिन्नानां व्युत्क्रममृतानां नैव सपिण्डीकरणम्। त्रयाणां यौगपद्ये तु प्राधान्यात्पितुः सपिण्डनं कृत्वा पूर्वयोः कुर्यात्।** पितामहेमृते, दशाहान्तःपातिपितृमृतौ पितुः संस्कारं कृत्वा पितामहस्य पुनः सर्वमावर्त्तयेत्। वृत्ते दशाहे तु नैवम्। अशक्तपित्रनुज्ञया पौत्रेण पितामहश्राद्धे प्रक्रान्ते पितृमृतौ तदाशौचं वहन्नेव पौत्रः पितामहकर्मापि कुर्यादिति **बहवः**। **स्त्रीणां तु** भर्तृगोत्रेणैव। तत्र जीवत्पितापितामह्याः। तत्सत्त्वे प्रपितामह्याः। मृत्पितृकः पित्रा। पुत्रिकासुतो मातामहेन। **अपुत्रायास्तु** भार्यायाः श्वश्रूवादिभिः सह। एवमपुत्रस्य भर्तुः स्त्रियाप्यमन्त्रकं तत्कार्यम्। अग्रे आब्दिकादिकं च। **ब्रह्मचारिणां यतीनां च सपिण्डनं नास्ति। आद्यानां सदैकोद्दिष्टमेव। अन्त्यानां पार्वणमेव। आसुरादिविवाहोढानां** पितृगोत्रेणैव, तन्मातृपितामहीप्रपितामहीभिस्तन्मातामहेन वा तत्। **केचित्तु**—व्युत्क्रममृतानां वसुरुद्रादित्यैः सपिण्डनमपुत्राणामित्याहुः।

इति श्राद्धकालाः।

अथ तद्विषयतिथिनिर्णयः। तद्रात्रौ द्वयोः सन्ध्ययोः, अचिरोदिते सूर्ये, अतिसन्ध्यासमीपतः चतुर्थप्रहरे च न कार्यम्। तत्र प्रातः सन्ध्या तत्समीपनिषेधः प्रातःकालिकवृद्धिश्राद्धविषयः। सोऽपि पुत्रजन्मातिरिक्ते। सायं सन्ध्यातत्समीपनिषेधः, आपराह्णिकपार्वणविषयः। **अपराह्णस्य द्वेधा त्रेधा विभागेन रात्रिपर्यन्तत्वात्**। रात्रिनिषेधस्तीर्थश्राद्धविषयः। ग्रहणपुत्रजन्मादिनिमित्तं श्राद्धमलभ्ययोगादिनिमित्तं च तत्रापि। एवं रात्रौ विवाहे यदा प्रातर्वृद्धिश्राद्धं न कृतं, तदा रात्रावपि तदिति **शूलपाणिः**। तीर्थश्राद्धं च रात्रिव्यतिरिक्तेकाले प्रातः सायाह्ने वा यदैव तीर्थप्राप्तिस्तदा मुख्यकालमप्रतीक्ष्यापि अविलम्बेन कार्यम्। एवं मुख्यकालं यावदस्थायि द्रव्यब्राह्मणसम्पतावपि। भोजनोत्तरं तीर्थप्राप्तावपि न श्राद्धं, किन्तु परेद्युरेव।

हरदत्तस्तु—प्रारब्धे श्राद्धे केनापि प्रतिबन्धेनासमाप्तावेव सूर्यास्ते रात्रौ तन्न समापनीयं **निषेधात्**। किन्त्वर्द्धमेव स्थापयित्वा परेद्युः तत्समापनम्, यजमानेनापि तदुत्तरमेव भोक्तव्यमित्याह।

माधवस्तु—रात्रावेव समापनमाह। **आद्यं युक्तम्**। तत्र **दैविके पूर्वाह्णः शस्तः। पार्वणे अपराह्णः शस्तः। एकोद्दिष्टे मध्याह्नः। वृद्धौ त्रिमुहूर्त्तात्मकं प्रातः। आमश्राद्धे पूर्वाह्णः। सायाह्नोऽपि गौणः कालः**। पार्वणप्रारम्भे (दिनाष्टममुहूर्त्तात्मकः) **कुतपः** शस्तः। एवं च वृद्धिश्राद्धातिरिक्ते प्रातःकालीनमुहूर्त्तद्वयातिरिक्तः सन्ध्यापर्यन्तश्राद्धकालः। प्रातः सायाह्नव्यतिरिक्तं तदन्तरालमुहूर्त्तनवकमित्यन्ये। तत्र **कुतपादिमुहूर्त्तपञ्चकं पार्वणेऽतिशस्तम्**। एकोद्दिष्टे मध्याह्नीयकुतपरौहिणात्मकमुहूर्त्तद्वयम्, सायाह्नोऽप्यनयोर्गौणः। प्रातः कालस्त्वनयोर्गौणोऽपि न। **केचित्तु**—शुक्लपक्षीयेपार्वणे द्वेधाविभक्तपूर्वाह्णान्तर्गतकुतपपूर्वभागे आरम्भः। **कृष्णपक्षीये** तादृशापराह्णान्तर्गत तदुत्तरभागे आरम्भ **इत्याहुः**। एकोद्दिष्टस्य तु सर्वदा कुतपपूर्वभाग एवापेक्रमः। गौणतया तत्पूर्वभावि **गान्धर्वेप्युप-**

क्रमः । दैविकमश्राद्धयोर्यः पूर्वाह्णस्तत्र पूर्वाह्णांगमध्याह्नप्राक्भावी **सङ्गवः**। **शूद्रकर्तृकामश्राद्धे न पूर्वाह्णविधिरिति हेमाद्रिः** । वृद्धिश्राद्धे प्रातश्च दिनाद्यमुहूर्त्तत्रयात्मकः । अपराह्णश्चाहिताग्निकर्तृकेपार्वणे **त्रेधाविभागेनैव । अन्येषां तु—पञ्चधाविभागेनैव ।**

अथ खण्डातिथिः, दर्शातिरिक्ते, एकोद्दिष्टे पार्वणे च निर्णीयते । तत्र- **एकोद्दिष्टेकुतुपरौहिणरूपमध्याह्नव्यापिनी, पार्वणे** च कुतुपादिमुहूर्त्तपञ्चकव्यापिनी ग्राह्या । कृष्णपक्षपुरस्कारेण विहितपार्वणे तु तदुत्तरार्धादिसार्धमुहूर्तचतुष्टयव्यापिनी ग्राह्या । यदा पार्वणे तादृशी न लभ्यते तदा प्रधानयोगकालत्रिमुहूर्तात्मकापराह्णव्यापिनी ग्राह्या । तत्र यैकदिन एव कार्त्स्न्येनैकदेशेन वोक्तयोः श्राद्धयोः काले वर्त्तते सा सैव ग्राह्या । दिनद्वयेऽपि वैषम्येण तदेकदेशव्याप्तौ तदाधिक्यवती । दिनद्वयेऽपि साम्येन तदेकदेशव्याप्तिस्तस्या एव तिथिक्षयेण साम्येन वृद्ध्या च भवति । तत्र क्षये पूर्वा । वृद्धावुत्तरा । साम्येचोत्तरा । यदा तु वृद्ध्या दिनद्वयेऽपि तयोरुत्तरयोरुक्तंकालं सम्पूर्णं व्याप्नोति तदोत्तरतिथेः क्षये पूर्वा, साम्ये च पूर्वा, वृद्धावुत्तरा । **माधवस्त्वत्र** विषये उत्तरतिथेः साम्येऽप्युत्तरा ग्राह्येत्याह—**तन्निर्मूलम्** । मासिकेप्येवमेवाब्दिकवत् । मृताहव्यतिरिक्तेषु काम्यादिषु दिनद्वये कालव्याप्तौ सदा पूर्वैव । दिनद्वये कर्मकालस्पर्शिनी च पूर्वैव । श्राद्धंत्वेकभक्तादिवत्स्वकाल एव । तत्र तिथ्यभावेऽपि शुक्लपक्षगयुगाद्यव्यतिरिक्तेषु **सर्वश्राद्धेष्वयमेव निर्णयः** । शुक्लपक्षयुगाद्या तु कुतुपपूर्वाह्णरूपपूर्वाह्णव्यापिनी यदा परदिने

हेमाद्रिस्तु—शुक्लपक्षगासु मन्वन्तरास्वप्ययमेव निर्णय इत्याह । सङ्गवकालिकयोः, आमदैवश्राद्धयोरप्ययमेव तद्व्याप्त्यादौ निर्णयः । दिनद्वये कृत्स्नकर्मकालव्याप्तौ तदस्पर्शे च दैविके उत्तरा ।

अथामा निर्णीयते । तत्र येषां साग्निकानामन्वाधान पिण्डपितृयज्ञ दर्शश्राद्धान्येकदिनकर्त्तव्यानि, तैस्त्रेधाविभक्तभागेन तृतीयभाग-

रूपापराह्णव्यापिन्यमा ग्राह्या । दर्शदिने नित्यश्राद्धं न पृथक्, प्रसङ्गेन सिद्धेः । पितृबलिस्तु भवत्येव, तस्य पितृभ्य इति बहुवचनेन साधारणपितृदैवत्यतथाप्रसङ्गादसिद्धेः । तत्राहिताग्नेः, श्राद्धात्पूर्वमेव । केवलौपासनिकस्य श्राद्धान्त एव । तं प्रति च दिनान्त्यमुहूर्त्तएव निषिद्धो न सम्पूर्णः । सायाह्नमुहूर्त्तद्वये तावदनुष्ठानासम्भवात् । पिण्डपितृयज्ञस्याप्यपराह्णकालत्वात् । तत्र तृतीयभागरूपापराह्णव्याप्तौ दिनद्वयेऽपि तद्वयाप्तिपक्षयोरसम्भव एव । त्रिमुहूर्त्ताधिकवृद्धिक्षययोरभावात् । तस्मात्पक्षचतुष्टयमेव । अन्यतरदिन एव कात्स्न्र्येनैकदेशेन वा व्याप्तिः । दिनद्वयेऽपि साम्येन वैषम्येण वा तदेकदेशव्याप्तिरिति । तत्रैकस्मिन्नेव दिने कृत्स्नकालव्याप्तिरितरदिने तदस्पर्शेनैकदेशव्याप्त्या वा भवति । तत्र तदस्पर्शश्चतुर्दश्यपेक्षया अमायाः साम्येनाधिक्येन क्षयेण वा । एकदेशव्याप्तिराधिक्येनैव । तत्र या पूर्वेद्युरेव कृत्स्नकालव्यापिनी परत्र तदेकदेशमपि न स्पृशति सा तावत्पूर्वैव । याऽपि तादृशी परत्र तदेकदेशस्पर्शिनी सापि पूर्वैव । येषां परदिने चन्द्रदर्शनादेकदेशव्याप्तिदिनएव यागस्तेषां परैव । यात्वेकदेशमपि पूर्वेद्युरेव प्राप्नोति सा तु पूर्वैव । दिनद्वयेऽपि क्षयेणैव देशसमव्याप्तावपि पूर्वैव । यात्तूत्तरैव कृत्स्नकालव्यापिनी पूर्वेद्युस्तदस्पर्शेन वा सोत्तरैव । याऽपि परत्रैवैकदेशव्यापिनी, साप्युत्तरैव । या तु दिनद्वयेऽपि वैषम्येणैकदेशव्यापिनी, सा यैवाधिका सैव ग्राह्या । यागस्य तृतीयदिनगतत्वे तु तदनुरोधेनारूपाप्युत्तरैव । याऽपि दिनद्वये साम्येनैकदेशव्यापिनी सा यदि क्षयेण, तदा पूर्वैव । यदि वृद्ध्या, तदोत्तरा यागप्रयुक्तोऽपवादोऽत्रापि । यदि साम्येन तदा परा । यागप्रयुक्तोऽपवादोऽत्रापि । अत्र यदा चतुर्दशी मिश्रामायां श्राद्धं, तदा यद्यमाप्रतीक्षयाऽतिसन्ध्यासमीपात्पूर्वं पिण्डपितृयज्ञः, श्राद्धञ्चानुष्ठातुं शक्यते, तदा सम्प्रतीक्षा । नोचेच्चतुर्दश्याष्टमांशे चतुर्थभागोनकलावशिष्टतारूपक्षीणताऽमासप्तमांशे कृत्स्नपक्षे । ज्येष्ठमार्गयोस्तु, अमान्ते कृत्स्नक्षय इति ज्योतिःशास्त्रे प्रसिद्धम् ।

अथ निरग्निकान् प्रति सा निर्णीयते । तेषां पञ्चधा विभक्तापराह्णव्याप्त्या निर्णयः । तत्र या पूर्वैव तादृशी, सा सैवग्राह्या । दिनद्वये कृत्स्नापराह्णव्याप्तावुत्तरतिथेर्वृद्धिसाम्ययोरुत्तरैव । तस्याः क्षये पूर्वा । दिनद्वयेऽपि वैषम्येणैकदेशव्याप्तावधिकतद्वती ग्राह्या । दिनद्वयेऽपि साम्येन तस्यां तु, अमावृद्धिसाम्ययोः परा । अमाक्षये पूर्वा । एतत्पर्यन्तमन्वाधान, पिण्डपितृयज्ञ, श्राद्धकर्त्तव्यता, नियमरहितसाग्निकानामपि तुल्यम् । पिण्डपितृयज्ञश्राद्धयोर्भिन्नदिनपातेऽप्यपराह्णस्पर्शे तु साग्निभिः पूर्वा कार्या । निरग्निकैः परा । साग्नयोऽत्रौपासनाग्निमन्तोपि ।

हेमाद्रिस्तु–निरग्निकानां कुतुपोऽमाश्राद्धकाल इति तद्व्याप्त्यैव तेषां निर्णयः ॥ यत्र मुख्यकुतुपेऽसम्भवस्तत्र कुतुपादित्रिमुहूर्तरूपगौणकुतुपव्याप्त्या निर्णयः । अपराह्णस्तु–साग्निकविषय इत्याह–कालादर्शोऽप्येवमेव । तदयुक्तमित्यन्ये । प्राच्यास्तु–दिनयेऽप्यपराह्णव्याप्तौ तिथिक्षयविषये साग्नेः पूर्वा, निरग्नेरुत्तरा । दिनद्वयेऽप्यपराह्णव्याप्तौ गान्धर्व, कुतुप, रौहिणरूपत्रिमुहूर्तव्यापिनी या सा सैव ग्राह्येत्यपि वदन्ति । रौद्र, चैत्र, मैत्र, सारक, सावित्र, जयन्त, गान्धर्व, कुतुप, रौहिण, विरंच्य, विजय, नैर्ऋत, महेन्द्र, वरुण, पटा इति पञ्चदश मुहूर्त्ताः इति । इत्यमानिर्णयः ।

अथ सङ्क्रान्तिः । अत्र स्नानं किञ्चिद्दानादि नित्यम् । तत्र सर्वसङ्क्रान्तिषु–अध उर्ध्वं च मिलित्वा त्रिंशन्नाड्यः पुण्यकाल इति सामान्यनिर्णय इति देवलः । उभयतः षोडशषोडशेति शातातपः । तत्र स्थिरासु विष्णुपदाख्यासु प्राक्कालः शस्तः । द्विःस्वभावरूप षडशीति तूत्तरः प्रशस्तः । एवं कर्केऽपि पूर्वं, मकरे चोत्तरतः । तुलामेषयोस्तूभयतो दश दश शस्ताः । याः याः सन्निहितास्ता अतिपुण्याः । वशिष्ठस्तु–कर्के त्रिंशत्

त्रिंशत्पूर्वाः। मकरे परा विंशतिः शस्ता इत्याह। **एवं च त्रिधा सङ्क्रान्तिः। पूर्वभोगिन्य उत्तरभोगिन्य उभयभोगिन्य** इति। ता यदि दिवा मध्याह्नादिषु जायन्ते तदा दिवैव तत्काललाभात्सम्यगेव। यदा तु पूर्वभोगिन्यामुदयोत्तरमव्यवधानेन जायमानायां दिवा पूर्वः शस्तः कालो न लभ्यते, उत्तरभोगिन्यामस्तात्पूर्वमव्यवधानेन जायमानायामुत्तरस्तथा न लभ्यते, तदा पूर्वभागावच्छिन्नं परभागावच्छिन्नं दिनमेव कृत्स्नं पुण्यम्, नतु प्रशस्तकाललाभेऽपि रात्रिः। अर्धरात्रादधोरात्रौ सङ्क्रमणे, आवर्त्तनोत्तरतः पूर्वदिनभागः, तदूर्ध्वं रात्रौ सङ्क्रमणे उदयोत्तरतः परदिनगोमध्याह्नपर्यन्तः। पूर्णार्द्धरात्रे घटीद्वयात्मके सङ्क्रमणे तु यदि पूर्वदिनोत्तरार्द्धवर्तितिथ्या, यद्यभिन्नासङ्क्रमकालिकी तिथिर्दिनद्वयार्द्धयोरपि तदा पूर्वभोगिनीषु पूर्वदिनोत्तरार्द्धम्, उत्तरभोगिनीषूत्तरदिनपूर्वार्द्धम्, उभयतोभोगिनीष्विच्छा। **मकरकर्कटयोस्तु**—रात्रिजातयोर्विशेषः। तत्र मकरेऽस्तादूर्ध्वं यदाकदाचिज्जाते उत्तरदिनपूर्वार्द्धं पुण्यम्। कर्केचोदयात्पूर्वं यदाकदाचिज्जाते पूर्वदिनेत्वोत्तरार्द्धं पुण्यम्। **आचाराद्रात्रौ वाऽनुष्ठानम्**। अत्र सत्ययञ्चारुणोदयोत्तरोदयकालः पूर्वसन्ध्यायां कर्के उत्तरदिनार्द्धं पुण्यमितिनारदः। अस्तादूर्ध्वं सन्ध्यायां मकरे च। सङ्क्रान्तिप्रयुक्तयात्रामैथुनादिनिषेधेष्वपि त एव कालाः। **इति सङ्क्रान्तिकालनिर्णयः।**

अथ ग्रहणकालः। अत्र दानस्नानहोमश्राद्धानि **नित्यानि। काम्यानि** च। तस्य ग्रस्यमाने स्नानं, ग्रस्ते होमः, श्राद्धं च। मुच्यमाने दानं, मुक्तेऽपि **स्नानं नित्यम्। अत्राशौचिनोऽप्यधिकारः। यत्तु**—स्नानमेवाशौचिनो न दानश्राद्धे इति **तन्निर्मूलम्। तच्च**—श्राद्धमामेन हेम्ना वा। **सतिसम्भवे पक्वेनापीत्यन्ये।** इदं च स्नानश्राद्धादि रात्रावपि। अत्र दानंचासत्युत्तमपात्रेऽन्यायापि देयम्। **संस्कारादिरहितजातिमात्रब्राह्मणायापि। अथ-**

मेवाब्राह्मण इत्युच्यते । अत्र स्नानद्वयमपि सचैलमेव । ग्रहणशौचान्तरितं पूर्वपक्वं च त्याज्यम् । **आरनाल, किलाट, सक्तु, स्नेहपक्वतैलानि तु न वर्ज्यानि** । उदकं च कुशच्छन्नं न दुष्यति । अत्र यद्देशे यावच्चाक्षुषयोग्यता तद्देशे तावान्पुण्यकालः । तादृशस्य च शास्त्रतो ज्ञानमप्यनुष्ठानप्रयोजकम् । **अतएव**—द्वीपान्तरस्य ग्रहणे न स्नानादि । योग्यतानिवेशेन चान्धानां मेघाच्छन्ने च जन्माष्टम्यादिस्थस्य दर्शननिषेधपालपितॄणां च स्नानाद्यनुष्ठानम् । अतिसूक्ष्मकालतयाऽनादेश्यानां कस्यापि दर्शनायोग्यानां निमित्तत्वनिरासः । **प्राच्यास्तु**—स्नानादिकर्तुस्तद्दर्शनमेव निमित्तम् । एवञ्चान्धानां मेघाच्छन्ने च न स्नानादि । द्वीपान्तरीयग्रहणे स्नानादिनिषेधस्तु—**नित्यानुवादः** । **मुक्तिज्ञानं तु शास्त्रीयमेव** । अतएव मुक्तिकाले मेघाच्छन्नेऽपि स्नानं, तदुत्तरभोजनादि च भवत्येव ।

अस्तास्ते तु—वचनात् परेद्युरुदये स्नानादि । अत्राप्युदयस्य शास्त्रीयमेव ज्ञानं प्रयोजकम् । दर्शनयोग्यताया निमित्तत्वेऽपि प्रयत्नानपनेय प्रतिबन्धकविरह एव । तेनान्धानां मेघाच्छन्ने च स्नानादि भवत्येवेत्याहुः । **उपरागनिष्ठशास्त्रनिर्णीतकालावयवकिञ्चिन्निष्ठपरप्रयत्नापनेय प्रतिबन्धकविरहोऽत्रोपरागनिष्ठदर्शनयोग्यता** । स च स्ननिमित्तं निश्चियमानः । **एवञ्चान्धस्य स्नानं भवत्येव** । यस्य चाष्टमादिस्थाने ग्रहणं, तेन दृष्टाऽपि स्नानं न बाधकम् । **मेघाच्छन्ने तु**—न स्नानमित्ति [illegible] व्याः । भोजनं तत्काले तत्पूर्वकाले अस्तास्ते उत्तरकाले च निषिद्धम् । तत्र **सूर्यग्रहे**–ग्रहणयामरूपावधेः पूर्वं **यामचतुष्टयं** न भोक्तव्यम् । **चन्द्रग्रहे तु तदवधेर्यामत्रयम्** । विधोरस्तोदये ततः पूर्वमहिभोजनाभावः । एवं **चन्द्रग्रस्तास्ते** तां रात्रिमुत्तरंचाहरभोजनम् । **सूर्यग्रस्तास्ते तु**–तदहोरात्रमभोजनम् । यच्चन्द्रग्रहे मोक्षोत्तरं भोजनं तत्सार्द्धयामपर्यन्तमेवेति **राजा** । द्विघटिकात्मकमहानिशान्तः पूर्वमि-

त्यन्ये। **बालवृद्धातुरैस्तु**—ग्रहणाद्यमुहूर्त्तावधेः प्राक्मुहूर्त्तत्रयं नसर्वथा भोक्तव्यम्। एवं अस्तचन्द्रास्तेऽपि। यावत्तदुदयमभोजनेनावस्थातुमसमर्थानां शास्त्रावगतमुक्तिकालभूताद्दर्भागोत्तरं भागद्वयमेकभागं वा त्यक्त्वा भोजनम्। **एवं अस्तास्तसूर्यास्तेऽपि**। **एवं अस्तास्ते पुत्रवद्गृहिणामप्यहोरात्रनिषेधः पाल्यः**। **यस्तु**—ग्रहणे **पुत्रवदुपवासनिषेधः**, स तन्निमित्तकस्य काम्यस्य। काम्योऽपि ग्रहण दिन एव, न तत्पूर्वदिने। **प्राच्यास्तु**—ग्रहणदिने श्राद्धादिकारिणा ततः प्राक् न भोक्तव्यमित्याहुः। **अत्र चन्द्रसूर्यग्रहणकाले भोजने प्राजापत्यं प्रायश्चित्तम्**। तद्दिने भोजने तदूर्ध्वं अस्तोत्तरनिषिद्धकालभोजने चैतत्। **बालवृद्धानामर्द्धम्**। **इन्द्रोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः। गङ्गातोये तु सम्प्राप्ते इन्द्रोः कोटी रवेर्दश**। अन्यकालीनतत्तीर्थस्नाने यत्पुण्यं, ततोलक्षगुणं ग्रहणकालिकतत्तीर्थस्नानेत्यर्थः। आतुर उष्णोदकेनापि स्नायात्। **रविवारे रवेर्ग्रहणं, सोमवारे सोमग्रहणं चातिप्रशस्तम्**। सतीर्थेऽर्केविधुग्रासे तन्तुदामनपर्वणोः। मन्त्रदीक्षाप्रकुर्वाणो मासक्षार्दान्न शोधयेत्। **इति ग्रहणम्**।

अथानध्यायः—तत्र **नित्यास्तावत्**—चतुर्दश्यौ, अष्टम्यौ पञ्चदश्यौ प्रतिपद्द्वयम्। मन्वाद्या युगाद्याश्च। ज्येष्ठशुक्लद्वितीया, आश्विनशुक्लदशमी, माघशुक्ले चतुर्थी द्वादश्यौ। कार्तिकी फाल्गुनी आषाढी उत्तरद्वितीया। अयने विषुवे आषाढकार्तिकशुक्लद्वादश्यौ। भाद्रपदशुक्लद्वादशी च। महालयान्तर्गते मघाभरण्यौ। पूर्वापरमुहूर्त्तद्वयरूपा महानिशा च। अस्तादूर्ध्वमर्धरात्राच्च त्रयोदशी सप्तमी चेत्तदा **प्रदोषः**। चतुर्थ्यां नव नाडिकापर्यन्तायां तत्रार्द्धरात्रावनध्यायः। उत्तरदिनेऽनध्याये भाविनि पूर्वनिशाचानध्यायः। **खण्डत्वे तान्निर्णयश्च**—उदयेऽस्तमयेवाऽपि मुहूर्त्तत्रयगामियत्। तत्तिथिस्तदहोरात्रमनध्यायविधौ विदुः। **केचित्तु**—यावन्नाडीपर्यन्तमनध्यायतिथिस्तावदेव नाध्येयमित्याहुः। **अत्यन्तवृद्धिक्षययोः**—क्षये दिनान्तैकमुहूर्त्तोऽप्यनध्यायप्रयोजिका, वृद्धौ तु त्रिमु-

हूर्त्तमिका तत्प्रयोजिका। अल्पवृद्धिक्षययोस्तु-द्विमुहूर्त्तादुपर्यनध्यायतिथिदर्शनेऽनध्यायः। प्रतिपल्लेशमात्रेण कलामात्रेण चाष्टमी। उदये विद्यमानाऽनध्यायप्रयोजिकेति केचित्।

अथ नैमित्तिकाः। तत्र तात्कालिकाः। श्वक्रोष्टुगर्दभवृकवायसोलूकशृगालदन्तिदुःखितार्त्तशब्दे रोदने च नाधीयीत। सामशब्दे श्रूयमाणे ऋग्यजुषोस्तयोः शब्दे च साम्नाद्यनध्यायः। वादित्रवीणागीतनृत्यरथशकटशब्दे च श्रूयमाणे। वाणमोक्षशिक्षादशाद्युत्पन्ने च शब्दे देहच्युतमांसास्थिशववित्पुरीषरेतोमूत्रार्त्तवसास्वेदाश्रुदूषिकाश्लेष्ममद्यशवशूद्रान्त्यजश्मशानपतिताः यावद्दृष्टिमापद्यन्ते तावदनध्यायः। शूद्रपतितयोः समानागारेऽपि चाण्डालशवसूतिकानां श्रावणे त्रिरात्रं वाग्यमः प्रायश्चित्तम्। शवान्त्यजानां ग्राममध्यवस्थानामनध्यायः। नगरादौ तु न दोषः। श्मशानग्रामान्तमहापथेषु नाध्येयम्। आशौचिनो यावदाशौचमनध्याय्यः। ब्रह्मचारिणामाशौचाभावेऽपि सपिण्डमरणे त्र्यहम्। महागुरु, आचार्यनिपाते द्वादशाहम्। अशुचिदूषितदेशे च। विद्युत्स्तनितवर्षाणामकाले सन्ध्याकालातिरिक्तकालेऽसकृदुपजने प्रत्येकं तात्कालिकोऽनध्यायः। सन्ध्ययोस्तु प्रत्येकमपर्त्तावाऽकालिकः। अकाले त्रयाणां सन्निपाते यदा कदाचिज्जाते त्र्यहम्। अनुराधामारभ्य षोडशसु ऋक्षेषु यावत्सूर्यस्तावत्कालः। यावद्भूमिकम्पोदकेत्येके। ऋतौ तु सन्ध्यातिरिक्ते त्रयमेलने तत्कालमेव। सन्ध्यायां सज्योतिः। द्वयोः सन्निपाते द्विदिनम्। केवलाऽतिवृष्टावपि त्रिदिनम्। अतिमारुतेऽत्रनाध्येयम्। अपराह्णे गर्जे विद्युति वा उल्कायां वा सम्पूर्णरात्रमनध्यायः। प्रदोषेचेदपररात्रिपर्यन्तं, तथा सन्ध्ययोर्नाध्येयम्। दुर्गन्धोपलब्धौ च। समानग्रामे शिष्टे च गृहागते यावदनुशं, ग्रामान्तरीणेत्वहः। खरोष्ट्राश्वैरिणगजवृक्षनौयानरोहणे च। तथा-शयानः प्रौढपादश्च भीतः कृत्वाऽवसक्थिकः। शुक्लार्द्रपाणिर्जग्ध्वा च सूतकान्नं निरामिषम्। नीहारे वारिमध्ये च वाक्शस्त्रकलहे तथा। वान्ते जीर्णे प्रहा-

रेण रुधिरे च परिप्लुते । शारुयत्व श्लेष्मातक मधूक कोविदारकपित्थच्छायासु । गोविप्रावरोधने । श्राद्धिपङ्क्तौ, भुक्ते, उद्गारे, मैथुने, वाससः परिधाने च । रविपरिवेषे च । अभ्यङ्गस्नानकाले च । प्रौढपादः पादारोपितपादः प्रसारितपादो वा । परेद्युर्यावत्सएव कालस्तत्कालभवमाकालिकम् । एष्वाद्याध्ययने त्र्यहं, विद्युत्सहितोरुकापातेऽपि त्र्यहः । अरुपदिग्दाहादौ तात्कालिकम् । उपाकर्मणि कृते त्र्यहम् । उत्सर्गे आद्याध्ययने त्र्यहम् । अन्यत्राहः । अन्यत्र धारणार्थेऽध्ययने । मन्त्रब्राह्मणयोरेकं समाप्यारण्यकमधीत्य तदहि अन्यन्नाध्येयम् । अस्तास्ते सम्पूर्णग्रासे त्र्यहम् । अन्यत्र तदहराकालिकं वा । प्रेतश्राद्धिकं भुक्त्वा प्रतिगृह्य च त्र्यहम् । अन्नजरणावधि वा । पूर्वावधिश्च निमन्त्रणकालः । अन्यश्राद्धेष्वहोरात्रम् । श्राद्धकर्तुरप्यहोरात्रम् । अरुपोत्सवे भुजेः उत्सवान्तं, महत्सूपनयनोद्वाहप्रतिष्ठोपाध्ययनादिष्वहः । यज्ञेचावभृथान्तमृत्विजामाचार्याणां च । माव्याभ्यां गुरुशिष्यान्तरगमने वर्षम् । अपाकाजशशैः षण्मासम् । वव्यशूकरैस्त्रिरात्रम् । विड्वराहखरोष्ट्राश्वाहिमार्जारमूषकनकुलोलूककरटगृध्रहंसमण्डूकगोऽवि, अश्वाऽश्वतरमहिषवानरऋक्षमसरीसृपरुरुपृषतमृगैरन्तरायेऽहोरात्रम् । आद्याध्ययने त्र्यहम् । एतदितरसूक्ष्मपशुपक्ष्याऽन्तराये न दोषः । इन्द्रध्वजोच्छ्रायपतनदिने च । **एते च सर्वमेधाविनाम्** । दुर्मेधानां भूरिवेदाध्येतॄणां च चतुर्दश्यष्टमी पर्वप्रतिपत्स्वेव । एते च वेदस्यैवग्रहणधारणाध्ययनयोः । नत्वङ्गाऽध्ययने, अङ्गानान्त्वष्टमी चतुर्दशी प्रतिपत्पर्वण्येव । ग्रहणे च सर्वानध्यायः । ब्रह्मयज्ञस्य द्रावनध्यायौ, यदात्माशुचिर्यदेशश्च । अनवरतविद्युदादिसम्पाते तात्कालिकश्च । **अनध्यायाध्ययनेन गुरुशिष्ययोरायुषक्षयः । इत्यनध्यायः ।**

अथ मासनिर्णयः । मासो हि दिनचातुर्विध्याच्चतुर्विधा । एकतिथ्यात्मकं चान्द्रं दिनम् । अहोरात्रात्मकं सावनम् । रवेः शशित्रिंशांशभोगेन सौरम् । चन्द्रनक्षत्रभोगेन नाक्षत्रम् । त्रिंशत्तिथिसमुदायः शुक्लादिर्दर्शान्तो मुख्यः । **चान्द्रः कृष्णादिः** पूर्णिमान्तो वा । त्रिंशदहो-

त्रः सावनः । रवेरेकराशिभोगेन सौरः । चन्द्रस्य सर्वक्षयपरिवर्त्तेनर्क्षत्रः । स च सप्तविंशतिदिनात्मकः । यत्किञ्चित्तिथिसमुदायोऽपि गौणश्चान्द्रः । अस्य मासिकाब्दिकादावुपयोगः । चैत्रादिशब्दैश्च सौरचान्द्रयोरेव व्यवहारो नान्ययोः । तत्रापि शुक्लचान्द्रवचना एव मुख्याः । "शेते विष्णुः सदाषाढ इत्यादौ" आषाढभाद्रपदादयोऽपि चान्द्रा एव । पक्षशब्दोऽपि प्रतिपदादिपूर्णिमान्त, तदाद्यमान्ततिथिसमुदायवचन एव । सौरादिषु तु गौणः । एवं वसन्तादयोऽपि चान्द्रमास द्विकद्विकवचना मुख्याः । सौरे तु गौणाः । कृष्णादौ च । एवं सम्वत्सरोऽपि । चैत्रशुक्लप्रतिपदादि फाल्गुनदर्शान्तो मुख्यः । सौरादिस्तु-गौणः । एवं तत्तत्तिथिमारभ्यषष्ट्यधिकत्रिंशत्तिथिसमुदायोऽपिगौणः । अयने तु सौरमानेनैव । विवाहादौ सौरोमासः । यज्ञादौ सावनः । आब्दिकादौ चान्द्रः । तिथिकृत्येषु कृष्णादिः । एवं विप्रस्य मापरिच्छिन्नोमासः । नृपस्य सङ्क्रान्तिपरिच्छिन्नः । वैश्यस्य पौर्णमासीपरिच्छिन्नः । विन्ध्यस्य दक्षिणे—शुक्लादिः । तदुत्तरभागे कृष्णादिः । तत्राब्दिकादौ चान्द्रः । त्रिंशत्तिथिसम्बद्धो गौणः । विन्ध्यदक्षिणादि देशव्यवस्थाः सङ्कल्पाद्युल्लेख्यमासविषयाः । इति ।

इति श्रीमन्नागोजिभट्टविरचितः
तिथिनिर्णयः सम्पूर्णः ।

विश्वोऽसौ यस्य वश्यः स्वयमपि सततं भक्तवश्यो य एव ।
साक्षाल्लक्ष्मीविहीनः क्षपयति जगतां लक्ष्म्यपूर्तिं क्षणेन ॥
त्रैलोक्यान्तैकहेतुर्हितमतिरचयत्यर्चितो योऽचिरेण ।
विष्वक्सेनं तं विश्वनाथः प्रणमति शिरसा विश्वनाथैकनाथः ॥ १ ॥

श्रीविश्वनाथः प्रसीदतु ।

प्राप्तिस्थानम्—
चौखम्बा संस्कृत पुस्तकालय,
बनारस सिटी ।

९६ वर्षकृत्यदीपकः। कालनिर्णयव्रतोद्यापन,सहितः। म० म० पण्डित नित्यानन्द पन्त-पर्वतीय। विरचितः। (कर्म्म० वि ९) रु० ३—०१

९७ श्रौतसूत्रम्। श्रीमन्महर्षि-लाट्यायनप्रणीतमग्निष्टोमान्तम्। (कर्म० वि० १०) रु० २—०

१८ नलचम्पूः अथवा दमयन्तीकथा। महाकविश्रीत्रिविक्रमभट्टविरचिता। विषमपद-प्रकाशाख्यव्याख्यया सहिता। भावबोधिनी टिप्पणी सहिता। (का० वि०१६) रु० १—४

१९९ श्रीब्रह्मसूत्रम्। श्रीभगवन्निम्बार्क महामुनीन्द्रविरचित वेदान्तपारिजात सौरभाख्यसूत्रवाक्यार्थेन श्रीश्रीनिवासाचार्यचरणप्रणीत श्रीवेदान्तकौस्तुभभाष्येण च सनाथीकृतम्। (श्रीनिम्बार्कभाष्यम्) (वेदान्त वि० १०) रु० ३—०

०० वाग्वल्लभः। श्रीमता दैवज्ञाग्रेसरेणागममार्मिकेण कविपुङ्गवेन दुःखभञ्जनविदुषा विरचितः, तत्सुतेन बहुशास्त्रपारगेण कविचक्रवर्त्तिना महामहोपाध्यायेन देवीप्रसाद-पण्डितप्रवरेण कृतया वरवर्णिन्या टीकयोपस्कृतः। (छन्दः शास्त्र वि० ४) रु० २—८

१०१ सिद्धान्तलक्षणम्। श्रीजगदीशतर्कालङ्कारकृतम्। न्यायाचार्य श्रीशिवदत्तमिश्र-विरचित गंगाख्यव्याख्या टिप्पणी सहितम्। (न्याय विभागे ४)) रु० १—८

१०२ वेदभाष्यभूमिकासंग्रहः। (सायणाचार्यविरचितानां स्ववेदभाष्यभूमिकानां संग्रहः)। [वेद० वि० ६] रु० २—८

१०३ माधवीयधातुवृत्तिः। श्रीमत्सायणाचार्यविरचिता। (व्या० वि० १२) रु० ५—०

१०४ बौधायनधर्मसूत्रम्। श्रीगोविन्दस्वामिप्रणीतविवरणसमेतम्। [कर्म०वि० ११] रु० ४—०

१०५ ताण्डयमहाब्राह्मणम्। सायणाचार्यविरचितभाष्यसहितम्। (वेदवि० ६) रु० १२—०

१०६ न्यायमञ्जरी। जयन्तभट्टकृता। न्याय-व्याकरणाचार्येण पं० सूर्यनारायणशास्त्रिणा कृतया टिप्पण्या समेता। सम्पूर्ण। [न्या० वि० १६] रु० ८—०

१०७ शारदातिलकम्। श्रीमद्राघवभट्टकृतपदार्थादर्शटीकासहितम्। (तन्त्र०वि०१) रु० ६—०

१०८ मन्त्रार्थदीपिका। म० म० श्रीशङ्कनविरचिता। सटीक। (वेद० वि० ७) रु० २—०

१०९ शब्दशक्तिप्रकाशिका। श्रीमज्जगदीशतर्कालङ्कारविनिर्मिता। श्रीकृष्णकान्त-विद्यावागीशकृतया कृष्णकान्तीटीकया श्रीमद्रामभद्रसिद्धान्तवागीशविरचितया रामभद्रीटीकया च समलङ्कृता। पं० दुण्ढिराजशास्त्रिकृतया छान्नोपयुक्तया विषमस्थलटिप्पण्या मूलकारिकाथन च सहिता। (न्या वि० १६) रु० ४-८

१० योगदर्शनम्। (पातञ्जलदर्शनम्) भगवत्पतञ्जलिरचितं, राघवानन्दसरस्वतीकृत-"पातञ्जलरहस्याख्य"टिप्पनीयुक्तया द्वादशदर्शनकाननपञ्चाननवाचस्पतिमिश्रविरचितया "तत्त्ववैशारद्या"ख्यया भूषितेन विज्ञानभिक्षुनिर्मित"योगवार्त्तिक"-समुल्लासितेन स्वामिहरिहरानन्दारण्यकृतभास्वतीवृत्त्या सहितेन भगवच्छ्रीकृष्णद्वैपायनव्यासदेवोपज्ञ-"सांख्यप्रवचन" भाष्येणेदूद्योतितम्, गोस्वामिदामोदरशास्त्रिणा विरचितया टिप्पन्या "पातञ्जलप्रभा"नामिकया भूमिकया च संवलितम्। (योग. वि. ३) ४—०

१११ सारस्वत व्याकरणम्। अनुभूतिस्वरूपाचार्य्यप्रणीतम्। श्रीचन्द्रकीर्त्तिसूरि-प्रणीतचन्द्रकीर्त्तिनाम्न्या सुबोधिकया व्याख्यया, श्रीवासुदेवभट्टविरचितप्रसादाख्यटीकया च समन्वितम्। कवितार्किकोत्कल-वास्क श्रीनवकिशोरशास्त्रिणा निर्मितया मनोरमाविवृत्त्या च समुल्लासितम्। (व्या. वि. १३) सम्पूर्णम्। रु० ३—०

११२ सामान्यनिरुक्ति-गादाधरी-गूढार्थतत्त्वालोकः। पं० कुलपति झोपाख्य-श्री-धर्मदत्त [श्रीबच्चा झा], शर्मविरचितः। (न्या. वि. १७) रु० १—८

११३ जागदीशी पक्षता। गंगाख्यव्याख्या टिप्पणीसहिता। (न्या. वि. १८) रु० १—८

११४ मनुस्मृतिः। कुल्लूकभट्टकृतमन्वर्थमुक्तावलीव्याख्यया पं० नेने इत्युपाह्व गोपालशास्त्रि-संगृहीतपरिशिष्टटिप्पण्यादिभिरपि सहिता। सम्पूर्णम्। (धर्म्म. वि. ३) रु० २—४

११५ व्युत्पत्तिवादः। श्रीमदूगदाधरभट्टाचार्यचक्रवर्तिविरचितः। पण्डितराज शुक्ल श्रीवेणीमाधवशास्त्रिरचित [शास्त्रार्थ-परीक्षोपयोगि] शास्त्रार्थकला टीका-सहितः। (न्या. वि. १९) रु० २—०

११६ भामती। ब्रह्मसूत्रशाङ्करभाष्यव्याख्या सर्वतन्त्रस्वतन्त्रश्रीमद्वाचस्पतिमिश्रविरचिता। न्यायाचार्य पं० दुण्डिराजशास्त्रिणा सङ्कलितया विषमस्थलटिप्पण्या समलङ्कृता। सम्पूर्णः। (वेदान्त वि० ११) रु० २—८

११७ जन्मपत्रदीपकः। सोदाहरण-सटिप्पण-हिन्दीटीकासहितः। ज्यौ० पं० श्रीविन्ध्येश्वरीप्रसाद्द्विवेदिना विरचितः। (ज्यौ. वि. ६) रु० ०—८

११८ गोभिलगृह्यसूत्रम्। सटीकम्। (कर्म्मकाण्ड वि० १२) रु० ३—०

११९ सिद्धान्तकौमुदी। व्याकरणाचार्य नेने पं० गोपालशास्त्रि विरचित सरला टिप्पण्या सहिता। "रूपलेखनप्रकार-पङ्क्तिलेखनप्रकाराख्य परिशिष्ट सहिता च। कारकान्तो भागः। (व्या० वि० १४) रु० १—४

१२० कात्यायनशुल्बसूत्रम्। कर्कभाष्य-महिधरवृत्ति सहितम्। (कर्म्म० वि० १४) रु० ०—६

१२१ व्यक्तिविवेकः। श्रीराजानकमहिमभट्टकृतः। श्रीराजानकरुय्यककृत व्याख्यया साहित्याचार्य पं० श्रीमधुसूदनशास्त्रिरचित मधुसूदनीविवृत्या च समुल्लासिता रु० ४—८

१२२ श्राद्धविवेकः। श्रीरुद्धरकृतः। वेदाचार्य पं० अनन्तरामशास्त्रि कृत टिप्पणी सहितः। (कर्म्म० वि० १३) रु० १—०

१२३ सांख्यतत्त्वकौमुदी। पण्डितराज श्रीराजेश्वरशास्त्रिद्राविड महोदयनामाङ्कया न्यायाचार्य श्रीहरिराम शुक्ल विरचितया "सुधमाख्य" कौमुदी व्याख्यया समलङ्कृता। (सांख्य वि० २) रु० १—६

१२४ वाक्यपदीयम्। श्रीभर्तृहरिमहावैयाकरण विरचितम्। न्याय-व्याकरणाचार्य पं० श्रीसूर्यनारायण शर्म शुक्लेन विरचितया भावप्रदीपाख्य व्याख्यया टिप्पणेन च सम्पादितम्। (ब्रह्मकाण्डम्)। (व्या० वि० १५) रु० १—८

१२५ प्रौढमनोरमा। भैरवी-भावप्रकाश-सरलाटीकोपेतः लघुशब्दरत्नश्च। [स्त्रीप्रत्ययान्तो भागः] (व्या० वि० १६) रु० ६—०

१२६ जैमिनीयन्यायमाला। श्रीमन्माधवाचार्यविरचिता। तद्विरचितेन विस्तरेण विभूषिता। मीमांसाचार्य पं० पट्टाभिरामशास्त्रिणा रचितया विषयवाक्यविवरण्या समलङ्कृत्य संशोधिता। [तृतीयाध्यायान्ता] (मीमांसा वि० ७) रु० २—०

१२७ शतपथब्राह्मणम्। (शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनशाखीयं) वेदविशारद मीमांसाकेसरिणा पण्डित चिन्नस्वामिशास्त्रिणा टिप्पण्यादिभिर्विभूष्यविशोधितम्। [काण्डचतुष्टात्मकः प्रथमोभागः] (वेद० वि० ७) रु० २—८

१२८ लघुशब्देन्दुशेखरः। म. म. श्रीनागेशभट्टविरचितः। [तपादान्तसूत्रान्तोभागः] नागेशोक्तिप्रकाश व्याख्यया संवलितः। (व्या० वि० १७) रु० २—८

१२९ कृत्यसारसमुच्चयः। म. म. श्रीअमृतनाथझा शर्मणा विरचितः। पण्डितश्रीगङ्गाधरमिश्रशर्मणा यथास्थलोपयुक्तटिप्पणीभिः प्रयोजनीयविविधपरिशिष्टविषयैश्च समलङ्कृतः। (धर्म० वि० ४) रु० १—१२

१३०-(१)भावप्रकाशः। श्रीभावमिश्रप्रणीतः। वनस्पतिविशेषज्ञ-रूपनिघण्टुकार-श्रीरूपलालवैश्यवरेण विरचितेन निघण्टुभागीय-सचित्र-विवरणेन समुपबृंहितया भिषग्रत्न-श्रीब्रह्मशङ्करशास्त्रिणा विनिर्मितया विद्योतिनीनामिकया भाषाटीकया संवलितः। [पूर्वखण्डान्तः] (आयुर्वेदवि० ३) रु० ६—०

१३०-(२) भावप्रकाशः। विद्योतिनी-भाषाटीका सहितः। [ज्वराधिकारमात्रः] रु० १—८

१३१ गादाधरी-सामान्यनिरुक्तिः। गंगाख्यव्याख्या टिप्पणी सहितः (न्या०वि०१९) रु० ३—०

१३२ चरणव्यूहसूत्रम्। आचार्यमहिदासकृतभाष्यसहितम्। वेदाचार्य डोगरा-अनन्तरामशास्त्रिणा टिप्पण्यापरिष्कृत्य संशोधितम्। (वेद वि० ८) रु० ०—८

१३३ वैयाकरणभूषणसारः। श्रीहरिवल्लभविरचित-दर्पणटीकया, म. म. श्रीमैत्रमिश्रकृतया-परीक्षाटीकया, श्रीकृष्णमित्रकृत-भूषणव्याख्यया, श्रीखुदीराम-शर्मकृत तिङ्र्थवादसारेण च सहितः। (व्या० वि० १८) रु० ३—०